
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

लक्ष्मीनृसिंहाय नमः ॥

Ⓐ

Acc. No. - ~~CH~~ M 1455
Title - पञ्चदशी (चित्रदीप व्याख्या) (अपूर्ण)
Author - भारतीतीर्थ
Date - ?
Subject - वेदान्त.
folio - 250
Xerox - 500

श्रीलक्ष्मीनृसिंहाय नमः ॥ अविघ्नमस्तु ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनी
श्वरौ ॥ क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी ॥१॥ चिकीर्षितस्य ग्रं
थस्य निष्प्रत्यूहपरिपूरणाय परमात्मनीति पदेनेष्टदेवतातत्त्वानुसंधानल
क्षणं मंगलमाचरन्नस्य ग्रंथस्य वेदांतप्रकरणत्वात्तदीयैरेव विषयादिभि
स्तद्वत्तासिद्धिं मनसि निधाय अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यत इति न्या
यमनुसृत्य परमात्मन्यारोपितस्य जगतः स्थितिप्रकारं सदृष्टांतं प्रतिजानीते
॥ यथा चित्रपटे दृष्टमवस्थानां चतुष्टयं ॥ परमात्मनि विज्ञेयं तथावस्था
चतुष्टयं ॥१॥ चित्रपटे यथा वक्ष्यमाणानामवस्थानां चतुष्टयं । तथैव परमात्मन्य
पि वक्ष्यमाणानामवस्थाचतुष्टयं ज्ञेयमिति ॥ किं तदित्याकांक्षायां दृष्टांतदार्ष्टांति
कयोरुभयोरवस्थाचतुष्टयं ॥ क्रमेणाह द्वाभ्यां ॥ यथा धौतो घट्टितश्च लां
छितो रंजितः पटः ॥ चिदंतर्यामि सूत्रात्मा विराट् चात्मा तथेर्यते ॥२॥ धौतो घ
ट्टितो लांछितो रंजितश्चेत्येवं प्रकाराश्चतस्रोऽवस्थाश्चित्रपटे यथोपलभ्यंते ॥
तथैव परमात्मन्यपि चिदंतर्यामि सूत्रात्मा विराट् चेत्यवस्थाचतुष्टयं बोद्ध
व्यमित्यर्थः ॥ दृष्टांते स्थितानामवस्थानां स्वरूपं क्रमेण व्युत्पादयति ॥ स्वतः
शुभ्रोऽत्र धौतः स्याद् घट्टितोऽन्नविलेपनात् ॥ मष्याकारैर्लांछितः स्याद् रंजितो

वर्णपूरणात्॥३॥ अत्रास्य वस्त्रस्य मध्ये स्वतोऽशुभ्रत्वसंबंधं विना धौतो शुभ्रो
इत्युच्यते॥ अन्नेन विलिप्तो घट्टितः॥ मषिमयैराकारैः सूक्ष्मैः कोलांछितः॥ यथा
योग्यं वर्णैः पूरितेनारंजितः स्यात्॥ दार्ष्टांतिकेपि व्यादयति॥३॥ स्वतश्चिदंत
र्यामी तु मायावी सूक्ष्मसृष्टितः॥ सूत्रात्मा स्थूलसृष्ट्यैष विराडित्युच्यते परः॥४॥
परः परमात्मा मायातत्कार्यरहितः चिदित्युच्यते॥ मायायोगादंतर्यामी॥ अ
पंचीकृतसूक्ष्मकार्यसमष्टिसूक्ष्मशरीरोपाधियोगात्सूत्रात्मा॥ पंचीकृतस्थूल
कार्यसमष्टिस्थूलशरीरोपाधियोगाद्विराडिति॥ ननु परमात्मनश्चित्रपट
स्थानीयश्चेत्तदाश्रितानि चित्राणि वक्तव्यानीत्यत आह॥ ब्रह्माद्याः स्तंबपर्यंताः
प्राणिनोऽत्र जडा अपि॥ उत्तमाधमभावेन वर्तंते पटचित्रवत्॥५॥ अत्र पर
मात्मनि उत्तमाधमभावेन वर्तमानं ब्रह्मादिस्तंबपर्यंतं चेतनं ... गिरि
नद्यादिकं जडजातमपि चित्रस्थानीयमित्यर्थः॥ ब्रह्मादिजगतश्चेतनत्वे कारणं
वक्तुं दृष्टांतमाह॥ चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक् पृथक्॥ चित्राधारेण
वस्त्रेण सदृशा इव कल्पिताः॥६॥ यथा चित्रे लिखितानां मनुष्यादिशरीराणा
मेव नानावर्णोपेताः वस्त्रविशेषाः लिख्यंते न शैलनद्यादिनि चरकवादस्त्र...

सू

ना

सोऽप्यच। दार्ष्टांतिकमाह पृथक्पृथक् चिदाभासाश्चैतन्याध्यस्तदेहिनां। कल्पं-
ते जीवनामानो बहुधा संसरंत्यमी॥७॥ एवं परमात्मन्यारोपितानां देवादी-
नां शरीराणामेव जीवनामानश्चिदाभासः प्रत्येकं कल्प्यंते। पर्वतादीनां तेषां क-
ल्पने कारणमाह॥ बहुधेति। अमी जीवा देवतिर्यङ्मनुष्यादिशरीरप्राप्त्या
बहुधा संसरंति न परमात्मा। तस्य निर्विकारत्वादिति भावः॥ ननु सर्वैर्वादिनां
लौकिकैश्चात्मन एव संसार इति वदंति। तत्र किं कारणं (?) [illegible] ज्ञानमेव का-
रणमिति सदृष्टांतमाह॥ वस्त्राभासस्थितान्वर्णान्यद्वदाधारवस्त्रगान्॥ व-
दंत्यज्ञास्तथा जीवसंसारं चिद्गतं विदुः॥८॥ गिरिनद्यादीनां तु चिदाभास-
कल्पनाभावं दृष्टांतपुरःसरमाह॥ चित्रस्थपर्वतादीनां वस्त्राभासो न लिख्यते
॥ सृष्टिस्थः मृत्तिकादीनां चिदाभासस्तथा नहि॥९॥ प्रयोजनाभावादिति भा-
वः। एवं आत्मन्यारोपितस्य संसारस्य ज्ञाननिवर्त्यत्वसिद्धये तत्कुलं (?) नाम विद्या-
माह॥ संसारः परमार्थोऽयं संलग्नः स्वात्मवस्तुनि। इति भ्रांतिरविद्या स्याद्विद्ययैष
निवर्त्तते॥१०॥ केयं विद्या तल्लाभोपायश्च केदृशाकांक्षायां विद्यास्वरूपं तल्लाभोपा-
यश्च दर्शयति॥ आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः॥ इति बोधो वि-

२

द्यालभ्यते सो विचारणात् ॥११॥ चिदात्मा सस्पष्टस्यर्थः। विचाराल्लभ्यते विचार
कस्य विचारादित्याशंक्याह। सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः ॥ ननु प
रमात्मा विचार्यतां मोक्षावस्थायां फलरूपत्वावस्थानात् जीवजगतोर्विचारः
को पयुज्यत इत्याशंक्य तयोरपि बाधेनेन परमात्मावशेषणेनोपयुज्य
त इत्याह। जीवभावजगद्भावबाधे स्वात्मैवशिष्यते ॥ ननु विचारेण जीवजगतोर्बा
धे तदप्रतीत्या व्यवहारलोपः प्रसज्येतेत्याशंक्या बाधशब्दस्य विवक्षितमर्थं वि
पक्षे दंडं चाह ॥ नाप्रतीतिस्तयोर्बाधः किंतु मिथ्यात्वनिश्चयः ॥ नो चेत्सुषुप्तिमू
र्छादौ मुच्येतायत्नतो जनः ॥१२॥ सुषुप्तिमूर्छादौ स्वत एव द्वैतप्रतीत्यभावा
त् तत्त्वज्ञानजनकविचारं विना मुक्तिः स्यादित्यर्थः। स्वात्मैव शिष्यत इत्येतेनापि
परमात्मनस्सत्यत्वज्ञानमेव विवक्ष्यते। न तदतिरिक्तजगतो विस्मृतिः जीवन्मु
क्त्यभावप्रसंगादित्याह। परमात्मावशेषोपि तत्सत्यत्वविनिश्चयः। न जगद्विस्मृ
तिः नो चेज्जीवन्मुक्तिर्नसंभवेत् ॥ सदा विचारयेदित्युक्तत्वाद्देहपातपर्यंतं विचारप्र
सक्तो समाप्तस्यावधिमाह। परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा ॥ तत्रा
परोक्षविद्याप्तौ विचारोऽयं समाप्यते ॥१४॥ विचारजन्या विद्या परोक्षा चापरोक्षा

॥१४॥

प्रा

5

चित्रदीप

वृमेदेन द्विविधे साक्षात्कारे तयोः स्वरूपं क्रमेण दर्शयति॥ अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञा
नमेव तत्॥ अहं ब्रह्मेति चेद्वेद साक्षात्कारस उच्यते॥१८॥ एवं विधासाक्षात्का
रस्यावधारणकारणमात्मतत्त्वविवेचनं प्रतिजानीते। तत्साक्षात्कारसिध्यर्थमात्म
तत्त्वं विविच्यते॥ येनायं सर्वसंसारात्सद्य एव विमुच्यते॥१९॥ येन साक्षात्कारे
ण पुमान्सद्य एव विमुच्यते। तत्साक्षात्कारसिध्यर्थमिति पूर्वेणान्वयः॥ चि
दात्मानं परमार्थिकमेकत्वेन निश्चितं व्यवहारदशायां प्रतीयमानं चैतन्यभेदम
द्दिशति॥ कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा॥२०॥ येकाग्निना चतु
र्विध्ये दृष्टांतमाह। घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा॥ घटावच्छिन्न
स्य घटाकाशस्य तदवच्छिन्नस्य महाकाशस्य प्रसिद्धत्वात्तौ विहाय प्रसिद्धे जल
काशाभ्राकाशे व्युत्पादयति॥ घटावच्छिन्ने खे नीरं यत्तत्र प्रतिबिंबितः। साभ्रनक्षत्र आका
शो जलाकाश उदीरितः॥२१॥ घटावच्छिन्न आकाशे यदुदकमस्ति तत्र जलप्रतिबिं
बितो अभ्रनक्षत्रसहितो य आकाशो जलाकाश इत्युच्यते॥ अभ्राकाशं व्युत्पादयति॥ म
हाकाशस्य मध्ये यन्मेघमंडलमीक्षते प्रतिबिंबितया तत्र मेघाकाशो जले स्थितः॥२२॥
तत्र मेघमंडले यज्जलं तस्मिन्नित्यर्थः॥२२॥ ननु मेघजलस्याप्रतीयमानत्वात्तत्
त्र कथं प्रतिबिंबितत्वज्ञानमित्याशंक्याह॥ ॥ मेघांशरूपमुदकं तुषाराकारसं[...]तं॥

दी॰ ६

प्रथ॰ २

तत्रस्वप्रतिबिंबोऽपि नीरत्वादनुमीयते ॥१॥ मेघस्थस्य जलस्य प्रत्यक्षेणानुप-
लंभेऽपि वृष्टिलिंगक्षणकार्येण मेघः तदुपादानमुदकं सूक्ष्मावयवरूपेण नास्तीत्य-
नुमीयते । उदकत्वेन वृष्टिलिंगेन विमतं जलमाकाशप्रतिबिंबवन्न भवितुमर्हति । ज-
नूबट लत्वाद्भूनिगतजलवदित्यनुमानेन मेघांशरूपजलेप्याकाशप्रतिबिंबसद्भावो-
वगम्यत इत्यर्थः ॥ एवं दृष्टांतमाकाशचतुष्टयं दार्ष्टांतिके प्रथमोद्दिष्टं कूटस्थ बुसाद्य
ध्यस्तं दर्शयति ॥१॥ अधिष्ठानतया देहद्वयावच्छिन्नचेतनं पंचीकृतापंचीकृतभू-
तकार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्याविद्याकल्पितस्याधारतयावर्तमा-
नत्वेन ताभ्यामवच्छिन्न आत्मा कूटस्थ इत्युच्यते । तत्र कूटस्थशब्दप्रवृत्तौ निमि-
त्तमाह ॥१॥ कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते ॥२१॥ एवं कूटस्थे
कल्पितजीवस्य कूटस्थे कल्पितबुद्धिप्रतिबिंबत्वेन तत्समपातित्वात्तं कल्पा
दयति । कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबकः ॥१॥ तस्य जीवशब्दाभि-
धेयत्वे निमित्तमाह ॥ प्राणानां धारणाज्जीवः संसारेण स युज्यते ॥२२॥ कूटस्था-
तिरिक्तजीवकल्पनमप्रयोजनमित्याशंक्याविकारिणः कूटस्थस्य संसारासं-
भवात्तन्निर्वाहार्थं सोऽपि कल्पयितव्य इत्याह । संसारेण स युज्यत इति ॥१॥ ननु जी-

पद ८

वाति द्दित्त्वं कूटस्थो क्तिचेत् किमिति न प्रमासतद्रसाङ्गां क्यंजीवेन तिरोहितत्वादि
ति सदृष्टांत माह ॥ जलव्योम्नाघटकाशो यथा सर्वस्तिरोहितः ॥ तथा जीवेन कू
टस्थो सोन्योन्याध्यासउच्यते ॥२३॥ नन्वेनत्तिरोधानं न क्वापि शास्त्रप्रतिपादितं मि
त्याशंक्य तस्यान्योन्याध्यासशब्देनाभिधानान्नैवमिसाह। सोन्योन्याध्यासइति
उच्यते नाच्यैवृ... निशेषः। नन्वयं ध्याससश्चेदस्य कारणरूपाप्यविद्या वा
कच्येसाशंक्य जीवे कूटस्थयोः संसारदशायां भेदप्रतीतिरेवाविद्येसाह ॥१॥ अयं
जीवो न कूटस्थं विविनक्ति कदाचन ॥ अनादिरविवेकोयं मूलाविद्येति गम्यतां
॥२४॥ उक्तस्य जीवस्याविद्याकल्पितत्वं ...हिकरणायाविद्यां विभजते ॥१॥ वि
क्षेपावृत्तिरूपाभ्यां द्वेधाविद्याव्यवस्थिता ॥१॥ विक्षेपहेतुत्वेनान्यारूहितं चादा
वृत्तिरूपत्वं लक्षयति ॥१॥ न भाति नास्ति कूटस्थ इत्यापादनमावृतिः ॥१॥ कूटस्थो
न भातीति प्रकाशाभावेना नास्तिवेति व्यवहारहेतुरावरणमिसर्थः ॥ ॥ नन्वविद्याया
...तावरणस्य च सद्भावे किं प्रमाणमित्याशंक्य लोकानुभव... वेसाह ॥१॥ अज्ञा
नी विदुषा पृष्टः कूटस्थं न प्रबुध्यते ॥ न भाति नास्ति कूटस्थ इति बुद्धा वदत्यपि ॥ ...वि
दुषा कूटस्थं जानासीति पृष्टोऽज्ञानी तं न जानामीति सज्ञानमनुभूय वक्ति ... यमति ...
नुभवः। अत्र तु नयं ज्ञानेनवः नै प्रेपामिति नावः। नन्वनमते आत्मनः स्वयं...

नांत नास्मिन विद्यानोपपद्यते। नेजस्त्रिमिरयोरिव विरुद्धस्वभावत्वेन तयोसं
नुपपत्तेः। अविद्या तावच्च तत्कृतमावरणं दुर्निरूप्यं स्यात्तदभावेन मूलक...
...स्यासंभवः। विक्षेपाभावे च ज्ञाननिवर्त्यस्यानर्थस्याभावात् ज्ञानवैयर्थ्यं नतः
तत्प्रतिपादकशास्त्रमप्रमाणं स्यादित्याशंक्य एतत्सर्वं पूर्वोक्तानुभवबाधितमित्या
ह॥ ॥स्वप्रकाशोर्वे विद्या तां विना कथं भावृतिः। इत्यादितर्कज्ञाला निस्वानुभूति
...नहि दृष्टेऽनुपपन्नं नामेति न्यायादिति भावः॥१॥ ननु अननुभवस्यो
...धेनानासमान ... तेन तत्र निश्चयदार्ढ्यं कथमनुभवप्रामाण्यं। न
...केवलतर्कस्यानिर्णायकत्वस्य ... गतत्वात् तर
...निश्चयः ० क्वापि स्यादित्याह॥१॥ स्वानुभूताववि श्वासे तर्कस्याप्य
नवस्थितेः। कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात्॥ ननु न वस्तुतत्त्वनिश्चय
कत्वं तथाप्यनुभूयमानस्यार्थस्य संभावितत्वज्ञानाय तर्कापेक्षा...स्यादसा
रानुभवमनुपयन्... नैव तर्को... निश्चयः॥१॥ बुध्यारोहाय तर्कश्चेद
पेक्ष्यते तदाश्रयताम्। स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यतां॥ ...कोसावनु
भवः यदनुसारेण तर्कोऽनुपालनीय इत्याकांक्षायां पूर्वोक्तमविद्यादिगोचरमनुभव
स्मारयति। स्वानुभूतिर...यामाबृनोत्त्वपदार्शितो॥१॥ फलितमाह। अतः कु...

रविद्या ॥२५॥ नतद्विरोधेनोत्याह

तो ॥२४॥

चैतन्यमविरोधीति तर्क्यते ॥१॥ तमेव तर्कमभिनीय दर्शयति ॥ ॥ तदेव हि विरोधि
केनेयमावृतिर्धीदृश्यतां ॥ [illegible] अविद्यावरणसाधकस्य चैतन्यस्यैव तद्विरोधित्वे
अविद्याप्रतीतिरेव न स्यादिति भावः । तर्ह्यविद्यायाः को विरोधीत्यत आह ॥ विवेक
तो विरोधः स्यात्तत्त्वज्ञानी निदृश्यतां ॥२॥ विवेकं उपनिषद्विचारजन्यं ज्ञानं । विवे
कस्याविद्याविरोधित्वं कुत्र दृष्टमित्यत आह । तत्त्वज्ञानिनीति ॥२॥ एवमविद्यावरणं
दर्शयित्वा विक्षेपाध्यासमाह ॥ ॥ अविद्यावृतकूटस्थे देहद्वयस्थिता चितिः शुक्तौ
रूप्यवदध्यस्ता विक्षेपाध्यास एव हि ॥ [illegible] पूर्वोक्ताविद्यावरणवति कूटस्थे प्रस
ङ्गादध्यारोपितस्थूलसूक्ष्मशरीरसहिता चिदाभासो विक्षेपाध्यास इत्यर्थः ॥
अस्य विक्षेपाध्यासस्य सिद्धये शुक्तिरजताध्याससाम्यं दर्शयति ॥ ॥ रूपं चैवि
दंता चैव विक्षेपवीक्ष्यते न्यगा ॥ [illegible] शुक्तिकायां स्थितं पुरोदेशादिसंबंधित्वम
धिष्ठानं यथारोपितेव रजतेवत्तासते । एवं स्वयं चैतन्य [illegible] रूपं वस्तु कूटस्थे
निष्ठमानोपितचिदाभासे वस्तासत इत्यर्थः ॥ ॥ एवं सामान्यांशप्रतीतिलक्षणं
[illegible] विशेषपर्यवीति साम्यं दर्शयति ॥ ॥ नीलपृष्ठत्रिकोणत्वं यथा शुक्तौ तिरो
हितं । अंशसंगानंदतात्येवं कूटस्थेपि तिरोहितं ॥ ॥ साम्यांतरं दर्शयति ॥ आरो
पितस्य दृष्टांते रूप्यनाम यथा तथा ॥ कूटस्थाध्यस्तविक्षेपविनामाहमिति ॥ नश्वरे

॥२४॥

इदमंशस्य सत्यत्वं शुक्तिगं रूप्य
दृश्यते ॥ ॥२२॥

श्रुतिः

यथा दृष्टांते शुक्तिरजतस्थले आरोपितपदार्थस्य सत्यत्वनाम रूप्यमिति नामरूपा
एवं कुटस्थकल्पितसिदाभासतत्पविक्षेपस्य पूर्वोक्तस्याहमिति नामरूपे॥
लदृष्टांते शुनावती निद्राकाले इंद्रियसंनिकर्षजाते सति रूप्यमिदमिति तद
तिरिक्तरजताभिमानन्नत्यसितेन वेदार्थेति आत्मा तिरिक्तव स्वाभिमान दृष्टा
त्रियात्र विस्वप्रकाशत याविदात्मन्यव तास्मनेन नदतिरिक्तोहमिस्य
नोन्नल न्यत। अतान वैषम्यमित्यतिप्रायपाह॥ ॥इदमं तः स्व
पत्य स्तुप्य मीस्वमिमन्यतातथा स्वतः पत्यन्नाहमिति मन्यते॥२॥
नत्वाहमिति अहंशब्दयोरेकार्थवाचकत्वंदृष्टांतदार्ष्टांतिकयोस्साम्यमिसाशंक्य
इदं रूप्यशब्दार्थयोस्वयमहंशब्दार्थयोश्च सामान्यरूपत्वस्यैनयस्वतः साम्य
मेवमित्याह। इदंवरूप्यतन्निं स्वार्थतेनतथ्यतां॥ सामान्यंच विशेषश्च॥ ५
नयत्रोपिगम्यते॥ स्वयंशब्दार्थस्य सामान्यरूपत्वं स्पष्टीकर्तुं लौकिकं प्रय
गं तावद्दर्शयति॥ ॥देवदत्तः स्वयं गच्छेत् स्वं वीक्ष्यस्स्वयं तथा॥ अहं स्वयं न शक्नो
मि स्वं लोकप्रयुज्यते॥ ६॥ नचैवंप्रयोगः कथमेतावता स्वयंशब्दार्थस्य सा
मान्यरूपत्वमिसाशंक्यैवंशब्दार्थं दर्शयति॥ इदंत

दं दि

11

प्यमिदं वस्त्वाद् इतियदुदितं तथा ॥ असौ च महर्षिस्तु स्वयमित्यनुगम्यते ॥ ४९ ॥
यथानत्प्य वस्त्वादौ सर्वत्रेदं शब्दस्य प्रयुज्यमानत्वात्तदर्थस्य सामान्यरूपत्वं
तथा । असौ च महर्षिः सर्वत्र स्वयंशब्दप्रयोगात्तदर्थस्यापि सामान्यरू
पमवगम्यत इत्यर्थः ॥ ॥ ननु स्वयमहंशब्दार्थयोर्लौकिके वेद ॥ एतावता
अवस्थात्मनि किं मायानामेतिपृच्छति ॥ ॥ अहंतादिद्युतां स्वस्वं कूटस्थौ
न किं तव ॥ ॥ सामान्यरूपस्वयंशब्दार्थ एव कूटस्थ इती मायात निसाह ॥
स्वयंशब्दार्थ एवैष कूटस्थ इति मे मतं ॥ ५० ॥ ननु स्वरूपाधर्मः । अन्यत्वं नि
वारयति न कूटस्थत्वं बोधयतीति तत्रांकाले अन्यत्ववारके स्वत्वमिति चेद
न्यत्वं कूटस्थस्यात्मतावत्तदिष्टमेव हितद्वेतु ॥ ५१ ॥ स्वयंशब्दार्थस्य कू
टस्थरूपत्वात्मत्वात् स्वत्वेनान्यवारणमिष्टमेवेति परिहरति । अन्यवारणं कूटस्थ
स्येति ॥ ननु स्वयमात्मशब्दयोर्भिन्नप्रवृत्तिनिमित्तयोर्गवाश्वादिशब्दयोरिवैका
र्थत्वाभावात्कथं स्वयंशब्दार्थस्य कूटस्थस्यात्मत्वमित्याशंक्य हस्तः करादि
शब्दवदेकार्थत्वोपपन्नमैक्यमिति परिहरति ॥ स्वयमात्मेति पर्यायौ तेन लोक
योः सह ॥ प्रयोगो नास्य तत्स्वत्वमात्मत्वं चान्यवारकं ॥ ५२ ॥ पर्याय चेत्सह प्रयोगो

अचेतने चात्मसत्ताभ्युपगमो

न चैतद्युक्तमाह तेन लोकयति कुतस्त्वित्यत आह। अनन्तःस्वचमिति। न हि घटादिषु

चेतनेष्वपि स्वयं शब्दस्य प्रयोगदर्शनात्। स्वयं चात्मेतयोरेकत्वं न घटितं

इति शंकते॥ घट स्वयं न जानातीत्येवं स्वत्वं घटादिषु अचेतनेषु दृष्टं चेत् दृश्य

तामात्मसत्त्वे तत्र॥ घटादिष्वपि स्फुरणरूपेणात्मचैतन्यस्य सत्त्वात्तेष्वपि स्व

शब्दप्रयोगो न विरुध्यत इत्याह दृश्यतामिति॥ ॥ ननु घटादिष्वात्मसत्त्वे चे

तनाचेतनविभागो निर्निमित्तकः स्यादित्याशंक्य। चेतनाचेतनविभा

गस्य बुद्धि... तासत्त्वासत्त्वप्रयुक्तत्वात्कारणसद्भावेनैवेति परिहरति॥ ॥ चेतनाचे

तनविभागः कूटस्थात्मसत्तया न हि॥ ॥ किन्तु बुद्धिगताभाससत्त्वासत्त्वाभ्यामिति॥ ५७॥

ननु चेतनाचेतनविभागस्य बुद्धिगताभाससत्त्वासत्त्वप्रयुक्तत्वाभ्युपगमे निष्प्रयोजन

स्यादित्याशंक्य चेतनाचेतनविभागश्चेत् कूटस्थस्यानभ्युपगम्यत्वेऽपि चेतनक

ल्पनाधिष्ठानत्वेन कूटस्थोऽभ्युपगन्तव्य इत्यभिप्रायेण घटादिस्तत्रैव चैतन्य सह

त्वं तथा तत्रैव कल्पितः॥ ५८॥ स्वकल्पितात्मत्वयोरेकत्वेति प्रसङ्गं शङ्कते॥ ॥ तद

न्ते अपि स्वचमिव चमहमादिषु सर्वत्रानुगतेन तयोरप्यात्मत्वमिति चेन्न॥ ५९॥

महमादिषु सर्वत्रानुगतस्य स्वस्वरूपत्रानुगतयोस्तयोर्भेदेन तयोरप्यात्मत्वे

ते

पताकिं न स्यात् तद्दर्शितात्‌ त्वः तत्त्वेदं तत्तयोरात्मत्वांतराधिकं त्रिवादात्मत्वेन संभव
तीत्याह ॥ ॥ नेत्यात्मत्वेप्यनुगते । तत्त्वेदं नेत तत्त्वयोः । आत्मत्वेनैव संज्ञाविध्यं
संभवत्वादेर्यथा तथा ॥ ६० ॥ तत्त्वेतेदं तेस्वत्वमिवयुक्त यद्यपित्वमहमादिष्वनुगतं तथा
पिते वृत्तिवर्तमानात्मत्वेप्यनुगते । तदात्मत्वमिवं मात्मत्वमित्यादिव्यवहारसंज्ञावा
तृ । अतस्तयोरात्मत्वाधिकं त्रिवादात्मतपतानसंज्ञाव्यते । तत्र हेतुः । तः । सम्य
वादेरिति । संभ्यगात्मत्वमसंभ्यगात्मत्वमिति । व्यवहारवशादात्मत्वेप्यनुवर्तमान
यो संभ्यक्तौ संभ्यक्तयोरेव द्वयर्थः ॥ ॥ एवं प्रासंगिकं परिसमाप्य फलितप्रदर्शनाय
लोकव्यवहारसिद्धमर्थमनुवदति ॥ ६१ ॥ तत्त्वेदं तेस्वतां चेवं चाहं ते परस्परं प्रतिद्वंद्वि
[illegible] सिद्धो नास्ति संशयः ॥ ६१ ॥ तत्त्वाप्रतियोगीत्वमिदं त्वायास्तदिदमितिस्त्वत्वप्र
तियोगीत्वमन्यत्वस्य स्वयमन्यद्रितिवं त्वाप्रतियोगीत्वमहं त्वायास्तन्महमिति लोके प्रति
द्वंद्वित्वेन प्रयोगदर्शनात् प्रसिद्धमिति भावः । ननु एवं लोके प्रसिद्धत्वेति किं मायातमित्यत आ
ह ॥ ॥ आत्मता प्रतिद्वंद्वि त्वयं कुटस्थ इष्यतां ॥ वं त्वाप्रतियोग्येष्व हमीत्येमनिके
त्यितो अन्यत्वप्रतियोगीस्त्वयं शब्दार्थः । कुटस्थ एवं त्वाप्रतियोग्यहंशब्दार्थश्चिदाभासः
कुटस्थः कल्पितद्वैसर्थः ॥ ॥ ननु कथं प्रकारं जीवकुटस्थयोर्भेदसत्वेपि सर्वज्ञत्वं कि
मिति न ज्ञानं ति ति यां शंक्याह ॥ ॥ अहं त्वागेव वयानेदि रूप्यतेदं तयोरिव ॥ न स्पे

मोहमापन्नेः वेदं प्रतिपद्दिरे ॥ ५॥ बुद्धिसाक्षिणः कूटस्थस्य बुद्ध्या अध्यस्तिकर्तुमशक्य
त्वादहमिति प्रतीतौ समानयोर्जीवकूटस्थयोरत्यन्ताभेदग्राहकं चेत्प्रतिपन्ना इत्यर्थः ॥ ननु अस्य
जीवकूटस्थयोरेकत्वभ्रमस्य किं कारणमित्यपेक्षायामाह ॥ तादात्म्याध्यास एवात्र पूर्वो
क्तो विद्यया कृतः ॥ अविद्यायां निवृत्तायां तत्कार्ये विनिवर्तिते ॥ ६॥ अत्रास्मिन् ग्रंथे
अनादिरविवेकोऽयमित्यत्रोक्तो यो ऽविद्यये त्यर्थः ॥ यतो विद्याकार्यत्वमध्यासस्योक्तं
अतः [illegible] निवर्तकतत्त्वज्ञानेनैव तन्निवृत्तिरित्याह अविद्यायामिति ॥ ॥ [illegible] ध्यासस्यावि
[illegible] तन्निवृत्त्या निवृत्तिरित्येतदनुपपन्नं ब्रह्मज्ञानैकसाध्यकत्वविद्यायामुत्पन्नायामपि
अविद्याकार्यस्य देहादेरुपलभ्यमानत्वादित्याशंक्याह ॥ ॥ अविद्यावृत्तितादात्म्ये
विद्ययैव विनश्यतः ॥ विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते ॥ ७॥ ॥ अविद्यैकका
रणयोरावृत्तितादात्म्ययोर्विद्ययैव निवृत्तिः कर्मसहिताविद्याजन्यस्य तु विक्षेपस्य च र
पस्य कर्मावसानपर्यंतमवस्थानमिति न विरोध इति भावः ॥ ननु प्रारब्धं कर्म वा नि
मित्तमात्रं वा तत्सद्भावमात्रेणोपादाने विनष्टेऽपि कथं कार्यानुवृत्तिरित्याशंक्य शास्त्रो
क्तं प्रसिद्धदृष्टान्तेन तदनुवृत्तिं संभावयति ॥ ॥ उपादाने विनष्टेऽपि क्षणं कार्यं प्रतीक्ष्य
ते ॥ इत्याहुस्तार्किकास्तद्वदस्माकं किं न संभवेत् ॥ ८॥ ननु तार्किकैः कार्यस्य क्षणमात्रमव
स्थानमंगीकृतं न चिरकालमित्याशंक्याह ॥ तंतूनां दिनसंख्यानां तैस्तादृक्क्षण इष्य

नदीप

...नोऽयं ...टिका। लौकि... ...कआह ति व्याकारण...

प्रथम

तः॥ अमस्या संख्यकल्पस्य योग्यक्षणादूर्ध्वं त्वन्तां ॥ संसारस्यानादिकालमार
भ्यानुवृत्तेर्वा संसारवन्धोऽनवकल्पमवच्छिरकालानुवृत्तिर्न विरोध्यत इति भावः॥ ननु
तार्किकैर्यथा। अनुक्रमसिद्धिर्न लद्भव तापि माशंक्य स्वाधीनतो वैषम्यं दर्शयति
॥ ॥ विना सोदक्षमं मानं नैव बुद्धीपरिकल्प्यते। श्रुतिरूपमनुमतिर्न्यायवदनां कीर्तु
दुर्गाकं॥ ४८॥ सोदक्षमं विचारसहं प्रमाणं विना प्रमाणमन्तरेणार्थः॥ तस्य ताव
देव। चिरया वन्तविमोक्षार्थं संपत्स्य इति श्रुतिः॥ चक्र चमूणादिं दृष्टान्तो युक्तिः॥ ब
नु। न्नति विंदि दनु नवः॥ एतेभ्यः प्रमाणेभ्यः किं वक्तुम... शक्यमिति अभिप्रायः॥
प्रस्तुतमनुसरति॥ ॥ आस्तां तु तार्किकैः सार्धं विवादः प्रस्तुतं ब्रूत॥ स्वाहं नो सिद्धमे
...कूटस्थपरिणामिनोः॥ ४९॥ स्वयमहं शब्दार्थयोः कूटस्थपरिणामिनोमेकत्वं स्वी
...सिद्धं॥ ॥ ननु कूटस्थजीवयोरेकत्वं स्वां सा सिद्धं ... इदं ज्ञानमिति केऽपि कुतान
जानन्तीत्याशंक्य श्रुतितात्पर्यपर्यालोचनशून्य एव दित्याह॥ भ्रान्त्येते पण्डितंमन्याः
दुर्विलोकिताः तीर्थिकाः॥ अनादृत्य श्रुतीर्मोर्ख्यात् केवलं युक्तिमाश्रिताः॥ ५०॥ ननु श्रु
सर्थपर्यालोचित... कुतो न जानन्तीत्याशंक्यते षां ... श्रुत्यर्थपर्यालोचना
भावादित्याह॥ ॥ पूर्वापरपरामर्शविकलास्तत्र केचन॥ वाक्याभासान्स्वपक्षेऽपि
योजयन्त्यल्पचेतसः॥ ५१॥ तत्र तावल्लोकसक्षेकप्रमाणान्यपगमेनातिस्थूलद्रष्टॄ

पंचदीप

लौकायतिकादिपक्षं प्रत्यमतेनानुभाषते॥ ॥कूटस्थादिशरीरांतसंघातस्यात्मतो
क्तं युः॥ लोकायताः पामराश्च प्रत्यक्षाभासमाश्रिताः॥२९॥ प्रत्यक्षसिद्धं चेद्देहादेरात्म
त्वं पारमार्थिकं स्यादित्याशंक्य तेषां प्रत्यक्षाभासमिति॥ ते प्रत्यक्षैकप्रमाणवादिनो
ऽपि परव्यामोहनाय स्वमतं श्रुतिसिद्धमिति दर्शयितुं वाक्यमप्युदाहरंतीत्याह श्रु
तौ कर्हि स्वपक्षं ते कोशमन्नमयं तथा॥ विरोचनस्य सिद्धांतं प्रमाणं प्रतिजज्ञिरे॥३०॥
कोशोऽन्नमयमिति शब्देनान्नमयकोशप्रतिपादकं स वा एष पुरुषोऽन्नरसमय इत्यादि
वाक्यं लक्ष्यते॥ ॥विरोचनस्य सिद्धांतमिति॥ न सिद्धांतप्रतिपादकमात्मैवेह महय्य
आत्मा परिचर्य इत्यादिवाक्यं लक्ष्यते। एतद्वाक्यद्वयं प्रमाणत्वेन प्रतिजानंत इत्यनेनोपपादयि
तुं क्षमाः प्रकरणाविरोधादिति भावः॥ ॥अस्मिन्मते दोषप्रदर्शनपुरःसरं मतांतरमु
त्थापयति॥ ॥जीवात्मनिर्गमे देहमरणस्यात्र दर्शनात्॥ देहातिरिक्त एवात्मेत्याहुर्लौकि
कतांपरे॥३१॥ ॥किंदृशो देहातिरिक्त आत्मा केन वा प्रमाणेन वा गम्यत इत्याकांक्षायामाह॥
प्रत्यक्षत्वेनाभिमताहंधीर्देहातिरेकिणं॥ ॥गमयेदिंद्रियात्मानं वच्मीत्यादिप्रयो
गतः॥३२॥ अहं वच्मि अहं पश्यामीत्यादिप्रयोगदर्शनाद्देहातिरिक्तोऽयमहंबुद्धिगम्य॥ नि
द्रियाण्यात्मेत्यर्थः॥ ॥नान्वींद्रियाणामचेतनानां कथमात्मत्वमित्याशंक्य श्रुतीष्विंद्रि
यसंवादश्रवणादचेतनत्वमसिद्धमित्याह॥ ॥वागादीनामिंद्रियाणां कलहः श्रुतिषु

चै

स
ह
य

श्रुतेः तेन चैतन्यमेतेषां आत्मत्वं तत्तद्विहितं ॥ चेतनस्यैवालक्षत्वाच्चेतनानामि-
न्द्रियाणां आत्मत्वमुचितमित्याह ॥ आत्मत्वं तेनरवहीति ॥ ॥ मतांतरमुपपादय-
ति ॥ ॥ हैरण्यगर्भाः प्राणात्मवादिनो वमुखिरे ॥ स्वप्नाद्यक्षलोपेति प्राणस्यैव तु जीव-
ति ॥ प्राणस्यात्मत्वे श्रौतलिंगादि निदर्शयति ॥ ॥ प्राणो जागर्ति सुप्तेपि प्राणश्चेष्टा-
दिके स्थिते ॥ कोशः प्राणमयः सम्यक् विस्तरेण प्रपंचितः ॥ प्राणाग्नय एवैतस्मिन् पु-
रे जाग्रति इत्यादिना प्राणजागरणं श्रूयते । तस्मात् प्राणोपगतो दति ह वै तदुत्क्रमणत एव तदेव तदु-
त्क्रमितिप्राणस्याधिक्यं श्रूयते । अन्योंतर आत्मा प्राणमयः इत्यादिना प्राणमयः
कोशः प्रपंचितः । आदि शब्देन प्राणसंवादप्रवेशादिकं ग्राह्यं । प्राणादप्यंतरमस्य म-
नसः ... वादिनो दर्शयति ॥ ॥ मन आत्मेति मन्यंते नूपासनपराजनाः ॥ ॥ प्रा-
णस्य आत्मत्वे युक्तिमाह ॥ ॥ प्राणस्यभोक्तृता स्यात्तस्य भोक्तृत्वं मनसः स्मृतं ॥ मन-
सआत्मत्वे युक्तिप्रतिपादकं श्रुतिमाह ॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः ॥ त-
स्माद्वा एतस्मात्प्राणमयादन्योंतर आत्मा मनोमय इति श्रुत्यंतरं दर्शयति ॥ ॥ श्रुतो
मनोमयः कोशस्तेनात्मेतीरितं मनः ॥ ॥ फलितमाह तेनेति ॥ मनसोप्यंतरस्य विज्ञा-
नस्यात्मत्वं वादिनो बौद्धस्य मतं दर्शयति ॥ ॥ विज्ञानमात्मेत्यपरे आहुः ॥ क्षणिकवा-
दिनः ॥ यतो विज्ञानमूलत्वं मनसो गम्यते स्फुटं ॥ विज्ञानस्यांतरत्वे युक्तिमाह ॥ यत इति ॥

॥१४॥

विज्ञान मनःशब्दस्य वाच्यस्यांतःकरणस्यैकवाक्यं मनोविज्ञानयोः कार्यकारण
तावद्व्याख्यातं शंक्यतमुपपादइतुं तयोर्भेदं तावद्दर्शयति ॥ ॥अहंवृत्तिरिदं वृ
त्तिरित्यंतःकरणं द्विधा ॥ विज्ञानं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत् ॥१७॥ तयोः का
र्यकारणभावमाह ॥ अहंप्रत्ययबीजत्वमिदंवृत्तेरितिस्फुटं ॥ ॥तदेवोपपादय
ति ॥ अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित् ॥१८॥ ॥अहंवृत्त्यैव यानाभेदं
दृष्ट्वा तेनयोः कार्यकारणभावइत्यर्थः । तस्य विज्ञानस्यैव क्षणिकत्वे अनुमा
नं प्रमाणयति ॥ ॥क्षणेक्षणे जन्मनाशावहंवृत्तेर्मितौ यतः ॥ विज्ञानं क्षणिकं ते
न स्वप्रकाशं स्वतोमितेः ॥१९॥ क्षणिकत्वमुपपाद्य स्वप्रकाशत्वमुपपादयति । स्वप्र
काशं स्वतोमितेरिति । स्वेनैव प्रमितत्वादित्यर्थः । विज्ञानस्यात्मत्वे आगमः प्रमाणमि
त्याह ॥ ॥विज्ञानमयकोशोयं जीवइत्यागमोजगौ ॥ सर्वसंसार एतस्य जन्मनाश
सुखादिकः ॥२०॥ तस्माद्वा एतस्मान्मनोमयात् । अन्योंतर आत्मा विज्ञानमयः । विज्ञा
नं यज्ञं तनुते इत्यादिवाक्यं विज्ञानस्यात्मत्वप्रतिपादकमितिभावः ॥ ॥बाधावांतर
भेदस्य शून्यवादिनो मतं दर्शयति । विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत्
अन्यस्यानुपलब्धेश्च शून्यं माध्यमिका जगुः ॥ तत्र श्रुतिमाह । असदेवेदमित्यादावि
दमेव सत् । असदेवेदमग्र आसीत् इतिश्रुतिः । शून्यस्यैव तत्त्वरूपत्वे प्रतीयमानस्य जगत
तः ॥१५॥

कामतिमित्याह॥ ॥ज्ञानदृश्यात्मकं सर्वं जगद्भातिप्रकल्पितं॥ कल्पितदेतन्न तं तु षयति
॥निरधिष्ठानविभ्रांतेरनात्मात्मनोस्ति तौ तिशून्यस्यापिसस्या॥सिवाद्दन्यथानो॥किरस्य
तीतनिस्वरूपस्यशून्यस्याधिष्ठानत्वायोगान्निरधिष्ठानस्यचभ्रमत्वानुपपत्तेः जगत्कल्पना
धिष्ठानस्यात्मनस्सत्तास्युपगंतव्या॥ किंच॥ शून्यवादिनापिशून्यसाक्षित्वेकोप्यात्मा
पगंतव्यः॥ अन्यथातस्याप्यपगमे स्यशून्यस्योक्तिशून्यमितिसन्निधानंनेतत्वबौद्धस्यमतेन सिद्धये
दितिभावः॥ कस्तर्ह्यात्मेत्यतआह॥ ॥अन्योविज्ञानमयतआनंदमयआंतरः॥ ८॥अस्तीत्ये
वोपलब्धव्यइतिवैदिकदर्शनं॥ ॥तस्माद्वाएतस्माद्विज्ञानमयात्अन्योंतरआत्मानंदम
यइति॥ अस्ती॥ स्तीत्येवोपलब्धव्य॥ स्तदन्तावानेतिचश्रुतिसद्भावादानंदमयआत्मा
भ्युपगंतव्यइतिवैदिकदर्शनं॥ वैदिकसिद्धांतः॥ ॥एवमात्मस्वरूपेविप्रतिपत्तिप्र
दर्श्य॥ तत्परिमाणविशेषविदामपिविप्रपत्तिंदर्शयति॥ ॥अणुर्महान्मध्यमोवेत्येव
तत्रापिवादिनः॥ बहुधाविवदंतेहिश्रुतियुक्तिसमाश्रयात्॥ ९॥ अणुं वदंत्यांतरा(?)मुक्षे
णादिप्रचारतः॥ रोम्णः सहस्रभागेनतुल्यास्तुप्रचरंत्यमूः॥ सूक्ष्माणुचाभिधानेहतुना
हृत्स्नेनाडीनितनुपपादयति॥ रोम्ण इति नाडीविशेषणं॥ सूक्ष्मास्तुनाडीषुसंचरणु
विनानघटतइत्यभिप्रायः॥ ॥अणुत्वेकिंप्रमाणमित्यतआह॥ अणूरपिच्यापोषु सूक्ष्मा
सुक्ष्मतरमिस्या॥ याश्रुतयइत्यर्थः॥ श्रुतयोत्रातत्त्वोयस्सहस्रशः॥ ॥अणोरणीयान्महतो

महीयान्। एषो ऽणुरात्मा चेतसा वेदितव्यः। सूक्ष्मात्सूक्ष्मतरमित्याद्याः श्रुतय इत्यर्थः।
श्रुतं वरमुपहरति॥ वालाग्रशतभागस्य शतधा कल्पितस्य च॥ भागो जीवः स विज्ञे
यः इति चाहापरा श्रुतिः। मध्यमपरिमाणवादिनो दर्शयति। विभुं वरामध्यमं च माह
रापादमस्तकं। चैतन्यस्य व्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि तत्रोपपत्तिमाह। आ
पादे। स एष इह प्रविष्टः। आनखाग्रेभ्य इति श्रुतिरप्यत्र प्रमाणमित्याह॥ आनखा
येति। ननु मध्यमपरिमाणे श्रुतिप्रसिद्धो नाडिप्रचारो न घटते तद्दूषणं कथमाह॥ ॥
सूक्ष्मैर्नाडिप्रचारस्तु सूक्ष्मैरवयवैर्भवेत्॥ स्थूलदेहस्य हस्तास्यो कंचुकप्रति
मोकवत्॥ टी। यथा देहावयवयोर्हस्तयोः कंचुकप्रवेशेन देहस्यापि कंचुकप्रवेशः।
तद्वदात्मदेहावयवानां सूक्ष्माणां नाडिप्रचारेणात्मनोपि प्रचार इत्यर्थः इत्य
र्थः॥ नन्वात्मनो नियतमध्यमपरिमाणत्वे कथं दशाननाधिकशरीरप्रवेशो न घटते
इत्याशंक्यावयवागमापायाभ्यामात्मनो नियतमध्यमपरिमाणत्वाद्देहवदुत्पत्तिनाशवि
त्वं ध्वनयदित्याह॥ ॥न्यूनाधिकशरीरेषु प्रवेशोपि गमागमैः। आत्मांशानां न वे
त्तेन मध्यमत्वेन निश्चितं॥ टी। फलितमाहतेनेति। आत्मनः सावयवत्वे घटादिवदनि

2

सत्वप्रसंगेनैतद्दूषयति। सांशस्य घटवन्नाशो नवयेव। तथा सति कृतनाशाकृताभ्या
गमयोः कोवा... कोनवेत्... कोदोषः स्यत्राह। तथासतीति कृतयोः पुण्यपा
पयोर्भोगमन्तरेण नाशः। अकृतनाशोऽकृतयोरकस्मात्फलदातृत्वमकृताभ्यागमः।
एतद्दोषद्वयमात्मनोऽनित्यत्वेऽन्यपगमोऽनवेदिति भावः॥ ॥अतः पारिशेष्यादा
त्मनो विभुत्वं सिद्धमित्याह॥ ॥तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः
अत्र प्रमाणमाह॥ ॥आकाशवत्सर्वगतो निरंशः श्रुतिसंमतैः॥ आकाशवत्स
र्वगतश्च नित्यः। निष्कलं निष्क्रियमित्यागमप्रमाणमित्यर्थः॥ ॥एवमात्मनो विभु
त्वं प्रसाध्य तस्य चिद्रूपत्वे निश्चेतुतावेदान्तीविप्रतिपत्तिं दर्शयति॥ ॥इत्यात्मा
नं द्विधा प्रोक्त्व है याकरहं यमः॥ ॥अचिद्रूपोऽथ चिद्रूपश्चिदचिद्रूप इत्यपि॥ ॥अचि
द्रूपवादिनो दर्शयति॥ ॥प्राभाकरास्तार्किकाश्च प्राहुरस्याचिदात्मताम्॥ ॥त
त्र क्रियामनुभाषते॥ ॥आकाशवद्द्रव्यमात्मा शब्दवत्तद्गुणश्चितिः॥ ॥आत्म
द्रव्यं न विभुमर्हति। गुणवत्त्वादाकाशवदित्यनुमानं सूचितं॥ ॥आत्मनः पृथिव्यादि
भ्यो भेदसाधकं विशेषगुणं दर्शयति शब्दवदिति। आत्मा पृथिव्यादिभ्यो भिद्यते ज्ञा
नगुणकत्वात्। यत् पृथिव्यादिभ्यो न भिद्यते तन्न ज्ञानगुणकमपि न भवति। यथा

महीयान्। एषो ऽणुरात्मा चेतसा वेदितव्यः। सूक्ष्मात् सूक्ष्मतरमित्याद्याः श्रुतयः। यद्यप्यर्थः
श्रुतसंदर्भमुपोद्धरति॥ बालाग्रशतभागस्य शतधा कल्पितस्य च॥ भागो जीवः स विज्ञे
यः इति चाहापरा श्रुतिः। मध्यमपरिमाणवादिनो दर्शयति। द्विमं परमध्यमञ्च माह॥
आपादमस्तकं। चैतन्यस्य व्याप्तिसंदृष्टेः। न खाग्रश्रुतेरपि तत्रोपपत्तिमाह। आ
पादेति। स एष इह प्रविष्टः। आनखाग्रेभ्य इति श्रुतिरप्यत्र प्रमाणमित्याह॥ आनखा
ग्रेति। ननु मध्यमपरिमाणत्वे श्रुतिप्रसिद्धो नाडीप्रचारो न घटते तदुत्तरं शङ्कयाह॥
सूक्ष्मो नाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत्॥ स्थूलदेहस्य हस्तौ स्यातां कञ्चुकप्रति
मोकवत्॥ यथा देहावयवयोर्हस्तयोः कञ्चुकप्रवेशेन देहस्यापि कञ्चुकप्रवेशः।
तद्वदात्मा देहावयवानां सूक्ष्माणां नाडीप्रचारो ऽप्यात्मनो ऽपि प्रचार इत्युपपद्यते इत्य
र्थः॥ नन्वात्मनो नियतमध्यमपरिमाणत्वे कर्मवशान्न्यूनाधिकशरीरप्रवेशो न घटते
इत्याशङ्क्यावयवागमापायाभ्यामात्मनो नियतमध्यमपरिमाणत्वाद्देहवदुपपद्यत इति
मध्यतदित्याह॥ ॥ न्यूनाधिकशरीरेषु प्रवेशो ऽपि गमागमैः। आत्मांशानां भवे
त्तेन मध्यमत्वं सुनिश्चितं॥ फलितमाह तेनेति। आत्मनः सावयवत्वे घटादिवदनि

पृथ्वीव्यादीनामनंदरूपत्वं तस्यैव तद्विशेषणगुणांतराण्याह। इच्छाद्वेषप्रयत्ना
धर्माधर्मौ सुखासुखे॥ तत्संस्काराश्च तस्यैत गुणाश्चितिवदीरिताः॥ ते
संस्कारास्तासकास्त्वगुणानां तत्सन्निहितानाश्रीकारणमाह॥ ॥चितिमत्वाद्वे
तनो ... मनसायोगेत्स्वादरूपवशात्तेगुणाः॥ जायंते तथा प्रलीयंते सुषुप्ते दृष्ट
संस्यात्... स्वादरूपवशातो आत्मनो मनसायोगइत्यन्वयः॥ आत्मनो चिद्रूपत्वे
कथं चैतन्यस्वरूपागानुरूपता ... चितिमत्वादित्याह॥ ॥चितिमत्वाद्भूतनोपमिका
दिप्रयत्नवान्॥ आत्मनो धर्माधर्मौ कर्ता भोक्ता दुःखसुखादिमत्त्वम्॥ आत्मनश्च
...चेहेवं ... इच्छेति। तस्यैश्वराद्वैलक्षण्यमाह। स्याद्भर्तायोद्गिति॥ ॥नन्वा
त्मनो विभुत्वे लोकांतरगमनादिकं कथं घटते इत्याशंक्यास्मिन्देहे कर्मवशा
दिच्छाद्युपेतो ... नात्मनो ...व्यवहारइव कर्मवशाल्लोकांतरदेहांतर
संबंधे तदवच्छिन्नात्मप्रदेशे सुखदुःखाद्युत्पत्तिवशात्तत्रात्मनो गमनादिकं
... यथात्र कर्मवशानः कदाचित्सुखादिकं तथा लोकांतरे देहे ...
...जन्यत्वे ... विभुत्वस्यापि संनवेलोगमागमो॥ ८२॥ आत्मनः कर्तृत्वादिधर्मवत्त्वे
किं प्रमाणमित्याशंक्याह॥ ॥कर्मकांडस्य समग्रस्य प्रामाण्यमिति तद्वदन्॥ ... ॥नन्वन्ये
... आनंदमयत्वात्तरइत्यानंदमयस्यात्मत्वमुक्तं कथमिदानीमिच्छादिमा

श्री॰२

न्यः प्रतीयेत अतः पूर्वोत्तरविरोध इत्याशंक्याह ॥ ॥आनंदमयः कोशो यः सु
षुप्तौ परिशिष्यते । अस्य हर्षादि त्वस्यास्त्वेषां पूर्वकोशस्थितगुणाः ॥ यद्वा सूर्य तीव स्प
ष्टः चिदय आनंदमयकोशः परिशिष्यते स पूर्वकोशाः श्रोतेषु पंचकोशेषु प्रथमः एषां
प्रतीकारादीनामात्मा अस्यात्मनस्ते पूर्वकोशगुणा इत्यर्थः ॥ ॥ब्रह्मैवात्मनश्चि
द चिद्रूपत्वं भावावपर्यन्तीत्याह ॥ ॥गुरुश्चैतन्यमनुप्रवेक्षेद्व्यबोधस्वरूपता ॥आत्म
नो बृहत्वतनाद्ब्रह्मश्चिदुत्प्रेक्षाश्रितस्मृतौ ॥ दृष्ट्वात्मनां गुह्यमस्य स्वेचैतन्यमनुप्रब्रह्म
त हि वाचिख्यातेन यात्कं कल्पयन्ति ॥ चैतन्योत्प्रेक्षायां कारणमाह ॥ चिदुत्प्रेक्षा
श्रितस्मृतेरिति ॥ छिद्रितस्मृतेश्चिदुत्प्रेक्षा न भवतीति योजना ॥ सुषुप्तेराच्छितस्य जा
यमानस्मरणात् सौषुप्तचैतन्यस्योत्प्रेक्षा न भवतीत्यर्थः ॥ ॥चिदुत्प्रेक्षा पका
रमेव स्पष्टयति ॥ ॥जीवो [illegible] तदास्वाप्स्यामीति जाड्यस्मृतिस्तदा ॥ विना जाड्या
नुभूतेन कथं चिदुपपद्यते ॥ [illegible] सुषुप्तिकाले जीवो स्वाप्स्यामीति सेवं रूपा जा
ड्यस्मृते [illegible] छितस्य [illegible] जायमाना सुषुप्तिकालीनं जाड्यं [illegible] तावमं तरेणा
नुपपद्यमाना तदानीं तेन जाड्यानुभवं कल्पयतीति भावः ॥ सुषुप्तौ चैतन्यलो
पाभावे दूषणमाह ॥ ॥दृष्टुर्दृष्टेर्विलोपश्च स्फूर्तो सुप्तौ न ततः स्वयं ॥ अप्रकाशेन को
ना त्यां [illegible] ज्ञानवत्त्वात् ॥ नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अवि
नाशित्वादिति श्रुतेः सुषुप्तौ चैतन्यलोपाभावश्च यतः [illegible] कार्यादयमात्मा
पि

त्र्य टि

खद्योतवद स्फुरणास्फुरणान्यां सुकोनवतीमर्थः॥ अस्मिन्नात्म न्ते दुःषणाभिधानपुर
सरसां र्दमनन्तु ह्लादयति। निरं ... नयात्म चं मकयं शिद्धे बिध्यते॥ तेन शिहप एवा
मेः साहसां रख्या विवेकिनः॥ ६७॥ जोइय स्मृतेस्त हि कागतिरिसा सांख्याह॥ ॥ जाड्यांश
प्रकृतेस्तपं विकारि त्रिगुणं चतत्॥ ॥ तन्प्रकृतिरूपं सत्वरजस्तमोगुणात्मकं प्रवृत्तिकल्पना
यां प्रयोजनमाह॥ ॥ चितो भोगापवर्गार्थं प्रकृतिस्सा प्रवर्तते। चितेः पुरुषस्य इतियावत्
ननु चितोऽसंगत्वेन प्रकृतिपुरुषयोरसंततविविक्तत्वात् प्रकृतिः प्रवृ... साकथं पुरुषस्य भो
गापवर्गविसारांकय तयोर्विवेकस्याग्रहणात् पुरुषे भोगापवर्गौ व्यवह्रियेते इत्या
ह॥ ॥ असंगायाश्चितेर्मोक्षबंधौ भेदाग्रहान्मतौ॥ ८ ॥ तार्किकादिभिरिव सांख्ये
रप्यात्मनेसंगी क्रियतद्द्याह॥ ॥ सिद्धमोक्षव्यवस्थार्थं पूर्वेषामिव विद्धि दोषं नदे
तिसङ्गावे पुरुषस्यासंगत्वे च श्रुतिमुदाहरति। महतः परमव्यक्तमिति प्रकृतिरुच्यते॥ श्रुताव
संगतानमहदसंगोहीति स्फुटां ... जीवविषयां वादि विप्रपत्तिं प्रदर्श्येश्वरविषयां तां दर्श
इतुमिश्वरस्वरूपं तावत्स्थापयति॥ ॥ चित्सन्निधौ प्रवृत्तायां प्रकृतेर्हि नियामकं॥ ईश्वरं
ब्रुवते योगास्सजीवेभ्यः परश्रुतः॥ ९॥ ननु प्रकृतिपुरुषातिरिक्तेश्वरकल्पने प्रमाणाभिसार
क्याह। सजी... इति। तामेवेश्वरसद्भावप्रतिपादिकां श्रुतिं पठति। प्रधानक्षेत्रज्ञपतिर्गु
णेश इति स्मृतिः॥ प्रधानं गुणसाम्यावस्थारूपं क्षेत्रज्ञो जीवः। तेषां पतिः। गुणाः स
त्वादयः। तेषामीशो नियामक इत्यर्थः। न केवलं इयमेव श्रुतिरीश्वरप्रतिपादिका॥ अपि तु अन्या

ख्य

स

२००

मीर्ब्रह्मा पूर्वमेवोक्ताह॥ ॥हिरण्यकेऽसंक्रमेणाद्युतर्याम्क पपादितः॥१८॥ तामेव वादी
विप्रतिपत्तिं प्रतीजानीते॥ ॥अत्रापि कल्हायंते वादिनः स्वस्वयुक्तिभिः वाक्या
न्त्रियथा स्वसंदाढर्ययो विहरंतीहि॥१९॥ ॥प्रज्ञामतिक्रम्य यथा प्रज्ञे॥ ॥इदानीं पतं
जलौ को ईश्वरप्रतिपादकं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ई
श्वर इत्येतत्सूत्रमर्थतः पठति॥ ॥क्लेशकर्मविपाकैस्तदाशयैरप्यसंस्पृष्टः॥ पुंविशे
षोऽनन्तवेदेऽसौ जीववत्सोऽप्यसंगचिन्मयः॥२०॥ क्लेशा अविद्यादयः कर्माणि कर्मोक्तफल
कं योगीनस्त्रिविधमितरेषामिति सूत्रितानि सति मूले तद्विपाको जात्यायुर्भोगल
क्षणा उक्ताः कर्मविपाकाः फलविशेषाः तदाशयास्तेषां संस्काराः तैः क्लेशादि
भिरस्पृष्टः पुरुषविशेष ईश्वरो भवति। सोऽपि जीववदसंगश्चिद्रूपश्चेत्यर्थः॥ अस
संगचिद्रूपत्वे कथं नियंतृत्वमित्यत आह॥ ॥तथापि पुंविशेषत्वान्नित्यं नियंतृ
ता॥ ॥ईश्वरस्य नियंतृत्वाम्नायपरामर्शमाह॥ ब्रह्मवत्स्यैव बंधमोक्षौ पातंजलानि हा
न्यथा ...ऽप्यसंगस्येश्वरस्य नियंतृत्वे निष्प्रमाणकमित्याशंक्याह॥ ॥तेषा स्वाभाविकं
... संगस्य परात्मनः॥ श्रुतं तद्युक्तमप्यस्य क्लेशकर्माद्यसंगमात्॥२१॥ तर्हि नियंतृत्वं श्रुतं। न म
श्रुतमप्ययुक्तं कथं मंत्री क्रियत इत्यत आह युक्तमपीति। जीवधर्मस्य क्लेशादेरनावादु
पपन्नं वेदित्यर्थः॥ ॥ननु जीवा अप्यसंगचिद्रूपाः क्लेशरहिता एव तथात्वे ईश्वरको विशे
षमित्याशंक्य। जीवानां स्वतः क्लेशादिरहितत्वेऽपि बुद्ध्या सहायी विवेकाग्रहात् क्लेशादिरस्तीति

सं

पूर्वोक्तं स्मारयति ॥ जीवानामप्यसंगत्वाक्लेशादेर्नेत्याप्यपि च ॥ विवेकाग्रहतः क्लेश
कर्मादिप्राप्तिरिति तः ९० ॥ ताहि का संगस्य नियामकं चेत्तु सहमाना जीवविलक्ष
णाभावाय ज्ञानादिगुणत्रयं नियमं गमयतीत्याह ॥ ॥ नित्यज्ञानप्रयत्नेच्छागुणा
निशस्य भवते ॥ असंगस्य नियंतृत्वमयुक्तमिति नार्किकोक्तौ नन्विच्छादिगुणाक
स्य तस्य कथं जीवादिवत्संपत्ति साक्षांच्च गुणानां नित्य चावदेवेति ॥ ॥ तुविरो
षत्वमप्यस्य गुणोरेवनत्यान्यथा ॥ गुणानां नित्यत्वे प्रमाणमाह ॥ स सत्यकामः
सत्यसंकल्प इत्यादिश्रुतिनिर्देशो ॥ ॥ तत्रापि दोषसद्भावात्सूक्ष्मांतरमाह ॥ ॥
नित्यज्ञानादिगुणत्वेऽस्य सृष्टिरेव सदा न वेत्तु ॥ हिरण्यगर्भं दृष्टांतो लिंगदेहेन संयु
तः स्यादित्यस्य हिरण्यगर्भस्य किं रूपं नियतत्वमाह ॥ लिंगदेहेनेति । मायोपाधिक
परमात्मा लिंगशरीरसमष्ट्यभिमानेन हिरण्यगर्भ इत्युच्यते इत्यर्थः ॥ ॥ हि
रण्यगर्भस्येश्वरत्वे किं प्रमाणं इत्यत आह ॥ उदितिश्च ब्राह्मणोक्तस्य माहात्म्य
श्रुतिविस्तृतं ॥ ननु लिंगशरीरयोगे जीवस्यापि शास्त्रं क्वचित् विद्याकामकर्मणा
यां जीवं कुर्यादाह ॥ लिंगसत्वेनु जीवत्वं नास्य कर्माद्यभावतः ॥ ९२ ॥ केवलं लिं
गशरीरस्य स्थूलशरीरं विहाय अनुपलभ्यमानत्वात् । स्थूलशरीरसमष्ट्य
भिमानं विराडीश्वर इत्याह ॥ ॥ स्थूलदेहं विना लिंगदेहो न क्वापि

छा

नां नियम परीक्ष्य ति

चित्रदीप

दृश्यते। वैराजादिदेहई शोतस्सर्वतोमस्तकादिमान्॥ तत्सद्भावे प्रमाणमाह
॥।सहस्रशीर्षेसेवो विश्वतश्चक्षुरित्यपि॥ नमित्याह॥२ निरूपां विश्वरूपस्य
चिंतका॥१२॥ इतैवाक्यमिति शेषः॥ विश्वरूपस्यचिंतकाः विराडुपासकाः॥॥
अत्रापि दोषदृष्ट्यामतांतरमालंब्यतद्दूसाह॥ सर्वतः पाणिपादश्चेत्क्रिम्यादेरु
पेयशांता॥ ततश्चतुर्मुखोदेवदेवशोनेतरः पुमान्॥१४॥ एवंकेरूप्यतद्दूसतआ
हा॥ पुत्रार्थतमुपासिनाएवमाहुप्रजापतिः॥ प्रजाअसृजतेत्यादिश्रुतिश्चोदाह
रं [illegible]॥१५॥ लोपतिःप्रजाअसृतेत्यादिवाक्यं तत्रप्रमाणमित्याह॥ रित्याह प्रजापतिरिति
भागवतमतमाह॥ ॥विष्णोर्नाभिसमुद्भूतो वेधाकमलजस्ततः॥ विष्णुरेवेदृश्याह
लोकेभागवताजनाः॥१६॥ शैवागमानां मतमाह॥ ॥शिवस्यपादावन्वेष्टुं शार्ङ्ग्यशक्तस्ततो
तःशिवः॥ इशोनविष्णुरित्याहुःशैवाआगममानी[illegible]॥ गाणापत्यमतमाह॥ पुर
त्रयं साद्यचितुं विघ्नेशोसोप्यपूजयत्॥ ॥विनायकंप्राहुरीशं गाणापत्यमते रताः॥१८॥
॥ तं न्यायमन्यत्राप्यतिदिशति॥ एवमन्येस्वस्वपक्षाभिमानेनान्यथान्यथा॥ मंत्रार्थवाद
कल्पादीनाश्रित्यप्रतिपेदिरे॥ अन्त्यान्तेरवमेलाराद्युपासकाः॥ अन्यथान्यथावर्णनेका
रणमाह॥ स्वस्वपक्षाभिमानेनेति॥ तत्रप्रमाणानि[illegible]संतीतिदर्शयति॥ मंत्रेति॥
एवंकीर्तिमतानीत्याशंक्याशंख्यानीत्याह॥ ॥अंतर्यामिणमारभ्य स्थावरांतेशवादिनः

स

तत्र

प्रथम

१४

श्री

या शा

संशयश्चयार्के वंशादेऊलदेवचदर्शीनात्॥१२०॥ स्थावरेत्यावादीनङ्गापिदृष्टचरद्वसारांक्यात्
॥अश्वश्चयार्केति॥ ॥नन्वेवमनन्ते दिकास्यापादेय च स्कन्धवाहेय चामिसाकांक्षयामाह॥ ॥
तत्त्वनिश्चयकामेन न्यायागमविचारिणां॥ एकैवप्रतिपत्तिस्यात्साप्यत्र स्फुटं = कु
त्यते॥ तत्त्वनिश्चयकामेन तत्त्वनिश्चय इच्छया॥ न्यायागमयोर्विचारणा निलानां गुरू
णांप्रतिपत्तिरेकैवस्यात्॥ साकीदृशीयतआह साप्यत्रेति॥ तामेवप्रतिपत्तिंदर्शयि
तुंतदनुकुलांश्रुतीं पठति॥ ॥ मायांतु प्रकृतिं विद्यान्मायिनंतु महेश्वरं॥ अस्यावयव
भूतैस्तु व्याप्तं सर्वमिदं जगत्॥१२१॥ मायामेवप्रकृतिं जगदुपादानकारणं विद्याज्जा
नीयात्॥ मायिनंतु मायोपाधिकमंतर्यामिणमेवमहेश्वरं मायाधिष्ठातारं निमित्तकार
णं जानीयात्॥ अस्यमायाविनोमहेश्वरस्यावयवभूतैरंशरूपैश्वराश्वरावणैः॥
जीवैः कृत्स्नमिदं जगद्व्याप्तमिति॥ अस्याः श्रुतेरेवमर्थः॥ एतत् श्रुत्यनुसारेणाईश्वरविष
यनिर्णयास्तु केइत्याह॥ इति श्रुत्यनुसारेण न्यायोनिर्णयईश्वरे॥ ॥ ऊहायुक्तेइत्याशंक्य
सर्वाविरुद्धवादित्याह॥ =॥ तथासत्यविरोधस्यात् स्थावरांतेश्वरवादिनां॥ ॥ सर्वस्यापी
श्वरवाद्यभ्युपगमान्नकेनापिविरोधइतिभावः॥ ॥ननुजगच्चैतिन्नैयाः मायायाः किंरूपमि ना
त्यतआह॥ ॥मायाचेयंतमोरूपातापनीयेतदीरणात्॥ अनुभूतिंतत्रमानंप्रतिजज्ञे
श्रुतिःस्वयं॥ कुत्रेत्यतआहतापनीयइति। मायाचतमोरूपेति तापनीयोपनिषदितमोरू

स ३

पञ्चस्यानिर्वचनादिसर्थः।मायायास्तमोरूपत्वे किं प्रमाणमित्याकांक्षायांश्रुतिरेवात्रा
नुभवःप्रमाणमीलिप्रेत्य जानीतइत्याह॥ ॥अनुभूतिमिति॥ ॥तत्रमायायास्तमो
रूपत्वेकोसाक्षेवेत्येवेत्याकांक्षायांतदेतज्जडंमोहात्मकमितिश्रुतिरेवानुभवंस्प
ष्टयतीत्याह॥ ॥जडंमोहात्मकंतच्चेत्यनुभावयतिश्रुतिः॥ ॥अनन्तमिति सर्व
जनानुभवसिद्धत्वमुच्यतइत्याह॥ ॥आबालगोपंस्पष्टत्वादानंत्यंतस्यसाधितम्॥
जडशब्दस्यार्थमाह॥ ॥अचित्त्वात्तस्यघटादीनांयत्स्वरूपंजडंहितत्॥ ॥मोहशब्दा
र्थमाह॥ ॥यत्रकुण्ठीभवेद्बुद्धिःसमोहइतिलौकिकाः॥ ॥उक्तप्रकारेण सर्वानुभ
वसिद्धत्वे लक्षणमानसंसिद्धमित्याह॥ ॥इत्थंलौकिकदृष्ट्यैतत्सर्वैरप्यनुभूयते॥
एतज्जाड्यमोहलक्षणतमोरूपत्वेनत्वेवंमायायाःसर्वानुभवसिद्धत्वेयदा।देवःश्रु
नेनानिर्वचनीयत्वंस्यादित्याशंक्याह॥ ॥युक्तिदृष्ट्यात्वनिर्वाच्यंनासदासीदितिश्रुतेः॥
तन्नाव्याचष्टे सर्थस्तु शब्दः।अनिर्वाच्यासच्चेनासच्चेनसदसच्चेनवानिर्वक्तुमशक्यातत्र
किंप्रमाणमित्यत्राह।नासदासीदिति॥ ॥अस्याःश्रुतेरभिप्रायमाह॥ नासामि
दंर्शिवान्नोसदासीत्तु बाधनात्॥ विद्यादृष्ट्याश्रुतंतुच्छंतस्यनित्यनिवृत्तितः॥बा
धनात्॥ ॥नेहनानास्तिकिंचनेतिश्रुत्यानिषेधादिसर्थः।सदसद्रूपत्वेविरुद्धवा
दयुक्तमितिश्रुत्यासोविक्षितं।एवंयुक्तिदृष्ट्यानिर्वचनियत्वंप्रदर्श्यतुच्छमिति रूपमस्याति

बुद्धिर्विदितुं नैव न तस्यास्तत्त्वं दर्शयतीत्याह॥ ॥विद्याद्दृश्येति॥ तुच्छत्वे हेतुमाह त
स्येति॥ ॥उपपादितमर्थमुपसंहरति॥ ॥तुच्छा निर्वचनीया च वास्तवी चेत्यसौ त्रिधा
ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः॥ ॥श्रौतबोधेन तुच्छा कालत्रयेऽप्यसत्त्वा
त्। यौक्तिकबोधेन निर्वचनीया। लौकिकबोधेन वास्तवी॥ एवं त्रिविधा मायादृश्येत्यर्थः॥ ॥
अस्यास्सत्त्वमसत्त्वं च दर्शयतीति। तेनार्थमस्याः कृतमित्याह॥ ॥अस्यास्सत्त्वमसत्त्वं च ज
गतो दर्शयत्यसौ॥ ॥एकस्या एव मायायाः जगत्सत्त्वासत्त्वप्रदर्शने दृष्टांतमाह॥
प्रसारणाच्च संकोचाद्यथा चित्रपटस्तथा। स्वातंत्र्यास्वातंत्र्ये वेत्ति श्रुत्या मायायां स्वातं
त्र्यास्वातंत्र्ये दर्शिते तत्रोपपत्तिमाह॥ ॥अस्वतंत्रा हि माया स्यादप्रतीति
र्विना चितं॥ स्वतंत्रापि तथैव स्यादसंगस्यान्यथाकृतिः॥ ॥स्वचेतनासकलेन न्यवि
हाय प्रकाशात् तस्य स्वतंत्रा असंगस्यात्मनोऽन्यथाकरणात्॥ ॥स्वतंत्रत्वे सर्थः॥
अन्यथाकरणमेव स्पष्टयति॥ ॥कूटस्थासंगमात्मानं जगत्त्वेन करोति सा॥ ॥
जगदाभासेन करोतीति श्रुतं। जीवेश्वरविभागं च करोतीत्याह॥ ॥चिदाभा
सस्वरूपेण जीवेशावपि निर्ममे॥ ॥नन्वात्मनोऽन्यथाकरणे कूटस्थत्वहानिः स्यादित्या
शंक्याह॥ ॥कूटस्थमनुपद्रुत्य करोति जगदादिकं॥ ॥ननु कूटस्थत्वाविघातेन जग

दादिरूपत्वोपपादनं दुर्घटमित्याशंक्य मायायां दुर्घटैकविधायित्वेन दर्शनमाश्चर्य
कारणमित्याह ॥ ॥दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः॥ ॥अन्यथा माया
त्वमेव न स्यादिति भावः ॥ ॥मायाया दुर्घटकारित्वमुक्तं तदेव दृष्टान्तमाह ॥ ॥द्रवत्वमुद
कवद्वह्नेरौष्ण्यं काठिन्यमश्मनि ॥ मायायां दुर्घटत्वं च स्वतः सिध्यति नान्यतः ॥ ॥उद
कानां द्रवत्वादि यथा स्वाभाविकं न तद्वन्मायाया दुर्घटकारित्वमित्यर्थः ॥ ॥मायाया दुर्घट
कारित्वमाश्चर्यकारणं न भवतीत्युक्तमनुपपन्नं ॥ लोके मायायाश्चमत्कारहेतु
त्वदर्शनादित्याशंक्य मायाप्रयोक्ता स्वाकारपर्यन्तमेव तस्या आश्चर्यकारणत्वं नो
परिहारादित्याह ॥ ॥नैवेत्ति मायिनं लोके यावत्तावच्चमत्कृतिः॥ धुत्वे मनसि पश्चात्तु
मायैषेत्युपशाम्यति ॥ ॥किञ्च॥ जगत्सत्यत्ववादीनां नैयायिकादिभिः सर्वविधानि चोद्या
निकर्तव्यानि ॥ मायावादिनं प्रत्याह ॥ प्रसरन्ति हि चोद्यानि जगद्वस्तुत्ववादिषु ॥ न
चोदनीयं मायायां तस्याश्चोद्यैकरूपतः ॥ ॥मायावादिनं प्रति चोद्यकरणमिति प्रसङ्ग
माह ॥ ॥चोद्येऽपि यदि चोद्यं स्याच्चोद्ये चोदितं मया ॥ तत्र हि किं कर्तव्यमित्याशंक्या
ह ॥ ॥परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतां ॥ ॥उक्तमेवार्थं प्रपंचयति ॥ ॥विस्म
यैकशरीराया मायायाश्चोद्यरूपतः ॥ अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः ॥

पं

मायात्वं निश्चेतव्यमित्युपरि तस्यान्वेषणमुचितं स एव नेदानीं सिद्ध इति शंकते ॥ ॥
मायात्वमेव निश्चेयमिति चेत् तर्हि निश्चिनु । लोकप्रसिद्धमायाया लक्षणं यदिदं
मिति ॥ ॥ मायालक्षणसद्भावान्मायात्वं निश्चीयतामिति परिहारायेणाह ॥ ॥न
हीति । किं लक्षणमित्यत आह ॥ ॥लोकप्रसिद्धेति । तस्या अपि । किं लक्षणमित्यत आ
ह ॥ न निरूपइतुं शक्या विस्पष्टं भासते च या ॥ सा मायेतीन्द्रजालादौ लोकाः संप्रतिपे
दिरे ॥ ॥दृष्टान्ते सिद्धं लक्षणं दार्ष्टान्तिके योजयति ॥ तद्दर्शोपपत्ति ॥ ॥न निरूपइतुमारब्धे
निखिलैरपि पंडितैः ॥ अज्ञानं पुरतस्तेषां भाति कक्षासु कासुचित् ॥ ॥स्पष्टं भाति
जगच्चेदमशक्यं तन्निरूपणं ॥ मायामयं जगत्तस्मादीक्षस्वापक्षपाततः ॥ ॥ज
गतोऽशक्यनिरूपणत्वं कथमित्याशंक्याशक्यनिरूपणत्वमेवोदाहरणेन स्पष्टय
ति ॥ ॥देहेन्द्रियादयो भावा वीर्येणोत्पादिताः कथं ॥ कथं वा तत्र चैतन्यमित्युक्ते
ते किमुत्तरं ॥ ॥स्वभाववादी शंकते ॥ वीर्यस्यैष स्वभावश्चेत्कथं तद्विदितं त्वया ॥
अन्वयव्यतिरेकौ यौ भग्नौ तौ वन्ध्यवीर्यतः ॥ सिद्धान्ती पृच्छति कथं तदिति ॥ ॥अन्व
यव्यतिरेकाभ्यां जानामीत्याशंक्य व्याप्तिभावान्मैवमित्याह ॥ ॥अन्वयेति ॥ ॥
एवं पुनः पुनः पृष्टे सति किमपि न जानामीत्येवोत्तरं देयमिति फलितमाह ॥ ॥न जा
नामि किमप्येतदित्यन्ते शरणं तव ॥ अत एव महान्तोऽस्य प्रवदन्तीन्द्रजालतां ॥ ॥उक्तार्थ

र्वचनीयत्वेवृद्धसंमतीदर्शयति॥ ॥एतस्मात्किमिवेंद्रजालमपरंयद्गर्भवासस्थितं
रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानांकुरं॥ पर्यायेण शिशुत्वयौवनजरावेषैरनके
र्वृतं प[illegible]सत्तिशृणोति जिघ्रति तथा गच्छत्यथागच्छति॥ ॥नकेवलंदेहस्यैकस्य
वदुर्निरूप्यत्वं किंतु वटवृक्षादेरपीत्याह॥ ॥देहवद्वटधानादौ सुविचार्य विलोक्य
तां॥ क्वधाना कुत्र वा वृक्षास्तस्मान्मायेति निश्चिनु॥ ॥नन्वस्मोन्निवृत्तिर्नि महाकप
र्वेष्यकदयनादिभिराचार्यैर्निरुच्य तद्वयाशंक्याह॥ ॥निरुक्तावभिमानं ये दधते ता
र्किकादयः॥८॥ हर्षमिश्रादिभिस्ते तु खंडनादौ सुशिक्षिताः॥ ॥उक्तार्थे संप्रदायिका
नां वाक्यं संपादयति॥ ॥अचिंत्या खलु ये भावा [illegible]तांस्तर्केषु योजयेत्॥ अचिंत्यरच[illegible]
रूपं मनसापि जगत्खलु॥ ॥नवचैवं जगतोऽवचनीयत्वं मायायां किमायातमित्यत आ
ह॥ ॥अचिंत्य[illegible]रचनाशक्तिबीजं मायेति निश्चिनु॥ ॥अचिंत्यरचनाशक्तिर्यद्बीजंक
रणं सैव मायेत्यर्थः॥ ॥नन्वेवंविधं कारणं क्व दृष्ट = मित्यत आह॥ ॥मायाबीजं त
दे[illegible]कं सुषुप्तावनुभूयते॥ कथं तस्या जगद्बीजत्वमित्यत आह॥ ॥जाग्रत्स्वप्नजगत्तत्र ली
नं बीज इव स्थितम्॥ ॥ततः किमित्यत आह॥ तस्मादशेषजगतो वासनास्तत्र संस्थिताः॥
यतो जगद्बीजकारणं मायाख्यं तोऽ[illegible]जगद्वासनानि च मायायां तिष्ठंतीत्यर्थः॥ ॥तत्रापि कि
तत्राह॥ ॥या बुद्धिवासनास्तासु चैतन्यं प्रतिबिंबति॥ ॥ननु तासु प्रतिबिंबोस्ती[illegible]
स्रा

चेन्नु। कुतो नानुमीयत इत्याशंक्य स्पष्टत्वादित्याह॥ ॥मेघाकाशोदकस्पष्टश्चिरं॥
नासौ नुमीयतां॥ ॥तर्हि तेनैव कुतो सिद्धिरित्यत आह॥ ॥घनुमीयतामिति॥ ॥न तु मे-
घांशे स्पष्टस्य स्पष्टस्याकाशप्रतिबिंबस्यापि तज्जातीयस्य घटोदकस्य स्पष्टस्याकाशप्रतिबिंबवत् द
सद्भावान्मेघाकाशानुमानं घटते॥ इह तथाविधदृष्टान्ताभावात् कथमनुमानोदय इत्याशं-
क्याह॥ नापि तथाविधदृष्टांतसंपादनायाह॥ ॥सा नासमेवत्त दृष्टं धीतुपेया-
सो हर्तिव्यतो बुद्धौ चिदाभासो विस्पष्टं प्रतिभासते॥ ॥चिदाभासोऽसि ष्टं तदेवाह-
नं बुद्धिरूपेण परिणाममानं विस्पष्टश्चिदाभासवद्भवतीति भावः॥ एवं च येदनुभ्यान
मत्र स्फुरितं नवति॥ विमला बुद्धिवासनाश्चेत्प्रतिबिंबवद्योन विलंबाहेति बुद्धिवस्को
विच्छाय वा बुद्धिवृत्तिवदिति॥ ॥एवं जीवेश्वरयोर्मायिकत्वं श्रुत्युक्तमुपपादितमु-
पसंहरति॥ ॥मायाभासेन जीवेशौ करोतीति श्रुतत्वतः॥ ननु जीवे मायामायिकत्व
समानेक्रमवांतरभेदसिद्धिरित्याशंक्य स्पष्टास्पष्टोपाधिमत्त्वेन॥ मेघाकाशजलाका-
यो शाविव कौ सुव्यवस्थितौ॥ ॥ईशस्य मेघजलाकाशसाम्यं स्फुटीकरोति॥ ॥मेघ-
वद्वर्तते माया मेघस्थिततुषारवत्॥ धीवासनाश्चिदाभासस्तुषारस्थखवत्स्थितः॥
मायाप्रतिबिंबस्येश्वरत्वे किं प्रमाणमित्याशंक्य श्रुतिरेवेत्याह॥ ॥मायाधीनश्चिदाभा-
सः श्रुतो मायी महेश्वरः॥ ॥न केवलमीश्वरत्वमस्य श्रुतं॥ अपितु अंतर्यामी चादिकम-
त्सिद्धिरित्याह॥ मेघाकाशजलाकाशविवेको ४

पि धर्मजातं श्रुतमस्तीत्याह ॥ ॥अंतर्यामी च सर्वज्ञो जगद्योनिः स एव हि ॥ ॥ननु धीवास
नाप्रतिबिंबस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशंक्य तदुपपादिकां श्रुतिं दर्शयति ॥ ॥
सौषुप्तमानंदमयं प्रक्रम्यैवं श्रुतिर्जगौ । एष सर्वेश्वर इति सोयं वेदोक्त ईश्वरः ॥ ॥सुषु
प्तस्थाने एकीभूतः प्रज्ञानघन एव ह्यादिका श्रुतिर्धीवासनाप्रतिबिंबरूपस्यानंदमय
स्येश्वरत्वादिकं प्रतिपादयतीत्यर्थः ॥ ॥नन्वानंदमयस्य सर्वज्ञत्वादिकमनुभवविरुद्ध
मित्याशंक्याह । सर्वज्ञत्वादिके तस्य नैव विप्रतिपद्यतां ॥ ॥श्रुतार्थस्याविर्तक्यत्वान्मा
यायां सर्वसंभवात् ॥ ॥कुत इत्यत आह ॥ श्रुतेति ॥ इतोपि न विप्रतिपत्तिः कार्येत्या
ह मायायामिति । नन्वनुकूलयुक्त्यभावे श्रुतिरपि ग्रावप्लवनादिवाक्यवदर्थवादः स्या
दित्याशंक्य श्रुतिप्रामाण्यसिद्धये सर्वेश्वरत्वादिकमुपपादयति ॥ ॥अयं यत्सृजते वि
श्वं तदन्यथयितुं पुमान् ॥ न कोपि शक्तस्तेनायं सर्वेश्वर इतीरितः ॥ ॥अयमानंदमयो
यज्जाग्रदादि विश्वं सृजति तत्केनाप्यन्यथाकर्तुं शक्यते ॥ ॥अतोयं सर्वेश्वर इत्यर्थः ॥
इदानीं सर्वज्ञत्वमुपपादयति ॥ ॥अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः ॥ ताभिः
क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरितः ॥ ॥तत्र सौषुप्ते अज्ञाने कारणभूते कार्यभूतानां सर्व
प्राणिबुद्धीनां वासना निवसंति ताभिश्च वासनाभिः सर्वं जगत् क्रोडीकृतं विषयीकृतं तेन
सर्वबुद्धिवासनावद्ज्ञानोपाधिकत्वेन सर्वज्ञ इत्युच्यत इत्यर्थः ॥ ननु स्तेन सर्वज्ञोस्तु

दत्तदीप

तर्हि तत्कुतो नानुरूपतद्गुणत्रोक्यत उपाधीनां वासनानां परोक्षत्वान्नानुमेयत्व[illegible] ॥ ॥
वासनानां परोक्षत्वात्सर्वज्ञत्वं सहिष्यते ॥ ॥कथं तर्हि तदवगमद्रसारोंत्याह ॥ ॥सर्वबुद्धि
[illegible]दासनाख्यनुमीयतां ॥ ॥सर्वबुद्धिनिष्ठं सर्वज्ञत्वं स्वकारणाद्भूतवासनागतस
र्वज्ञत्वपुरस्सरं भवितुमर्हति ॥ ॥कार्यनिष्ठधर्मविशेषवाच्य[illegible]पवदित्यर्थः ॥ ॥स
र्वज्ञत्वमुपपाद्य एषोंतर्यामीति श्रुत्युक्तमंतर्यामित्वमुपपादयति ॥ ॥विज्ञानमय[illegible]
षु कोशेषु [illegible] यैव हि । अंतस्तिष्ठन्यमयति तेनांतर्यामीति तावज्जेत ॥ ॥अन्यत्रपृथि
व्यादेच तिष्ठन्यमयति । यतस्तेनेत्यन्वयः ॥ ॥अस्मिन्नर्थेंतर्यामीब्राह्मणं [illegible]प्रमाण
मिति दर्शयितुं तदेकदेशमुक्तं यो विज्ञाने तिष्ठन्नित्यादि वाक्यमर्थतोनुक्रामति ॥ ॥बुद्धे
ति एनां तरो यस्या धियानि रूपश्च धिः च पुः । धियमंतर्यमयति सिद्धवेदेन प्रोषितं ॥ ॥इदा
नीमंतर्यामि ब्राह्मणस्य प्रतिपर्यायं व्याख्यानेन ग्रंथबाहुल्यभयात् व्याख्यानस्य सर्व
पर्यायसंचारित्वं सिद्धये ॥ ॥यस्सर्वेषु भूतेषु तिष्ठन्निति पर्यायं व्याचष्टे ॥ ॥यस्सर्वेषु भूते
षु तिष्ठन्नित्यस्यार्थे सदृष्टांतमाह ॥ ॥तंतुः पटे स्थितो यद्वदुपादानतया तथा । सर्वोपादा
नरूपत्वात्सर्वत्रायमवस्थितः ॥ ॥ननूपादानतया सर्वत्रायमवस्थितश्चेत्किमिति सर्वत्र
नोपलभ्यत इत्याशंक्य सर्वांतरतमत्वात्तस्येत्याह ॥ ॥यथाद्यं तरसांतु स्तोतार[illegible]
तरः ॥ ॥अंतरस्य विश्रांतियेश्वैः सावलंबीयतां ॥ ॥अत्रेदमनुमानं । वांतरवतार तम्यं

न्यत्र

दि त्रि

द्या निदिध्यासितं। तारतम्यात्सा चादरणुचतारतम्यवदिति॥ ॥मन्त्यांतरत्वेपि पृथ्व्यादि वर्यंतर्यामिणो दर्शनं किं न स्यादित्याशंक्य तेषामिव बाह्यत्वानावान्नत्वस्य तद्दर्शनप्रायमाह॥ ॥मूर्त्तांतरवत्कथायां दर्शनिष्यमांतरः। नवीक्ष्यते ततोस्युक्ति श्रुतिभ्यामेव निर्णयः॥ ॥कुतस्तर्हि तत्निर्णय इत्यत आह॥ ॥ततोयुक्तीति॥ अन्वेतत्स्यात्तेनाधिष्ठानमंतरेण प्रवृत्त्यनुपपत्तिर्युक्तिः। श्रुतीस्तेदाहृतेव। यस्य सर्वाणि भूतानि शरीरमिति। अस्यार्थमाह। पटरूपेण संस्थानात्पटस्तोतोर्वपुर्यथा। सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा॥ ॥पटरूपेणावस्थितस्य तंतोः पटशरीरं यथा एवं सर्वरूपेणावस्थितस्य सर्वं शरीरमिति सर्वं। यस्य सर्वाणि भूतानि तत्तरो यमयतीति वाक्यस्य तात्पर्यं सदृष्टांतमाह श्लोकद्वयेन। तंतोः संकोचविस्तारचलनादौ पटस्तथा। अवश्यमेव भवति नस्वातंत्र्यं पटे मनाक्॥ तथांतर्याम्ययं यत्र यया वासनया यथा। विक्रियेत तथावश्यं भवत्येव न संशयः॥ ॥तंतुसंकोचादिना पटसंकोचादि यथा भवति। एवं पृथिव्याद्युपादानत्वेनावस्थितोंतर्यामी यया वासनया यथा यथा घटादिकार्यरूपेण विक्रियते तत्तत्कार्यजातस्य तथा तथा भवतीति भावः। एवमंतर्यामीप्रतिपादिकां श्रुतिमुपन्यस्य स्मृतिमप्युपन्यस्यति॥ ॥ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया॥ ॥सर्वभूतानामिति पदस्यार्थमाह॥ ॥सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः। तदुपादानभूतेशस्तत्र विक्रियते खलु॥ ॥तत्र हृदयपुंडरीके स्थितः॥ ॥ननु तेषां कुतो हृदयवस्थानमित्या

स्व

काद्यंतर्यामी यो विज्ञानमयाकारस्य परिणामार्थं दर्शयाह। तदुपादानेनेति॥ ॥यंत्रे रूढानीस
त्रे यंत्रारोढ शब्दयोरर्थमाह॥ ॥देहादिपंजरं यंत्रं तदारोहाभिमानिना॥ ॥भ्रामयंनि
ति पदे प्रकृस्यार्थमाह॥ ॥विहितप्रतिषिद्धेषु प्रवृत्तिभ्रमणं भवत्॥ ॥इदानीं तीयु प्रसङ्
मायया। पदयोरर्थमाह॥ ॥विज्ञानमयरूपेण तत्प्रवृत्तिरूपतः। स्वशक्त्यैशो विनि य
मि मायया भ्रमणं हि तत्॥ श्रौतस्यायमयतीति पदस्याप्ययमेवार्थ इत्याह॥ ॥अंतर्यमय
तीत्युक्तो यमेवार्थः श्रुतौ श्रुतः॥ ॥तत्र व्याख्यानेपर्यायांतरे सूचितिदर्शयति॥ ॥पृथिव्या
दिषु सर्वत्र न्यायो यं योऽयं तां धिया॥ ॥प्रवृत्तिजातस्य सर्वेश्वराधीनत्वे वचनांतरमु
दाहरति॥ ॥जानामि धर्मं येनेमे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः। केनापि देवेन हृ
दि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि॥ ॥ननु प्रवृत्तिरीश्वराधीनत्वे पुरुषप्रय
त्नो व्यर्थः स्यादित्याशंक्य पुरुषप्रयत्नस्यापीश्वररूपता नैवमिति परिहरति॥ ॥नार्थः
पुरुषकारेणैवं मा शंकतां यतः। ईशः पुरुषकारस्य रूपेणापि विवर्तते॥ ॥अर्थः प्रयो
जनं पुरुषकारः पुरुषः प्रयत्नः। ननु पुरुषप्रयत्नस्यापीश्वररूपे चेयमयति भ्रामयती
ति प्रतिपादितमन्तर्यामीप्रेरणं वृथा स्यादित्याशंक्य तद्बोधेन स्यात्मासंगत्वज्ञानलक्षण
फलस्य सत्त्वान्नैवमिति परिहरति। ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्न निवार्यते। तथापीदृ
ग्बोधेन स्वात्मासंगत्वधीजनिः॥ ॥ईदृग्बोधेनेश्वरस्य पुरुषकारादिरूपत्वावबोध
ज्ञानेन प्रवृत्तिः। अंतर्यामीरूपेण प्रेरणाः॥ ॥आत्मनो संगत्वज्ञानेनापि किं प्रयोजन

प्रथम

मित्यत आह ॥ ताश्च ता मुक्तिरित्याह ॥ श्रुतयः स्मृतयस्तथा ॥ श्रुतिस्मृत्यादितस्यानति
लंघनीयत्वे स्मृतीं दर्शयति ॥ ॥ श्रुतिस्मृतिममैवाज्ञे इत्यपीश्वरभाषिते ॥ ॥ श्रुत्या
पीश्वरस्याज्ञेति हेतुं च मुक्तमित्याह ॥ ॥ आज्ञायामिति हेतुत्वं निषास्मादिति हि श्रुतं ॥ ॥
ईश्वरस्याज्ञेति हेतुत्वं किमर्थमुक्तमित्याशंक्य सर्वेश्वरस्यांतर्यामी ह्यतः पार्थ
क्य = सिद्धये इति मत्वा आह ॥ ॥ सर्वेश्वरत्वमेतस्यांतर्यामी ह्यतः पृथक् ॥ ॥ बहि
रंतश्चेश्वर एव नीयामक इत्यत्र श्रुतीद्वयमाह ॥ ॥ एतस्य वा अक्षरस्य प्रशासने इति
श्रुतिः ॥ ॥ अंतः प्रविष्टः शास्ता जनानामिति च श्रुतिः ॥ ॥ क्रमप्राप्तस्येषषये निरियस्या (?)
र्थमाह ॥ ॥ जगद्योनिर्न वेद्येषप्रभवाप्ययस्त्वमतः ॥ आविर्भावतिरोभावावुत्पत्तिप्र
लयौ मतौ ॥ ॥ प्रतिज्ञातार्थं प्रभवाप्ययौ हि भूतानामिति वाक्ये हेतुत्वेन योजयति । प्रभ
वाप्ययेति प्रभवाप्यययोरुत्पत्तिप्रलययोः कर्तृत्वाज्जगद्योनिरित्यर्थः । उत्पत्तिप्रलयशब्दयो
र्विवक्षितमर्थमाह ॥ आविर्भावेति । उत्पत्तिप्रलयौ आविर्भावतिरोभावौ मताविति यो
जना ॥ ॥ आविर्भावकारित्वं सर्वेषां तत्तु प्रपादयति ॥ ॥ आविर्भावयती स्यास्मिन्नि
लीनं सकलं जगत् ॥ प्राणिकर्मवशेन स्वपदेशे (?) यद्वत्प्रसारितः ॥ ॥ यथा संकुचितश्चि
त्रपटस्य स्वप्रसारणेन स्वनिष्ठानि चित्राण्याविर्भावयति । एवमीश्वरोपीत्यर्थः ॥ ॥
तस्यैव प्रलयकारित्वं दर्शयति ॥ ॥ पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत् । प्राणि

पा वशादि ३

२०

कूर्मः स्वस्यावयवान्नात्मसंकोचितपद्भ्यां यथा ॥ ॥ एवं स्वपदं संकुचितं चित्राणि यथा तिमिरा
वयनितादृदिसर्यः ॥ ॥ आविर्भावतिरोभावयोर्दृष्टान्तान्तराणि भावयन्ति ॥ रात्रौ च
उत्पलाद्याबुन्मिलननिमीलने ॥ बुद्धिं भावमनोराज्यद्रवस्य हि लयो विभो ॥ ॥ घस
॥ ॥ ननु ईश्वरस्य जगद्योनित्वे किं भारं भूतेन किं वा तदा कार्यपरिणामित्वेन साक्षात् ॥
आद्यौ तीयस्यारम्भकवायोगात न द्वितीयः ॥ ॥ निरवयवस्य परिणामित्वासंभवा
दित्यासांख्यविवर्तवादाश्रयीणां दोष इति परिहरति ॥ ॥ आविर्भावतिरोभावस
त्त्वेन हेतुनारंभपरिणामादौ चोद्यानां नात्र संभवः ॥ ननु एवमीश्वरः कथं चे
तनाचेतनजगदुपादानं भविष्यतीत्याशंक्योपाधिप्राधान्येनाचेतनोपादानं चित्प्राधा
न्येन चेतनोपादानं भविष्यतीत्याह ॥ ॥ अचेतनानां हेतुः स्यात् जाड्यांशेनेश्वरस्तथा
॥ चिदाभासांशतस्त्वेष जीवानां कारणं भवेत् ॥ ॥ ननु मायाविन ईश्वरस्य जगत्का
रणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचार्यैः परमात्मन एव तदभिधानादिति शंकते ॥ ॥
तत्र यान्यत्संभवो जीवित्वयानश्चिदात्मनां ॥ परं कारणतामेति भावनाज्ञानकर्मभिः ॥ इ
ति वार्तिककारेण जडचेतनहेतुता ॥ परमात्मन एवोक्ता नेश्वरस्येति चेन्मतं ॥ ॥ नमः प्र
धानतमोगुणप्रधानमायोपाधिकः ॥ क्षेत्राप्यंशरीनादिनां भावनाज्ञानकर्मभिः भाव

ध्याना

नासंस्कारः॥ज्ञानं देवदत्तादिकर्मकर्तृत्वाद्युपलक्षणं॥ते निमित्तभूते निमित्तार्थो॥चंपदार्थेऽ
वतत्पदार्थेप्यधिष्ठानस्य पर्युः अन्योन्याध्यासस्य विवक्षितत्वान्नैवमिति परिहरति॥
अन्योन्याध्यासमात्रपि जीवकूटस्थयोरिव॥ईश्वरब्रह्मणोः सिद्धं स्वचा कृतसुरेश्व
र॥नहि सुरेश्वराचार्यैरीश्वरब्रह्मणोरन्योन्याध्यासे सिद्धवत्सः सव्यवहृतमिति कु
तो भवगम्यत इत्याशंक्य श्रेयस्यर्थपंचीकरणवार्त्तिकवचनसाधितिदर्शयित्वं पठति नर्थतः प
ठति॥ ॥सत्यं ज्ञानमनन्तं यत्तद्ब्रह्म तस्मात्समुत्थिताः॥ख्वं वायुरग्निर्जलोर्वौ
षधयोन्नं देहा यति श्रुतिः॥नवचेवाश्रुतिः॥ ॥अनेयाकथमन्योन्याध्यासावगति
रित्यत्राह॥ ॥आवृतं नरीतस्य च ब्रह्मणोनास्ति हेतुता॥हेतोश्च सत्तान्या
न्योन्याध्यास इष्यते॥तत्र तस्यां श्रुतौ सत्यज्ञानादिलक्षणस्य निर्गुणस्य ब्रह्मणो ज
गत्कारणत्वं जगत्कारणस्य मायाविशिष्टचिदाभासस्य सत्यत्वेनापाततः प्रतीयमान
मन्योन्याध्यासमंतरेण घटतमिति भावः॥एवमन्योन्याध्यासमसिद्धमीश्वरब्रह्मणोरे[illegible]क
त्वं पूर्वंत्रोदाहृतघृष्टितपटदृष्टांतेन स्मारयानदर्शयति॥ ॥अन्योन्याध्यासरूपोसौ व
न्नालिप्तपटोयथा॥घट्टितेनैकतामेति तद्वद्भ्रांत्यैकतां गतः॥ ॥नाम्नैकत्वापत्तौ दृष्टांतं
मायाऽध्यासापातदर्शिनी सदाम्नतीतो पूर्वोक्ते मेवदृष्टांतांतरं दर्शयति॥ ॥मेघाकाश
महाकाशौ विविच्यते तन्नपामरैः॥तद्वद्ब्रह्मेशयोरैक्यं पश्यन्त्यापातदर्शिनः॥ ॥एकं पश्य

त्तिं न भेद इत्यर्थः। कुतस्तर्हि ब्रह्मेशयोर्भेदावगतिरित्यत आह॥ ॥उपक्रमादिभिर्लि-
ङ्गैस्तात्पर्यस्य विचारणात्। असंगं ब्रह्म मायावी सृजत्येष महेश्वरः॥ ॥उपक्रमोपसं-
हाराभ्यासापूर्वताफलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये इति॥ ॥उक्तैः ष-
ड्विधलिङ्गैः श्रुतितात्पर्यावधारणे सति ब्रह्मासंगं मायावी सृष्टेश्वरो गम्यत इति शेषः॥ ॥
श्रुतावुपक्रमोपसंहारैकरूप्यदर्शनेनोक्तं ब्रह्मणोऽसंगत्वं स्पष्टयति॥ ॥सत्यं ज्ञानमनन्तं
चेत्युपक्रम्योपसंहृतम्। यतो वाचो निवर्तन्त इत्यसंगत्वनिर्णयः॥ ॥अन्तोऽसंगत्वनिर्णयो भ-
वतीति शेषः। मायावित्वमीश्वरस्य सृष्टृत्वं च प्रतिपादिकां श्रुतिमर्थतो दर्शयति॥ ॥मायी
सृजति विश्वं यस्मिन्निरुद्धस्तत्र मायया चान्यस्तथा जीवस्तेनेश्वरः सृजेत्॥
न्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्ध इति श्रुतिः ईश्वरस्य सृष्टृत्वं जी-
वस्य तत्र जगति बद्धत्वं दर्शयतीत्यर्थः॥ एवमानन्दमयेश्वरस्य जगत्कारणत्वं प्रतिपाद्य त-
स्माज्जगदुत्पत्तिप्रकारमाह॥ ॥आनन्दमय ईशोऽयं बहु स्यामित्यवेक्षत। हिरण्यगर्भ-
रूपोऽभूत्सुप्तिः स्वप्नो भवेद्यथा॥ ईक्षितवान् हिरण्यगर्भरूपोऽभूदित्यन्वयः॥ तत्र दृष्टान्तमाह
सुप्तिरिति॥ तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादौ क्रमेण सृष्टिश्रवणादिदं सर्व-
मसृजतेति युगपत्सृष्टिश्रवणाच्च कस्य वादे यथैकस्य वा हेयत्वमित्याकांक्षायां श्रुतिद्वयस्य व्यवस्थि-
तत्वादुभयं ग्राह्यमित्याह॥ ॥क्रमेण युगपद्वैषा सृष्टिर्ज्ञेया यथाश्रुतिः। द्विविधश्रुती

श्री

सवाद्विविधस्वप्नदर्शनात्॥ ॥एवं जगत्सृष्टिर्द्विविधश्रुतिसद्भावात् क्रमेणायुगप
द्वा यथाश्रुति द्रष्टव्येति योजना॥ तत्रोपपत्तिर्द्विविधस्वप्नदर्शनादिति॥ ॥लोके क्रमयुक्त
स्याक्रमयुक्तस्य सूत्रात्मापदेनोक्तमिव जगत्सनुस्यूत आत्मास्वरूपं यस्य स सूत्रात्मा॥ स्य
स्वप्नदोषं जातस्य दर्शनादिति भावः॥ ॥हिरण्यगर्भस्वरूपं निरूपयति॥ ॥सू
त्रात्मा सूक्ष्मदेहाख्यसर्वजीवघनात्मकः॥ सर्वाहंमानधारी च क्रियाज्ञानादिशक्ति
मान्॥ ॥सूत्रात्मापदे सूत्रमिव जगदनुस्यूते आत्मास्वरूपं यस्य स सूत्रात्मा सूक्ष्मदेह
इत्याख्या यस्य स तथाविधः। सर्वजीवघनात्मकः। सर्वेषां जीवानां लिंगशरीरोपाधि
कानां घनात्मकः। समष्टिस्वरूपः। तत्र हेतुः सर्वाहंमानधारित्वादिति सर्वेषु व्यष्टिलि
गशरीरेषु अहंमानवत्त्वादिति भावः। इच्छाज्ञानक्रियाशक्तिमांश्च। हिरण्यगर्भावस्था
यां जगत्प्रतीतौ दृष्टांतमाह॥ ॥प्रत्यूषे वा प्रदोषे वा मग्नो मंदे तमसि वा॥ लोको भाति
यथा तद्वदस्पष्टं जगदीक्ष्यते॥ प्रत्यूषः उषःकालः। एवं लोकप्रसिद्धं दृष्टांतमभिधाय
यथार्थोवदिति पूर्वोक्तश्लोके अभिहितं लांछितपटदृष्टांत इति॥ ॥सर्वतो लांछितो मष्या
यथा स्यात् घट्टितः पटः॥ सूक्ष्माकारस्तथेशस्य वपुः सर्वत्र लांछितं॥ ॥यथा घट्टि
तः पटः मषिमयेः साकारविशेषैर्लांछितो भवति तथा मायिनः ईश्वरस्य वपुः अपसि स्थूल
त कार्यलिंगशरीरैर्लांछितमित्यर्थः॥ ॥पुष्ट्याद्रोहा यवे वा नवा दृष्टांतांतरमा

हः ॥ ॥सस्यं वा शोकोऽज्ञोऽथ वा सर्वं नो वृ, द्वितीयया ॥ कोमलं तद्ददवे पुपल्लवो जगद्द
उरः ॥ ॥एवं सूत्रात्म[illegible] विराडादीश्वरस्तस्यैवावस्थान्तरं पञ्चीकृतकार्योपाधि
कं विराजं दृष्टान्तत्रयेणा विशदयति ॥ आतपान्नात्लोको वा पटो वर्णैः पूरितः सस्यैर्वा
फलितं यद्वत्तद्वत्स्पष्टवपुर्विराट् ॥ सूर्योदयानंतरमातपप्रकाशितो लोक आतपान्नातल
..ः ॥ ॥तत्सद्भावे प्रमाणमाह ॥ विश्वरूपाध्याये षष्ठे न सूक्तेऽपि पुरुषे ॥ धात्रादिस्तंबपर्य
न्तानेतस्यावयवान्विदुः ॥ विश्वरूपाध्यायादौ कीदृग्रूपमुदीतमित्याकांक्षायां ब्रह्मादिस्तंब
पर्यन्तं जगत्तद्रूपमुदितमित्याह ॥ धात्रादीति ॥ एतावता प्रसक्तमीश्वरमायातमित्याकांक्षायां
कस्यां तर्ह्यश्वीप्रभृतिकुद्दालकादिपर्यन्तं वस्तुजातं प्रसक्तमीश्वरत्वेन पूज्यमित्याह ॥
ईशेत्यादिना ॥ ॥ईशसूत्रविराड्वेधाविष्णुरुद्रेन्द्रवह्नयः ॥ जलपाषाणमृत्काष्ठवा
स्याकुद्दालकादयः ॥ ॥ईश्वराः सर्व एवैते पूजिताः फलदायिनः ॥ तं यथा यथोपास
ते तदेव भवतीति श्रुतिः ॥ स्वत्वपूजायास्तत्सद्भावे प्रमाणमित्याह ॥ यथा यथोपासते तस्तं फल
मीयुस्तत्तथा ॥ ननु सर्वेषामीश्वरत्वे फलवैषम्यं कुत इत्याशंक्य पूज्यानामपि [illegible] ज्ञानानां पू
जानामपि नादिनां च साधिकादिभेदेन वैषम्यमित्याह ॥ ॥फलोत्कर्षापकर्षौ तु पूज्यपूजा
नुसारतः ॥ सा ॥ सात्त्विकफलसिद्धिरेवं भवतु मुक्तिः कुत्र [illegible] वासनाद्भवति ॥ यासांक्य ज्ञान
मुक्ति ॥ रेकेनैकेनापि न भवतीत्याह ॥ मुक्तिस्तु ब्रह्मतत्त्वज्ञानादेव न चान्यथा ॥ तत्र दृष्टांत
स्य

माह॥ स्वप्नबोधं विना नैव स्वस्वप्नो हीयते न्यथा॥ स्वजागरणांतरेण स्वनिद्राकल्पितं यथान
निवर्तते। तथाब्रह्मतत्त्वज्ञानमंतरेणातदज्ञानकल्पितसंसारो न निवर्तत इति भावः॥ ननु देहेंद्रि
वृत्तीलक्षणायां मुक्तिः स्वप्नदृष्टांतेन तत्त्वबोधसाध्यत्वाभिधानमनुपपन्नं निवर्त्यस्य द्वैतस्य
स्वप्नतुल्यत्वाभावादित्याशंक्य अन्यथाग्रहणरूपत्वेन स्वप्नतुल्यत्वमस्त्येव। त्रमसमेतत्सु
षुप्तं स्वप्नं मायामात्रमितिश्रुत्याभिहितत्वान्मैवमित्याह॥ ॥अद्वितीयब्रह्मतत्त्वे स्वप्नोऽयम
खिलं जगत्॥ ईशजीवादिरूपेण चेतनाचेतनात्मकं॥ ॥ईशजीवादिरूपेण वर्तमानं चेत
नाचेतनात्मकं यदखिलं जगदस्ति। अयमद्वितीयब्रह्मतत्त्वे स्वप्नं इति योजना॥ ॥नन्वीश
जीवयोर्ब्रह्मणा भिन्नयोः कथं जगदंतःपातित्वमित्याशंक्य तयोर्मायाकल्पितत्वेन जगदंतःपाति
त्वमित्याह॥ ॥आनंदमयविज्ञानमयावीश्वरजीवकौ। मायया कल्पितावेतौ ताभ्यां स
र्वं प्रकल्पितं॥ ॥ताभ्यां सर्वं प्रकल्पितमित्युक्तं। तत्र किं न किंयत्कल्पितमित्याकांक्षायामा
ह॥ ॥ईक्षणादिप्रवेशांता सृष्टिरीशेन कल्पिता॥ जाग्रदादिविमोक्षांतः संसारो जीव
कल्पितः॥ ॥ सईक्षत लोकान्नु सृजा इत्यादिके ये तया द्वारा प्रपद्यत इत्यंतया श्रुत्या प्रतिपा
दिता सृष्टिरीश्वरकर्तृका। तस्यैव स्वयं व सर्वं ईक्षादिकयैव मेव पुरुषं ब्रह्मततमपश्य
दिति तया प्रतिपादितसंसारो जीवकर्तृक इत्यर्थः॥ ननु ब्रह्मण एव मायामाथिकत्वे वादिनां जी
वेश्वरविषया विप्रतिपत्तिः कुत इत्याशंक्य श्रुतिसिद्धं ज्ञानशून्या वादिन इत्याह॥ ॥अद्वितीय
ब्रह्मतत्त्वमसंगं तन्न जानते। ईशिशोर्योर्निद्रिं कोपार्थे वक्लहं यथु॥ जीवेश्वरं विषया

त

प्र

॥ वादी विप्रपत रज्ञानमूलं चेतत्याति ... ते बोधनीयाद्रत्याशंक्य वृत्याश्रमचोन्नेसः ह
... वासदान व निशान ... मोदामहे वृंपां ... चामृषे वान्या न भ्रांतेति धिवृदामहे ॥ ॥
ईश्वरजीवेच भ्रांत्याविप्रपत्तिपंन्नान्वादिनो विन्नप्यदर्शयति । नृपार्चकादियोगां तोईश्वरन्नों
तिमाश्रितः । लोकायतादिसांख्यां ताजीवविभ्रांतिमाश्रिताः । कुतो भ्रांतचं ते षामित्यत आह ॥ अ
द्वितीयं ब्रह्म तत्वं न जानंति यदा तदा भ्रांतएवाखिलास्तेषां क मुक्तिः क्वेह वा सुखं । ततः किं तत्राह ।
तेषामिति । परिगृहीतपक्षप्रतिपादनैनिनिवेशेन । चित्तविभ्रांत्यसनावांके विकमपि सुखं तेषां इ नें
त्याहा क्वेह सुखमिति ॥ ॥ ननु तेषां ब्रह्मविद्याभावेपितदविद्याप्रयुक्ते समाधमनावाद्वयेतो
तत्तमनप्रयुक्तं सुखं केषांचित्स्यात् इत्याशंक्यत स्यप्रसुक्तानिरनादरणीयत्वं दर्शयन्नाह
तत्तमाधे ... वेष्वेते षां स्यादस्ति तेन किं । स्वप्ने स्वाराज्य ... भिक्षान्यान ... शाते खलु ॥ ...
वाद वयो ... हेतु ... तत्र मतिर्निर्वैनीयेप्रपसंहरति ॥ ॥ तस्मान्मुमुक्षुभिर्नैव म शं
तिर्जीवेशवादयोः । कार्या किंतु ब्रह्मतत्वं विचार्य्यं बुध्यतां च तत् ॥ ॥ तर्हि किं कर्तव्यमित्याशं
क्यश्रुतिविचारेण ब्रह्मबोध एव कर्तव्यं इत्याह ब्रह्मेति । ननु ब्रह्मतत्वनिश्चयाय तयोः स्वरूपं हे
यत्वेन ज्ञातव्यमित्याशंक्य तथाप्ये जीवेशवादयोरेव बुद्धिर्न परिसमापनीयेत्याह ॥ ॥ पूर्वपक्ष
तया तैरेव तत्व निर्णय हेतुतां ॥ प्राप्नुतोस्तनिमज्जस्व तयो नेतावशः । एतावतोपूर्वपक्षतया
तत्वनिर्णयहेतुत्वसंभवेन तयोर्जीवेशवादयोरवशः । विवेकज्ञानशून्यः सन्निमज्जस्वेतियोज न
ना । ननु सांख्ययोगशास्त्रोक्तयोर्जीवेश्वरयोः शुद्ध चिद्रूपत्वेन ... पादयतो न
तयोः पूर्वपक्षत्वमिति शंकते ॥ ॥ असंगश्चिद्विभुर्जीवः सांख्योक्तस्तादृगीश्वरः । योगोक्तस्त त

ता०४

त्वमोरर्थौ शुद्धौ तौ विविच्येते स्फुटम्॥ ॥सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वे पित
योर्वास्तवभेदस्य तैरंगीकारान्नायमस्मिन् सिद्धान्त इत्याह श्रृणु। न तत्त्वमोस्तत्त्वार्थौ अस्मत्सिद्धा
न्ततां गतौ। अद्वैतबोधनायैव साक्षिन्यपि चिद्दिष्यते॥ ॥तत्त्वंपदयोस्तत्त्वार्थौ अस्मत्सिद्धान्ते भेदेनो
मतामिति योजना। ननु कूटस्थब्रह्मशब्दौ यांशुद्धौ तत्त्वंपदार्थौ भवद्भिरपि भिन्नौ निरूपिताविति शंकां
व्याह॥ ॥अद्वैतबोधनायैवेति लोकप्रसिद्धभेदनिरसनद्वारा तदैक्यप्रतिपादनायैव तौ भेदेना
नुदितौ न तयोर्भेदः प्रतिपाद्यत इति भावः। तर्हि पदार्थशोधनं किमर्थमित्यत आह॥ ॥अनादिमा
यया भ्रान्तौ जीवेशौ सुविलक्षणौ। मन्यंते तद्व्युदासाय केवलं शोधनं तयोः॥ ॥अत्रमापाग्र
बद्धेन स्वाश्रय व्यामोहिकाव्यविद्या लक्ष्यते तया विपरितं ज्ञानं प्राप्तां कर्तृत्वादिमत्त्वां जीवस्य स
र्वज्ञत्वादिगुणयोगित्वं चेश्वरस्य पारमार्थिकं मन्यन्ते। अतस्तन्निवृत्त्यर्थं शुद्धमेव शोधनं क्रि
यत इत्यर्थः॥ ॥पदार्थशोधनप्रकारमेव विदर्शयिषुस्तदुपायत्वेन पूर्वोक्तं दृष्टान्तं स्मार
यति। अत एवात्र दृष्टान्तो योग्यः प्राक्सम्यगीरितः॥ घटाकाशमहाकाशौ जलाकाशाभ्रखे
म कः। हेतः पदार्थशोधनं कर्तव्यं मत एवेत्यर्थः। पदार्थशोधनप्रकारमाह। जलाभ्रोपा
धीने ते जलाकाशाभ्रखे तयोः। आधारौ तु घटाकाशमहाकाशौ सुनिर्मलौ। जलाकाशाभ्र
खे ते जलाभ्राद्युपाधिनत्वात् अपारमार्थिके तयोराधारभूतौ घटाकाशमहाकाशौ तु सुनिर्मलौ
जलाद्युपाधिनिरूपेक्षाकाशमात्ररूपावित्यर्थः॥ ॥दार्ष्टान्तिकमाह॥ ॥एवमानंदविज्ञा
नमयौ मायाधी... योर्वशौ। तदधिष्ठानकूटस्थब्रह्मणी तु सुनिर्मले॥ ॥ननु पदार्थ

२४

49

[illegible]

विशोधनकक्ष्योपयोगित्वेनापि सांख्ययोगमतद्वयमङ्गीकार्यमिति चेद सत्यमिदं तु यन्न
नेदन्तरेषामपि शास्त्राणां तत्तत्कक्ष्योपयोगित्वेनास्माभिरस्यापेया। वादिशाह॥ ॥एत
कक्ष्योपयोगेन सांख्ययोगमतोय दि। देहो नाम यकक्ष्या वादात्मतेनाप्येपयत्नं॥
कृतस्तर्हि सांख्ययोगयोर्वेदान्तविरो[illegible]त्वमिति या शङ्का जीवनेदजगत्सत्यत्वेश्वरताव स
त्यलक्षणे थीदयाह॥ ॥आत्मानेकेजगत्सत्य ईशोन्यदृतिचेत्रयं। सज्यतेते स्तदासां दे
रव्ययोगवेदान्तसंमतिः। ननु जीवस्यासंगत्वज्ञानादेव मुक्तिसिद्धौ किमर्द्धेतबोधनेन।
शंक्यादेतज्ज्ञानमन्तरेणासंगत्वादिकं न संज्ञायत इत्यभिसंधिं हृदि निधायोत्तरमाह॥
जीवोऽसंगत्वमात्रेणादृतार्थं इति चेत्तदा स्वकुचंदनादिनिसत्वमात्रेणापिदृतार्थता॥
॥ ॥अभिसंधिमाविष्करोति। यथास्रगादिनिसत्वेदुस्सं प्रादतथा मनः अ संगत्वं न सं
गं पुरेवापादयेत्तथा। नियछस्येतस्मीशोपि कोस्य मोक्षस्त्वथांसति॥ ॥फलितमाह॥
कोस्यति। संगनियमनयोरविवेककार्यत्वाद्विवेकज्ञानेनयाविवेकनिवृत्तौ अतः पुनस्संगा।
सुमति नियति शंकते। अविवेककृतस्संगो नियमश्चेति चेत्तदा। एवं सत्यपि सिद्धान्तापातेपरि
हरति॥ ॥बलादापतितो मायावादः स्सांख्यस्य दुर्मते। अयं भावः अविवेको नाम किं वि इति
वेकाभावः। किं वा तदन्यः। तुत त्वद्विरोधिना[illegible]श्च। आभावमात्रेस्य भावकार्यजनकत्व

योऽमात्ता न द्वितीयः विवेकादन्यस्य घटादेस्संगहेतुत्वादर्शनात् त्रितीये भूतस्य भाव
रूपाज्ञानत्वमेवेति मायावादप्रसंगस्तुति॥ ॥अद्वैतान्यपगमे बंधमोक्षव्यवस्थानुपप
त्तिरात्मभेदांगीकर्तव्य इति चोदयति॥ ॥बंधमोक्षव्यवस्थार्थमात्मनानात्वमिष्य
तां इति चेन्न यतो माया व्यवस्थापयितुं क्षमा॥ ॥एकस्याप्यात्मनो माययाबंधमोक्षौ नै
र्मैवमिति परिहरति न यत इति। मायायैकस्य व्यवस्थापयेदित्याशंक्य तस्या दुर्घटकारित्व
नार्थादित्याह॥ ॥दुर्घटं घटयामीति विरुद्धं किं न पश्यसि॥ ॥बंधस्यानिर्धेवे पिमो
क्षो वास्तवत्वपेतव्य इत्याशंक्य श्रुतिविरोधान्मैवमित्याह॥ ॥वास्तवौ बंधमोक्षौ तु श्रुति
र्न सहतेतरां॥ ॥न सहतेतरां नैव सहत इत्यर्थः। बंधं इव मोक्षं वास्तवं न सहत इति नाकः
॥मोक्षादर्वास्तवे प्रतिबोधिका श्रुतिं पठति॥ ॥न निरोधो न चोत्पत्तिर्न बद्धो न च सा
धकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ ॥निरोधो नाशः। उत्पत्तिर्देहसंबंधः।
सुखदुःखादिधर्मवान्। साधकः श्रवणाद्यनुष्ठिता। मुमुक्षुः साधनचतुष्टयसंपन्नः। मुक्तः निवृ
त्ताविद्यः। यिद्युतत्सर्वं वस्तुतो नास्तीत्यर्थः। एवं जीवेश्वरादिभेदस्य स्वरूपवैलक्षण्यपर्यस्या
भावान्मैवं इति परिहरति॥ ॥कूटस्थब्रह्मणोर्भेदो नाममात्राद्दृते न हि॥ ॥नाममात्रा
दृते यतीतोऽपि वस्तुतो भेदाभावे दृष्टांतं पूर्वोक्तं स्मारयति॥ ॥घटाकाशमहाकाशौ

पि

२५ मि पप व

त श्रुतौ प्राते

ति युज्यते न हि कश्चित् ॥ एवं नेदस्य मिथ्यात्वसमर्थनेन किं फलितमित्यत आह ॥ ॥ यद्द्व
द्वैतं श्रुतं सृष्टेः प्राक् तदेवाद्योपरि । मुक्तावपि वृथा माया भ्रामयत्यखिलाञ्जनान् ॥
सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमिति यदद्वितीयं ब्रह्मोपादितं । तदेव
कालत्रयेप्यबाधितत्वात् वास्तवं न त्विदं इति भावः । कुतस्ता हि सर्वे ... निदेशः क्रि
यत इत्यत आह । वृथा मायेति । तत्त्वज्ञानरहितत्वात् निनिवसंसारं वर्तीति भावः । ननु प्रप
ञ्चस्य मायामयत्वं चेद्यद्वर्णयन्ति ते संसरन्तो दृश्यन्ते अतः तत्त्वज्ञानेन किं प्रयोजनमि
त्याशंक्य तेप्येवं वदन्तीत्याह नेति । पित्राम्यं ते विद्ययात्र किं । न यथापूर्वमेते तेषामत्र भ्रान्तेरदर्श
नात् । कर्मवशात्तेषां च व्यवहारस्सुपिपूर्वं दृश्यते नि ... परिहरति
। नयथेति । ~~ज्ञानिनां भ्रान्ति~~ ज्ञानिनां भ्रान्त्यभावं दर्शयितुं अज्ञानिनां निश्चयं तावद्दर्श
यति । ऐहिकामुष्मिकः सर्वसंसारो मायास्त्ववस्तु तत्त्वतः । न भाति नास्ति वाद्वैतमित्यज्ञा
नि विनिश्चयः ॥ इह लोके भवः ऐहिकः । पुत्रमित्रकलत्रादिपोषणरूपः । अमुष्मिं
लोके भवः आमुष्मिकः । स्वर्गसुखाद्यनुभवरूपः । ततो विनिश्चयस्य तत्त्वेलक्षण्यं
दर्शयति । ज्ञानिनां विपरीतास्मान्निश्चयेस्माभ्यमीक्ष्यते ॥ ॥ अद्वैतं पारमार्थिकं
नास्ति च संसारस्तु व्यावहारिक इति निश्चय इत्यर्थः । ततः किमित्याशंक्य स्वस्य निश्चया

हि

त
व
पे
व

अद्वैतदीप शंकते अशेषं वोति ९ त्स्येतन्ने प्रथम

नुसारे णाफलं न वर्तीत्याह ॥ ॥ स्वस्वनिश्चयातो बद्धो मुक्तो हं वेत्ति मन्यते ॥ अद्वैत

नानुतीस्फ क्तिं शास्त्रे एवं नयानु नवतः। अतो न तं निश्चयद्रुतिशंकते ॥ ॥ नाद्वैत म

परोक्षं चेन्न चिद्रूपतानासनात् ॥ अशेषपानु नात्रं वस्तु द्वै तं किं नास्ते न खलु। २६

अन्तर्गयगोचरत्वम सिद्धमिति परीहरति। न चिद्रूपेति। घट स्फुरतीति। घटादि

भिन्नस्तत्स्फुरणात्मपूर्णतासनाचिरर्थः। ननु चिद्रूपस्यात्मनो पितत्कौ न प्रतीयत इ

तिसाकल्येन नानाविनोद्वैत विसमानं इत्याह। द्वैतं किमिति। एतच्चोद्यसाम्यमनिष्ट

यपरिहारसाम्यमाह। वाक्यमात्रेणापि नाशं तुदयोरपि समं खलु। वाक्यमात्रेणायकेदे

ज्ञानद्वयोर्द्वैताद्वैतयोरित्यर्थः। एतावता कथं परिहारसाम्यमित्याशंक्याह। द्वैतसिद्धिवे

दद्वैतसिद्धिस्त्वेतावता न किं तद्वत्पक्षपातावता एकदेशेन प्रतीतिसद्भावेन द्वैतसिद्धि

। वै द्वैतनिश्चयद्वाद्वैतसिद्धिर द्वैत निश्चयोपि न किं न नवर्तीति किं न वर्तीत्यर्थः। पूर्व

वादिप्रकारान्तरेणाद्वैतासिद्धिं शंकते। द्वैतेन हि मद्द्वैतं द्वैतज्ञानं कथं चिदं ॥ ॥ अ

द्वैतं द्वैतरहितं तयोः परस्परविरोधात्। तथासति द्वैतप्रतीतावद्वैतं न संभवतीत्यर्थः

॥ नत्वतर्हि द्वैतस्याप्यद्वैतविरोधित्वादद्वैतप्रतीतौ सत्यां न द्वैतस्यापि सिद्धिरिति चाद्यं

समानमित्याशंक्याह पूर्ववादी। चिद्रूपानंवविरोधित्वस्य द्वैतस्य तात्सत्त्वतो नो ॥ भवन्मते

चिद्रूपप्रतीतीरवाद्वैतप्रतीतिर्वाततस्या द्वैतविरोधित्वाभावान्नोत्तयोः साम्यमिति भावः

श्चैत

ति

प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभावान्न वास्तवाद्वैतमिति हीनमिति परिहरति सिद्धे
ती॥ एवं तर्हि शृणु द्वैतमसन्मायामयं यतः। तेन वास्तवमद्वैतं परिशेषाद्विभासते॥
प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगाच्छिष्यमाणे संप्रत्ययः परिशेषः। परिशेषप्रकारमे
व दर्शयति॥ ॥अचिंत्यरचनारूपं मायैव सकलं जगत् इति निश्चित्य वस्तुत्वं अद्वै
तं परिशेष्यताम्। न चिंत्या अचिंत्या। अचिंत्या रचनारूपं यस्यास्तत्तथा। तथाविधं सकलं ज
गन्मायैव मिथ्यैवेत्यनेन प्रकारेणानिर्वचनीयत्वमिथ्यात्वं द्वैतस्य निश्चित्य वास्तव
मद्वैतं परिशेष्यतामित्यर्थः॥ ॥नन्वेवमद्वैतं निश्चयेऽपि तत् पुनः पुनः द्वैतस्य सत्यत्वबु
द्धिर्वासनया जायते इत्याशंक्य तन्निवृत्तये पुनः पुनः मिथ्यात्वं विचारयेदित्याह॥ ॥पुनर्द्वैत
स्य वस्तुत्वं भाति चेत्त्वं तथा पुनः। परिशीलय को वात्र प्रयासस्तेन ते वद॥ ॥आवृत्ति
रसकृदुपदेशादिति चतुर्थाध्याये ध्यानेन श्रवणाद्यावर्तनस्य विहितत्वादिति भावः॥
कियंतं कालमिह विचारणीयमित्याशंक्य। न त्वापरोक्षविद्या सो विचारो यं समाप्य तद् नि
। विचारकालावधेरुक्तत्वान्नाद्वैतविचारेयं खेदोऽनयुक्तः किंतु द्वैतप्रतिभासस्य तद
त्याह॥ ॥कियंतं कालमिति चेत्खेदोऽयं द्वैते तद् ष्यताम्। अद्वैतेन तु युक्तोऽयं सर्वानर्थनिवार
णात्॥ नन्वेवमद्वैतात्मवाक्यपरोक्षज्ञानवत्यपि मयि क्षुत्पिपासाद्यनर्थस्य परिदर्शनम
न वादनर्थनिवारकत्वमात्मज्ञानस्यासिद्धमिति शंकते॥ ॥क्षुत्पिपासादयो द्वैतायथा

सविंसरचनायैमिथ्या न कार्थ्य दाप्यकुले

चित्रदीप

सा नी२ प्रथम

पुर्वमर्थिमिति चेत्॥ ॥किं मच्छब्दवाच्येऽहंकारे दृश्यं तेन तास्मच्छब्दोपलक्षिते चिदात्मनी
ति विकल्प्याद्यमंगीकरोति॥ ॥मच्छब्दवाच्येऽहंकारे दृश्यं तान्नेति को वदेत्॥ ॥न द्वि
तीयः स्पासंगवाद विषयीछिति बहिरेवदृश्यं वस्तु न स्तर्ष्यसनावेषि न्वासाबव्यस
क्तिस्यादित्याशंकते॥१७॥ चिद्रूपेपि प्रसज्येरं स्तादात्म्याध्यासतो यदि। नाध्यासं कुरु कि
तु त्वं विवेकं कुरु सर्वदा॥ ॥एवं तर्ह्यनर्थहेतोरध्यासस्य निवृत्तये सदा विवेक क्रि
यतामित्याह माध्यासमिति॥ ॥अनादिवासनावशात्पुनःपुनरध्यासागमनेन तन्निवृ
त्तये विवेकस्यावर्तनीयः। नोपायांतरमित्याह॥ झटिति ध्यासमायाति दृढवासनये
ति चेत्। आवर्तयेद्विवेकं च दृढं वासयितुं सदा॥ चिद्विसरचनावस्य घटुन्नते स्वसाद्दि
वि[illegible]कि॥ ॥न च चिद्विसरचनाबंधमिथ्यापदार्थलक्षणमुक्तं चिदात्मन्यतिव्याप्तिमित्या
शंकते मैन्ये॥ चिदप्यचिंसरचनायदिते ध्यास्तनोवयं। चिन्निसु विंसरस्या नांत्वमो नि
यत्वकारणात्॥ ॥प्रागावसुतन्वसस्य विंसरचनात्वंमिथ्यालक्षणमिति विवक्षुर
विंसरचनाच मात्मनोंगीकरोति नह्यास्मिति एवमंगीकारेब सिद्धांतमित्याशंकप
रिहरति नोवयमिति तत्र हेतुमाह। नित्यत्वकारणादिति। वयं चितिं तु विंसरचनो
नोन्नमतिईयोजना। चितेर्निसत्वं च ज्ञातइत्याशंक्य प्रागन्नावांतु भावादित्याह॥ ॥प्राग
भावोनानुभूतेश्चितेर्नित्यानत श्चितिः॥ ॥यतश्चितेः प्रागभावोनानुभूतः अतोनित्येति

न तु वियादेपादेतस्य मायामयत्वं युक्तमेव सिध्यति। नानुभवतइत्याशंका पविंसरचनाचलक्षण
मिथ्यात्वं तु स्वरूपास्य[illegible]कल्पमेवमिति पत्क्षिहरन्नि। चिंतवीदेतां[illegible]त्याद्युक्तिं तिनगच्छतां

२७

वि

कू

योजनाद्दमत्राद्वैतेश्चेन्न।। चितेः प्रागभावोऽस्तीति चेद् वद वक्तव्यादीक्ष्य छ्वयः चित्प्रा
गभावः किं चितानुभूयते। उतान्येन न चेन्नान्येन तस्य औपचैनानुभवितृत्वानुपप
त्तेः। चितानुभूयत इत्यपि पक्षे किं चिदंतरेण स्वेनैव वा नाद्यः अद्वैतवादेऽचिदंतरस्याभा
वात् तत्र चिविकारेपि त्रिस्त्रातियोगिकस्याभावस्य चिन्मुहपाभन्तरेणागृहितुमशक्यत्वात्
न स्यात्वेपि गृह्यमाणत्वे घटादिवदचित्वापत्तेर्नापि द्वितीयः स्वाभावस्य स्वेन गृहितुम
शक्यत्वादिति।। ।।ननु द्वैतस्य प्रमात्रादिभेदरूपत्वात्तदभावस्य स्वेनैवोत्पत्ति वि
तुमशक्यत्वादनुभवितृत्वे तदभावाश्च चैतन्यवदेव तस्यापि निःस्वावनिरयत्वापत्ति
रित्याशंक्यानुभवितृत्वं तदभावो सिद्ध्यतिति परिहरति।। नानु द्वैतप्रागभावस्य चैतन्ये
नानुभूयते जाग्रदादिद्वैताभावस्य सुषुप्तौ साक्षिणानुभूयत्वात्। तमस्सस्साक्षीस दे
साक्षी लिप्त इति भावः। एवं स प्रागभावयुते चे संसारे रचनाच स्यामिथ्यात्वस्य
लक्षणस्य सद्भावाद्वैत मिथ्यात्वं सिद्धमित्याह।। ।।प्रागभावयुतं द्वैतं रच्यते हि घटादिवत्
तथापि रचनाचित्संसारस्य मिथ्यात्वं नैन्द्रजालवत्।। ।।प्रागभावयुतमिति हेतुगर्भि
तविशेषणं प्रागभावयुत्त्वान्नुघटादिवद्रच्यते हि तथापि रच्यमानेऽपि द्वैते तस्य
द्वैतस्य रचनाश्रयचिंत्यात्तेर्रच्यमानेष्व चित्संसाररचनात्वेनेंद्रजालवदैंद्रजालिकप्रासा
सादादिवन्मिथ्येत्यर्थः। चितिस्तावत्स्वप्रकाशात्वेन नित्यापरोक्षावभासते चिद्यंति

नर

हे

वा
नु
स्प
तू
सु

चित्रदीप

स्पष्ट

रिक्तस्य मिथ्यात्वं तथैव चित्राद्युद्भूयतइति प्रदर्शितः। एवं च सद्वैतस्यापरोक्षत्वं ना
स्तीति वदतो व्याघातश्च स्यादित्याह॥ ॥चिन्मात्रसत्यं न ततोन्यस्य मिथ्यात्वं चानुभूय
ते। नाद्वैतमपरोक्षं चेदेतन्न व्याहतं कथं। चिदपेक्षात्वासनादि सन्निहित सुक्तिवद्धि यो
र्थश्च शब्दः। व्यद्वैतमपरोक्षं नैवैतत् कथं न व्याहतं इति योजना॥ ॥एवं वेदांतार्थज्ञा
नमामपि पुरुषाणां केषांचित्तत्र विश्वासः अतो न जायतइति पृच्छति॥ ॥ई हंशा चार्कि
संशुष्टे चित्तत्रईतीर्यतां। चार्वाकादेः प्रबुद्धस्याप्यात्मा देहः अतो वद॥ ॥सम्य
ग्विचारशून्यत्वादिति विवक्षुः प्रतिविंबितं ति चार्वाकादेः कुतो वरेति। आदि
शब्देन पामरादयो गृह्यंते। प्रबुद्धस्य ज्ञहापोह कुशलस्यैवं विचनेन शांकते। सं
म्यग्विचारोनास्त्यस्य धिदोषादिति चेत्तथा सामान्येन साधनेन तथा संकुरुष
शास्त्रार्थं न विचारंतं विशेषतः। धिदोषादि संतुष्टता शब्द एव शब्दार्थः। इदं चेतं
विचार्यतज्ज्ञान्यतत्त्वज्ञानफलं विचारयितुं तत्प्रतिपादिकां श्रुतीं पठति॥ ॥य
दा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः। इति श्रोतफलं हृदं विनिर्दिष्टमेवेतत्। अथ
मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुते इत्यस्य मंत्रस्यायमर्थः। अस्य मुमुक्षोः हृदि श्रिताः य
कामा तदात्माध्यासमूला इच्छादयः संति ते सर्वे यथीयस्मीन्काले प्रमुच्यंते तत्त्वदर्श
नेनाध्यासनिवृत्तौ निवर्तंते। अथ तदानीमेव मर्त्यः पूर्वं देहात्माध्यासेनम

२८

श्री

ण सिद्धान्तस्पृष्टेः अमृतः अध्यासाभावेन तद्रहितो भवति तत्र हेतुमाह । अत्र ब्रह्म सम
श्नुत इति । अत्रास्मिन्नेव देहे ब्रह्मसत्यादिलक्षणं समश्नुते सम्यगाप्नोतीत्यस्याप्य
र्थः ।। ।। श्रेयःप्रतिपादितं फलं कामनिवृत्त्यादिलक्षणं नानुभवसिद्धं किं तु शा
द्रमेवेति शंकते इति ...तमिति । समनन्तरश्रुतिवाक्यतात्पर्यालोचनेन यावदेह एवं सि
ध्यति सति प्रायेण परिहारमिति दृष्टमेवेदमिति । तस्य दृष्टत्वं स्पष्टीकरणाय तद्वाक्यमुपपा
दसनस्यार्थमाह ।। यथा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थय इति । कामाग्रंथिस्वरूपं व्या
ख्यातं वाक्यशेषतः ।। ।। अनेन वाक्येन कामप्रमोकस्य ग्रंथिभेदत्वेन व्याख्यातत्वा
त् ग्रन्थिभेदस्य चाहंकारचिदात्मनोस्तादात्म्याध्यासनिवृत्तिलक्षणस्यानुभवसि
द्धत्वात्प्रत्यक्षमिति भावः वाक्यशेषत इति अनेन वाक्येन सह अर्थः । ननु कामशब्देन इच्छा
भेदो वाच्यते अतः कथं तस्य ग्रंथित्वेन व्याख्यानमित्याशंक्याध्यासमूलस्यैवेच्छावि
शेषस्य कामशब्दवाच्यत्वं नेच्छामात्रस्येत्याह ।। अहंकारचिदात्मानावेकीकृत्याविवेकतः इ
दं मे स्यादिदं मे स्यादितीच्छा कामशब्दिता ।। ।। नन्वध्यासमूलस्यैव कामस्य साऽपवेस
नितनोऽन्यपेयस्यादिसाक्षी कथं बाधकत्वादत आह ।। ।। अप्रवचस्य चिदात्मा
नं पृथक् पश्यन् सहंकृतोऽहंकृतिकोटिवस्तुनि न बाधो ग्रन्थिभेदतः ।। ।। अहंकारचि
दात्मानमप्रवेश्य तादात्म्याध्यासेन नान्तर्भाव्येत्यर्थः ।। नन्वेवमध्यासाभावे कामानाम
नुदयप्रसंगस्य । दिसारांक्योरब्धकर्मवशात्तेषामनुवृत्तिः संभवतीत्याह ।। ।। यथि

नेदेव्यपि संसार्यव्यवहारः प्रारब्धदोषतः ।। ।।तत्र दृष्टांतमाह ।। बुध्यापि पापबाहुल्याद
संतोषो यथा न वा ।। अस्याभावे ब्रह्मंकारगतेच्छादेरबाधकं दृष्टांतद्वयप्रदर्शनेन विशा
दयति ।। ।।अहंकारगतेच्छाद्यैर्देहो व्याधिभिस्तथा ।। वृक्षादिजन्मनाशो वा चि
द्रूपात्मनि किं भवेत् ।। यथा देहगतव्याध्यादिभिरहंकारस्य हि वा बाधो नास्ति देहसं
बंधरहितत्वात् ।। यथा वा वृक्षादिगतैर्जन्मादिभिरेवमध्यासनिवृत्तावहंकारग
तेच्छादिभिरपि जीवः ।। ।।चिदात्मनोसंगस्यैव एकरूपत्वात् कामादि बाधो नास्ती
ति शंकते ।। ।।ग्रंथिभेदात्पुराप्येवमिति चेत्तन्न विस्मर ।। अयमेव ग्रंथिभेदस्त्वत
न्मतीनवान् ।। ।।एवंविधबोधस्यैव ग्रंथिभेदनाम्ना स्माभिरभिधेयमानत्वादिदं
धमस्मदनुकूलमित्याह ।। तन्नापि स्मरेति ।। ।।एवंविधज्ञाननाम्ना वेदव ग्रंथि
माह ।। ।।नैवं जानंति मूढाश्चेत्सोयं ग्रंथिर्न चापरः ।। ।।ननु ज्ञानिनोपीच्छाद्युपगम
ज्ञान्यज्ञानिनोः कुतो वैलक्षण्यमित्याशंक्य ग्रंथिभेदाभेदातिरेकेण न कुतोपीत्याह ।। ।।
ग्रंथितद्भेदमात्रेण वैषम्यं मूढबुद्धयोः ।। ।।कारणांतराभावमेव विशदयति ।। प्रवृत्तो वा
निवृत्तो वा देहेंद्रियमनोधियाः ।। न किंचिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः ।।।। उक्ता
र्थे दृष्टांतमाह ।। ।। भ्रांतश्रोत्रियो वेदपाठपाठकत्ताभिदा ।। नाहारादिस्ति भेदोस्य न्या
योत्र योज्यताम् ।। ।।ज्ञानिनो ग्रंथिशून्यत्वे गीतावाक्यं प्रमाणयति ।। न द्वेष्टि संप्रवृत्तानि न

निवृत्तानि कांक्षति ॥ उदासीनवदासीन इति ग्रंथिभिदो यतेः ॥ संप्रवृत्तानि प्रा-
प्तानि दुःखानि न द्वेष्टि निवृत्तानि सुखानि न कांक्षति किंतु उदासीनवद्वर्तत इत्यर्थः ।
ग्रंथिभिदा ग्रंथिभेदः । ननु इदं वाक्यमौदासीन्यविधिपरं न तु ग्रंथिभेदे प्रमाणमिति
शंकते ॥ ॥ औदासीन्यं विधेयं चेद् [illegible] इव्यर्थता तदा । न शक्तो व्यस्य देहाद्य
इति चेद्रोग एव सः ॥ ॥ विधिपरत्वे बद्धबद्धो व्यर्थः स्यादिति परिहरति । बद्धबद्ध इति । ज्ञानी-
देहादेरकार्यक्षमत्वादप्रवृत्तिः । ननु ग्रंथिभेदादिशास्त्रं कोपहसति । न शक्तादिति । न
वेत्तु को दोषस्तत्राह ॥ ॥ तत्त्वबोधं स्वयं साधिमन्यं ते ये महाधियः । तेषां प्रज्ञाति विश्वा-
स्त्वा दाकिं तेषां दुःशाकंवद ॥ ॥ किंतु शाकंबसाध्यमित्यर्थः । नन्वस्थाने परिहासोऽयं
ज्ञानिनां प्रवृत्तस्य नावस्य पुराण सिद्धत्वादिति शंकते ॥ ॥ भरतादिप्रवृत्तिपुराणोक्ते त्विं
तु दाश्रुतिमज्ञो नान श्रोदयसीति परिहरति ॥ ॥ जक्षन् क्रीडन् रतिं विंदन् निस
श्रोषीत्र किं स्मृतं ॥ ॥ जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा यस्तेभ्यो
नोपजनं स्मरन्निदं शरीरमिति कैर्तवाना श्रोष्यसीत्यर्थः ॥ जक्षन् भक्षयन् जक्ष जक्ष
सनयोरिति धातुः । क्रीडन् स्वेच्छया विहरन् रममाणः स्त्रियादिभिः नोपजनं स्मरन्
निदं शरीरमिति उपजनं जनानां समीपे वर्तमानं स्वशरीरं न स्मरन् नानुसंधानं
इत्यर्थः । श्लोके रतिं विंदन्नित्यनेन रममाण इति पदस्य व्याख्यानं ॥ ननु तर्हि पुरा

नौ

दे

स्थै

शृ

द

य॥ स्य कागन्तिरियात्रां कथपुराणमव्यो दासिन्य बोधनपरं न प्रवृत्तिं अत्रिप्रेस आह॥
न ह्याहारादिसंसक्त्य न्तरता दिरिक्ति तिः क्वचित् । कार्यपापापवर्तिं तु संगत्रिताउ
दासने॥ ॥संगो हिं कुत स्याद्ध्यतइ स तआह॥ ॥संगो हि बाध्यते लोके निःसंगस्तु
रवमश्नुते। तेन संगः परित्याज्यः सर्वदा सुखमिच्छता॥ ॥नेतु तर्हि मानससंगस्थैव त्या
ज्य चेत्वं तः संगशून्यानां बहिर्व्यवहार तामड्गवाचिकं जनैः कथं तु स्यात् इत्याशंक्याश्र
स्त्रतात्पर्यज्ञानशून्यत्वादित्याह॥ अज्ञात्वा शास्त्रहृदयं मूढो वक्ति न्यथान्यथा॥॥
अतो मूढव्यवहारो नात्र विचारणीय इत्याह। मूर्खाणां निर्णयः स्तामस्मामि तिङ्
तउच्यते॥ ॥तर्हि किमनुसंधेयमित्याकांक्षायां शास्त्रहृदयमित्याह। अस्मासिं द्र्
तिइति कोसा विस्सत आह। वैराग्यबोधोपरमा सहया स्तेपरस्परं प्रायशः सहाव
र्तिते वियुज्यंते क्वचित् क्वचित्। वैराग्यादीनां अन्योन्यपरिहारेणावस्थानादर्श
नादन्नेदाशंकायां तद्धेत्वादीनां भेदात् भेदोवगंतव्य इत्सत आह॥ ॥हेतुस्वरूप
कार्याणि भिन्नान्येषामसंकरः। यथावदवगंतव्यं शास्त्रार्थं प्रविविञ्चता। तत्र वै
राग्यस्य हेत्वादित्रयं दर्शयति॥ ॥दोषदृष्टिर्जिहासा च पुनर्भोगे ध्वदीनता।
आसाधारणहेत्वाद्या वैराग्यस्य त्रयोऽप्यमी॥ ॥इदानीं तु बोधस्य कारणादि

नि॰ द्वि॰

त्रयं दर्श्यते॥ ॥श्रवणादित्रयं तत्त्वज्ञानं तन्मिथ्याविवेचनं पुनर्ग्रंथेरनुदयो बो-
धस्ये तेत्र स्वेष्टता॥ ॥आदिशब्देन मननिदिध्यासने गृह्येते। आत्मा वा अरे द्रष्टव्यः श्रो-
तव्यो मंतव्यो निदिध्यासितव्य इत्यात्मदर्शनसाधनत्वेन श्रवणादि विधानाच्छ्रव-
णादर्शनहेतुत्वं। तद्वान्मिथ्याविवेचनं कुटस्थस्याहंकारादेश्च चेतदज्ञानं ग्रंथेर-
नुदयः। अन्योन्याध्यासानुवृत्तिः। उपरतस्तान्निदर्शयति। यमार्गादिनिरोध-
श्च व्यवहारस्य संक्षयस्फुटो वाद्यापरतेति यासंकरइरीतः॥ ॥आदिशब्दे-
न नियमादयो गृह्यंते धिनिरोधः। चित्तवृत्तिलक्षणयोगः॥ किमेतेषां प्राधान्यं तेने-
त्याशंक्याह॥ ॥तत्र बोधप्रधानस्यात्साक्षान्मोक्षप्रदत्वतः। बोधोपकारिपादे-
तो वैराग्योपरमावुभौ॥ ॥तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुते-
रर्थः। इतरयोस्तूपकारित्वं ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञाना-
र्थं स गुरुमेवाभिगच्छेत्। शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवा-
त्मानं पश्यतीति श्रुतिभ्यामवगम्यते। प्रायेण सह वर्तंते वियुज्यंते क्वचित्क्व-
चित्। इत्युक्तं तत्र कारणमाह॥ ॥त्रयाणामुक्तानां तपकाश्चेन्महतस्तपसः फलं। दु-
रितेन क्वचित्तत्किं चित्क्वचित्प्रतिबध्यते॥ ॥अनेकजन्मार्जितपुण्यपुंजापरि-
हं

पाकेत्रयाणां सहभावो भवति। अथान्यथा प्रतिबंधकपापानुसारेण पुरुषवि
शेषाणां कालविशेषेण कस्यचित्प्रतिबंधो भवतीति भावः। तत्र तत्वज्ञान प्रतिबंधे मोक्षो
नास्तीत्याह॥ वैराग्योपरती पूर्णे बोधस्तु प्रतिबध्यते॥ यस्य तस्य न मोक्षोस्ति
पुण्यलोकस्तपोबलात्॥ ॥तर्हि वैराग्यादिसंपादनं निष्फलं स्यादित्याशंक्य॥
प्राप्य पुण्यकृतान्लोकानुषित्वा शाश्वतीः समाः। शुचीनां श्रीमतां गेहे योगभ्र
ष्टोभिजायत इति। न बावद्वचनात्पुण्यलोकप्राप्तिर्भवतीत्याह पुण्यलोकस्तपो
बलादिति॥ ॥वैराग्योपरमौ स्तः प्रतिबंधे जीवन्मुक्तिसुखं न लभ्यत इत्याह॥ पू
र्णे बोधे तद्द्वयोर्द्वौ प्रतिबद्धौ यदा तदा। मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्य
ति॥ इदानीं वैराग्यादीनामवधिं दर्शयति॥ ब्रह्मलोकतृणीकारो वैराग्यस्या
वधिर्मतः। देहात्मवत्परात्मत्वदार्ढ्ये बोधः समाप्यते॥ ॥सुप्तिवद्विस्मृतिः
सीमा भवेदुपरतस्य हि॥ ॥अवांतरे तारतम्यं लोकवद्बुध्यानिश्चयमित्याह॥ ॥
दिशानया विनिश्चेयं तारतम्यमवांतरं॥ नन्वेवं बोधवतामपि रागादिनरकेन वैषम्ये
पलंभात् ज्ञानस्यापि मुक्तिहेतुत्वं न निश्चेतुं शक्यं तदित्याशंक्य रागादेर्व्याध्यादिव
दारब्धकर्मफलत्वान्मुक्तिप्रतिबंधकत्वं। सिद्धमतो न शास्त्रार्थेषु प्रतिपत्तिर्यामिस

३१

ख

ह॥ ॥प्रारब्धकर्मनानात्वाद्बुद्धीनामन्यथान्यथा॥ वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न
पंडितैः॥ किं तर्हि प्रतिपत्तव्यमित्यत आह॥ ॥स्वस्वकर्मानुसारेण वर्ततां ते यथायथं॥
अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः॥ ॥सर्वेषां ब्रह्माहमस्मीति ज्ञानमेका
कारं निरवद्यब्रह्मरूपेणावस्थानं च समानमिति भावः॥ ॥प्रकरणस्यास्य तात्पर्यं संक्षि
प्य दर्शयति॥ ॥जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितं॥ मायया तदुपेक्ष्यैव चैतन्यं प
रिशिष्यतां॥ ॥ग्रंथाभ्यासफलमाह॥ चित्रदीपमिमं नित्यं योनुसंदधते बुधः॥ पश्यन्न
पि जगच्चित्रं तेन मुह्यति न पूर्ववत्॥ ॥६॥ ॥इति श्रीपरमहंसपरिव्राजकाचार्यश्री
भारतीतीर्थविद्यारण्यमुनिवरपादशिष्येण रामकृष्णाख्यविदुषा विरचितं तात्पर्यबोधि
नीनामकं चित्रदीपव्याख्यानं समाप्तं॥ ॥६॥ ॥हरिः ॐ॥ श्रीलक्ष्मीनृसिंहाय नमः॥
॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥१॥
नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ क्रियते तृप्तिदीपस्य व्याख्यानं गुर्वनुग्रहात्॥२॥
तृप्तिदीपाख्यं प्रकरणमारभमाणः श्रीभारतीतीर्थगुरुस्तत्स्पष्टतिव्याख्यानरूपत्वेन व्या
ख्येयां श्रुतिमादौ पठति॥ ॥आत्मानं चेद्विजानीयादयमस्मीति पूरुषः॥ किमिच्छन्कस्य
कामाय शरीरमनुसंज्वरेदिति॥१॥ इदानीं चिकीर्षितं विचारं सफलं संदर्शयति॥

ज्व नी

ति

अस्याः श्रुतेरभिप्रायं सम्यगत्र विचार्यते॥ जीवन्मुक्तस्य या तृप्तिस्सा तेन विशदायते ॥२॥ अत्र तृप्तिदीपकाख्ये ग्रंथे अस्याः आत्मानं चेदित्यादिकायाः श्रुतेः अभिप्रायः तात्पर्यं सम्यग्विचार्यते तेनाभिप्रायविचारेण जीवन्मुक्तस्य श्रुतौ प्रसिद्धा या तृप्तिः सा विशदायते स्पष्टीभवति। पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना। आक्षेपस्य समाधानं व्याख्यानं पंचलक्षणमिति॥ व्याख्यानलक्षणस्योक्तत्वात् पूर्वपदस्यार्थमभिधाय तदुपोद्घातत्वेन सृष्टिं संक्षिप्य दर्शयति॥ मायाभासेन जीवेशौ करोतीति श्रुतत्वतः कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितम्॥ प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थमर्थान्तरवर्णनमुपोद्घातः। अत्र मायाशब्देन चिदानंदमयब्रह्मप्रतिबिंबसमन्विता सत्वरजस्तमोगुणात्मिका जगदुपादानभूता प्रकृतिरुच्यते। सा च सत्वगुणस्य शुद्ध्यविशुद्धिभ्यां द्विधा नियमाना क्रमेण मायाविद्येति भवति। तयोर्मायाविद्ययोः प्रतिबिंबितं चैतन्यमेवेश्वरो जीवश्चेत्युच्यते तदिदं प्रकृतत्वविवेकाख्ये ग्रंथे श्रीमद्विद्यारण्यगुरुभिर्निरूपितं। चिदानंदमयब्रह्मप्रतिबिंबसमन्विता। तमोरजःसत्वगुणा प्रकृतिर्द्विविधा च सा। सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते। मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः॥ अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा। सा कारणशरीरं स्यादिति इममेवार्थं मनसि निधाय जीवेशावाभासेन करोति। मायाचाविद्या च स्वयमेव भवतीति
ता

श्रुतिरपि प्रवृत्ता। अतो जीवेश्वरयोर्मायया कल्पितत्वं। अन्यत्र जगतोऽप्यात्मन्येव प्रकल्पितं। तत्र कर्त्र कियत्कल्पितमित्याह॥ ॥ईक्षणादि प्रवेशान्ता सृष्टिरीशेन कल्पिता। जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः॥४॥ तदैक्षत बहु स्यां प्रजायेयेति श्रुतमीक्षणमादिर्यस्याः सा ईक्षणादिः। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतः। प्रवेशोऽन्तो यस्याः सा प्रवेशान्ता ईक्षणादिश्चासौ प्रवेशान्ता चेति कर्मधारयः। सेयं सृष्टिरीश्वरेण कल्पिता। जाग्रदादिर्यस्य संसारस्य स जाग्रदादिः। विमोक्षो मुक्तिरन्तो यस्य स विमोक्षान्तः संसारो जीवेन कल्पितः। तदभिमानि वाक्यैव स्वेस्यर्थः। तेन जाग्रदादयः श्रूयन्ते। स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं। स्त्र्यन्नपानादिविचित्रभोगैः स एव जाग्रत्परितृप्तिमेति। स्वप्ने स जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके। सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति। पुनश्च जन्मान्तरकर्मयोगात्स एव जीवः स्वपिति प्रबुद्धः। पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रं॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते। तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते॥ ... तत्र शब्दार्थमात्मेयं योगी निःसृष्टिम[illegible] इदानीं [illegible] ... आत्मन्तु तात्मा कूटस्थोऽसंगचिद्वपुः। अन्योन्याध्यासतोऽसंगी धियस्थो जीवतां गतः ...

पि ८ ह

कूटस्थदीप

द्वितीय

३२

यः कूटस्थोऽसंगचिद्रूपः अविकार्यसंगचिद्रूपः अन्यमाधिष्ठानत्वेनात्मान्तर्मनस्य देहें
द्रियाद्यध्यासस्याधिष्ठानत्वेन अधिष्ठानत्वेन वर्तमानः परमात्मा स कूटस्थोऽसंगः व
अन्योन्याध्यासतः अन्योन्यस्मिन्नन्योन्यात्मकतमन्योन्यधर्मोऽध्यासस्तस्य सावार्यैः
निरूपितेन तादात्म्याध्यासेनासंगाधिष्ठानजीवस्य पारमार्थिकसंबंधाभावं अन्योन्यं
बुद्धौ वर्तमानो जीवस्तेन अत्रत्वस्यांशे तात्पुरुषशब्देनोच्यते॥ स वा अयं पुरुषः सर्वा
सु पूर्षु पुरिशय इति श्रुत्या पुरुषशब्दस्य व्युत्पादितत्वात् पुरुषस्य वचनपुरुषश
त्पुरुष एव पुरुषः। बुद्धौ बुध्यादिकल्पनाधिष्ठानं कूटस्थचैतन्यमेव बुद्धौ प्रतिबि
वेन प्राप्तं जीवत्वं वस्तुपुरुषशब्देनोच्यत इत्यभिप्रायः। नन्वत्र पुरुषशब्देन केवल
चिदाभासस्वरूपो जीववद्वाच्यतां किं नान्येन कूटस्थचैतन्येनाधिष्ठानत्वेन साभ्य
कर्तृत्वस्य मोक्षाद्य... नतूत्व सिद्ध्येत तदपि विवक्षितमित्यभिसाह॥ सोऽधिष्ठानो विमोक्षादौ
जीवोऽधिष्ठानयत्नेन तु केवलो निरधिष्ठानविभ्रान्तेः क्वाप्यसिद्धिनः॥ साधिष्ठानः अधिष्ठा
नेन कूटस्थचैतन्येन सहितो जीवः। विमोक्षादौ मोक्षस्वर्गादिसाधनानुष्ठाने यः कि
यते। अधिकारीति भवति न तु केवलश्चिदाभासः कुत इत्यत आह। निरधिष्ठानवि
भ्रान्तेः क्वाप्यसिद्धितः अधिष्ठानरहितस्यारोप्यस्य लोके अदृष्टत्वादिति नाव ॥
इदानीं साधिष्ठानस्यैतस्य संसारोऽन्वयितुं श्लोकद्वयेन विनष्टं दर्शयति॥

व ... रा

अधिष्ठानांशसंयुक्तं भ्रमांशमवलंबते। यदा तदा हं संसारीयवं जीवोभिमन्यते॥
भ्रमांशस्य तिरस्कारादधिष्ठानप्रधानता। यदा तदा चिदात्माहमसंगास्मीति
बुध्यते॥ ॥जीवो यदाधिष्ठानांशसंयुक्ते कूटस्थे भ्रमांशं [illegible] चि
दात्मा सोपि तं शरीरद्वयमवलंब्यते। स्वस्वरूपत्वेनाभिकरोति तदाहं संसारी से व
मत्वाभिमन्यते। यदा पुनः भ्रमांशरूपदेहद्वयसहितस्य चिदात्मासस्यातिरस्कारो
न मिथ्यात्वज्ञानेनोपकारणात् अधिष्ठानप्रधानताधिष्ठानभूतस्येव कूटस्थस्य
स्वरूपत्वं जीवेन स्वीक्रियते। तदा [illegible] हं चिदात्मा संगोस्मीति बुध्यते जानाति
॥ ॥नन्वधिष्ठानचैतन्यं जीवस्वरूपत्वं स्वीकारे चिदात्मा महमसंगोस्मीति बुध्य
त इति यदुक्तं तदुपपन्नं स्यात्। असंगविदूपस्य कूटस्थस्याहंप्रत्ययविषयत्वा
भावात् इति शंकते। नासंगे हं कृतिर्युक्ता कथमस्मीति चेदिति॥ ॥असंगचिदा
त्मन्यविषये अहंप्रत्ययो न युज्यते। यतः कथमस्मीति जीवेनोच्यते कथमपीत्यर्थः
मुख्याबुद्ध्या अहंप्रत्ययविषयेवाभावे [illegible] लक्षणया तदस्तीति [illegible] हं शब्दार्थ
ता वह्निर्न ज्यते। शृणु। ये को मुख्यो द्वौ [illegible] मुख्यो विसर्गार्थ स्त्रिविधोहमः॥ ॥अहम
अहंशब्दस्येत्यर्थः॥ ॥कीदृशो मुख्यार्थ इत्याकाङ्क्षायां तं दर्शयति॥ ॥अन्योन्या
ध्यस्तरूपेण कूटस्थाभासयोर्वपुः। एकीभूय भवेन्मुख्य इति॥ ॥कूटस्थाचि

ना
स्यै
नि

दाभासयोः स्वरूपमन्योन्याध्यासेनैकं प्राप्तमहंशब्दस्य वाच्यत्वेन मुख्यार्थो भवति
॥ अस्य कुतो मुख्यत्वमित्याशङ्क्याह ॥ तत्र मुख्यं प्रयुज्यत इति ॥ ॥ यत्तदुभयाधारः
॥ तत्र तस्मिन्नविविक्ते कूटस्थचिदाभासयोः स्वरूपे यतो विवेकज्ञानशून्यैः सर्वैरप्य
हंशब्दः प्रयुज्यते अतोऽस्य हि मुख्यत्वमित्यर्थः ॥ ॥ इदानीममुख्यार्थौ दर्शयति
॥ पृथगाभासकूटस्थाववमुख्यौ विदितौ ॥ ॥ आभासकूटस्थौ प्रत्येकमहंशब्दार्थ
त्वेन यदा विवक्षितौ तदा अमुख्यार्थौ भवतः ॥ ॥ अनयोरमुख्यत्वे कारणमाह ॥
तत्र तत्र विदुः ॥ पर्यायेण प्रयुङ्क्तेऽहंशब्दं लोके च वैदिके ॥ ॥ अत्रापि यत्तदुभयपरिहारः
तत्र विद्वांसः तत्र तयोः कूटस्थचिदाभासयोरहंशब्दं लोके च लौकिके वैदिके च व्यव
हारे पर्यायेण प्रयुङ्क्ते इति योजना ॥ अयं भावः ॥ चिदाभासकूटस्थयोरविविक्त
स्वरूपस्य सार्वजनीनव्यवहारविषयत्वान्मुख्यार्थत्वं विविक्तरूपस्य तु कतिपयज
नैकदाचिदेव व्यवह्रियमाणत्वादमुख्यार्थत्वमिति ॥ ॥ पर्यायेण प्रयुङ्क्त इत्युक्त
क्रमेवार्थं प्रपञ्चयति ॥ प्रतिपत्तिसौकर्यार्थं श्लोकद्वयेन ॥ ॥ लौकिके व्यवहारेऽहं गच्छामि
मित्यादिके बुधः ॥ विविच्यैव चिदाभासं कूटस्थात्तं विवक्षति ॥ अस‍ङ्गोऽहं चिदात्माहं
मिति शास्त्रीयदृष्टितः ॥ अहंशब्दं प्रयुङ्क्तेऽयं कूटस्थे केवले बुधः ॥ ॥ बुधो विद्वान
हं गच्छामीत्यादिके लौकिके व्यवहारे ॥ कूटस्थाद्विदाभासं विविच्य तमेवाहंशब्देनाभि

वे

बुध्य

वक्ष्यतीत्यहमित्युक्तिः ॥ ॥ अयमेव बुध्यर्थो [illegible] स्त्रीयइरितं वेदांतश्रवण । मननीतज्ञा
नेनकेवलं चिदाभासादिवितो कुटस्थोसंगोहं चिदाभासोहमिति लक्ष्यार्थोहं ज्ञातृप
युक्ते लक्षणयाहं शब्दार्थोभाहं प्रत्ययविषयत्वासंभवादसंगोहमस्मीति ज्ञानमुपप
द्यते इत्यभिप्रायः ॥ ननु प्रत्यगाभासकुटस्थावहं शब्दस्यामुख्यार्थावित्युक्तौ तयोर्मध्ये
कुटस्थः किमज्ञाननिवृत्तये असंगोस्मीति जानाति किंवा चिदाभासः ॥ नतावत्कुटस्थः त
स्यासंगचिद्रूपत्वेन ज्ञानित्वाज्ञानित्वयोरनुपपत्तेः अतश्चिदाभासस्य ज्ञानित्वं दृष्टव्यं वक्तव्यं
॥ तथा सति कुटस्थादन्यश्चिदाभासः अहं कुटस्थोस्मीति न ज्ञातुमर्हतीति शंकते ॥ ॥ ज्ञा
निताज्ञानित्वे चाभासस्यैव न त्वात्मनः ॥ तथा च कथमाभासः कुटस्थोस्मीति बुध्यतां ॥
तस्य कुटस्थादन्यत्वमेवासिद्धमिति परिहरति ॥ ॥ नायं दोषश्चिदाभासः कुटस्थैकस्वभाव
वान् ॥ तत्रोपपत्तिमाह ॥ ॥ आभासत्वस्य मिथ्यात्वात्कुटस्थत्वावशेषणात् ॥ यथा च
प्रतीयमानस्य मुखस्याभासस्य प्रतिबिम्बस्य मुखमेव तत्त्वं भवतीति भावः ॥ ननु चिदा
भासस्य मिथ्यात्वे तदाश्रितं कुटस्थोस्मीति ज्ञानमपि मिथ्या स्यादिति शंकते ॥ ॥ कुटस्थोस्मी
तिबोधोपि मिथ्या चेदिति ॥ ॥ कुटस्थस्वरूपातिरिक्तस्य [illegible] तस्यापि मिथ्यात्वाभ्युप
गमात् तन्मिथ्यात्वमस्माकमिष्टमेवेति परिहरति ॥ ॥ नेति कोवदेदिति ॥ ॥ उक्तमर्थं दृ
ष्टांतेन स्पष्टयति ॥ ॥ नहि सत्यतां याति रज्जुसर्पविसर्पणं ॥ रज्ज्वां कल्पितस्य सर्पस्य

र्प

स्वप्नि

गस्रादिकमपि प्रतीयमानं वास्तवं नांगीक्रियते यथा दत्तद्वदित्तिना वः॥ ॥ ज्ञाननिष्या
वत्तेन संसारनिवृत्तिः न स्यादि सा शंकया निवर्त्त्यस्य संसारस्यापि तथा भावं तं निवृत्तिरु
पपद्यते। स्वाप्नव्याघ्रदर्शनेन निद्राविनिवृत्तिवदित्यभिप्रायेणाह॥ ॥ तादृशो नापि बो
धेन संसारो विनिवर्तते॥ ॥ तत्र यादृशो वृक्षः स्तादृशो बलिरिति लौकिकगाथां संवादय
ति यद्वा लुसपो हि बलिरित्याह लौकिकाजना॥ ॥तपयादित मौलुपसंवरति॥ ॥
तस्माद् तास्य पुरुषः स कूटस्थो विविच्य तः। कूटस्थोऽस्मीति विज्ञातुमर्हतीश न्यथा तुष्टे ति
॥ ॥यस्मात्कूटस्थ एव चिदात्मा स्य निजं रूपं तस्मात्पुरुषशब्दवाच्यः। कूटस्थसहित श्चिदा
नासः। तं कूटस्थं मिथ्याभूतात्स्वस्माद्विविच्य लक्षणया कूटस्थोऽस्मीत्यवगंतुं शक्नोती
त्यर्थः प्रायेण श्रुतीरास्मीरूनोवतीत्यर्थः॥ ॥एवं पुरुषोऽस्मीति तद्वद्यप्रयोगाभिप्राय मस्मि
न्नायमयमिति पदप्रयोगाभिप्रायमाह॥ ॥ असंदिग्धाविपर्यस्तबोधो देहात्मनीक्षते॥
तद्वदत्रेति। निर्णेतुमयमित्यभिधीयतइति॥ ॥लौकिकानां प्रसिद्धे देहं तु देहात्मनि सं
शयविपर्ययरहितो यमस्मीति बोधो यद्वदुपलभ्यते। अत्र प्रसंगात् नो निषेधयेत तद्वत्तथा
विधं ज्ञानं मुक्तिसिद्धये संपाद्यमिति निर्णेतुमयमीत्याभिधीयते। श्रुतिरिति शेषः॥ ॥ सोव
बोधस्य मोक्षसाधनत्वे आचार्य वाक्यं संवादयति। देहात्मज्ञानवज्ज्ञानं देहात्म बाधकं
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यतइति॥ ॥अहं मनुष्य इति देहात्मादि गदृढं प्रत्ययो

न

यथायेवं प्रत्यगात्मन्येव देहात्मत्वज्ञानावबोधेन ब्रह्माहमस्मीति ज्ञाते [illegible] एवमाय
सविकृताने छन्नत्वमिमो स्वेच्छारहितोपि मुच्येतो संसारहेतोरज्ञानस्य [illegible] नेनत्वाद्धित
याविति नावगतायमिति पदप्रयोगस्याभिप्रायांतरं शंकते । अयमिति [illegible] नात्मयम
स्यातेत्योदिति ॥ ॥ यथार्थं घटइत्यादि प्रयोगेषु इदमानी [illegible] स्य वस्तु सर्वपरोक्ष
इदं तथायमस्मीति सत्रापीति नावः ॥ ॥ तदप्यस्माकमिति इममेव साह ॥ ॥ तदुत्य
तानिति । कुतइत्यत आह ॥ ॥ स्वयंप्रकाशत्वेनान्यमपरोक्षं सर्वदा तद्वा ॥ साधनां
तरनिरपेक्षतया वस्तासमाने चैतन्यं व्यवहारकाले [illegible] मपरोक्षमिति ज्ञातं
स्वरूपेन चादिहर्षः ॥ नन्वात्मनः स्वप्रकाशत्वेन परोक्षात्मस्वरूपगमेऽप्य
मीतिपदप्रयोगस्याभिप्रायांतरं वर्णनात् [illegible] कारघलादागत [illegible] ननः परोक्षाविव
स्तनेतु पूर्वोक्तज्ञानाज्ञानाश्रयविषयत्वं चानुपपन्नमित्याशंक्य दशमदृष्टव्यसर्वमपरोक्ष
तद्रसाह ॥ ॥ परोक्षमपरोक्षं च ज्ञानमज्ञानमित्यदः ॥ नित्यापरोक्षरूपेऽपि द्वयं स्याद्
शमे यथा । परोक्षमपरोक्षं च इत्येकं युगलं । ज्ञानमज्ञानमित्येवमिह द्वयं नित्यापरोक्षे
तोपेक्षात्मनि दशमदृष्टव्यहं दशमोस्मीति न वेत्ति नास्ति तिनास्तीति दशमोऽस्यादिसर्वे
॥ ॥ इदं तत्र तु स्यादयति ॥ न वसंख्याहत ज्ञानो दशमो विभ्रमात्तदा । न वेत्ति दशमोस्मी
ति वीक्ष्यमाणोपि नानवेति ॥ ॥ परिगणनीय पुरुषान् गणयान् वसंख्यापहत इति

मपरोक्ष
विषयत्वं

स्ता

स्ताहि

मार

विवेकज्ञानोदशमस्तदा तान् परिगणितान् नवसंख्याकान् वीक्ष्य मा णोपि सांम्यकु
पस्थेन पिन्त्रो सागणनकर्ता इति स्वं दशमं तदाभ्यवावेति तद ज्ञानमाव
रणं विदुः। तदा दशमः स्वं दशमं संतं दशमो न भाति नास्तीति मत्वा वदति अस्य व्यव
हारस्य यत्कारणं तद ज्ञानकृतमज्ञानकार्यमावरणं विदुर्बुधा इति शेषः॥
अज्ञानस्यैव कार्यं विशेषं विक्षेपं दर्शयति॥ ॥नद्यां ममार॥ दशम इति शो
चन् प्ररोदिति। अज्ञानकृतविक्षेपं रोदनादिं विदुर्बुधाः॥ दशमस्यासत्वांशनिव
र्तकं परोक्षज्ञानमाह॥ ॥न मृतो दशमोस्तीति श्रुत्वाप्तवचनं निजं। परोक्षत्वेन
दशमं वेत्ति स्वर्गादिलोकवत्॥ ॥तस्यैवाभानांशनिवर्तकमपरोक्षज्ञानं दर्श
यति। त्वमेव दशमोसीति गणयित्वा प्रदर्शितः। अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति॥
स्वेन परिगणितेन नवभिः सह स्वात्मानं गणयित्वा त्वमेव दशमोसीति प्रदर्शितः॥
अहं दशमोस्मीति स परोक्षतया ज्ञात्वा हर्षं प्राप्नोति रोदनं च त्यजति। एवं दृष्टांतं
तं दशमे प्रदर्शितमवस्था [illegible] दार्ष्टांतिके चिदाभासेपि तद्योजनीयमित्याह॥
अज्ञानावृतिविक्षेपद्विविधज्ञानहृट्छुकाः। शोकापगम इत्येते योजनीयाश्चिदात्म
नि॥ ॥अज्ञानं आवृतिश्च विक्षेपश्च द्विविधं ज्ञानं च हृत्छेश्चेति [illegible]
त्मन्यज्ञानादिकं क्रमेण दर्शयति संसारासक्तचित्तः सन्नित्यादिना श्लोकचतुष्टयेन॥ ॥संसारा

संक्षिप्तसंन्यविदःसासः कदाचन। स्वयंप्रकाशकूटस्थे स्वतत्त्वं नैव [..]यं॥ ॥[..]
भातिनास्तिकूटस्थ इति वृत्तिप्रसंगतः। कर्ताज्ञो ऽहमस्मीति वि[..]प्रतिपद्य
ते॥ ॥अस्ति कूटस्थ ईसादौ परोक्षं वेत्ति वार्तया। पश्चात्कूटस्थ एवा[..]स्मि[..]ती
विचारतः॥ ॥कर्ताज्ञोक्ते स एवमादि शोकजातं प्रवर्तते। स्व[..]ज[..] प्रापणीयं
प्राप्तमित्येव तुष्यति॥ ॥अयं चिदाभासो विषयसंपानोद्देदिप्यास[..]वेतः संन्यासक
दाचन। स्फूर्तिविचारात्पूर्वं कदापि स्वतत्त्वं स्वस्य निजरूपं स्वप्रकाशं सद्रूपं कूटस्थं
प्रसंगात्मानं नैव वेत्ति। न जानातीति यत्तदज्ञानं चिदात्मविषये प्र[..]ं न जाते।
कूटस्थो नास्ति। न भातीति मत्वा जाते इदमज्ञानकार्यं भावरूपं कूटस्थस्य व[..]ग[..]
निधानादिव कर्तृत्वादिकं नामन्यध्यारोपयति। अस्यारोपस्य हेतुर्देहद्वय
युतश्चिदाभासो विक्षेपः। परेण बोधितः कूटस्थोऽस्तीति जानाति। इदं परोक्षज्ञा
नं। श्रवणादिपरिपाकवशात् कूटस्थोऽहमस्मीति जानातीतिदमपरोक्षज्ञानं॥
कूटस्थासंगात्मा ज्ञानानंतरं कर्तृत्वादि शोकजातं यज्जातीति यत्तदयं शोकापगमः
कृसं कर्तव्यजातं कृतं निष्पादितं प्रापणीयं फलजातं प्राप्तं लब्धमिति तुष्यतीदं तृप्ति
रित्यर्थः॥ ॥दार्ष्टान्तिके क्रममवस्थासप्तकमनुवदति॥ ॥अज्ञानमावृतिस्तद्वद्
द्विक्षेपश्च परोक्षधीः। अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशेति॥ ॥ननु कार्यं
स्थासप्तकस्यात्मधर्मत्वाभिकारत्वस्य कूटस्थे वेत्याशंक्य तेषां सप्तानां[..]

स्त्वा चिदाभासस्यैव न अटस्थस्येत्याह ॥ ॥ससावस्त्वादिमासंतिति चिदाभासस्येति ।
सर्ववाक्यं सावधारणमिति न्यायेन चिदाभासस्यैव विसवगम्यते । अस्माद्वचोपन्या
याशंकयन वृथा बंधमोक्षकारित्वद्योतन फलवार्त्तन्यासस्य स्यसमभिप्रायेणाह । नात्मि
॥बंधमोक्षौ स्तश्चिदाविति ॥ किमासां सक्षानामप्यविशेषेण बंधमोक्षकारित्वेनेत्याह ॥
न चतितस्त्रो बंधकृत स्त्रिमादिति ॥ ॥अज्ञानावरणविक्षेपरूपास्तीस्त्रइत्यर्थः । आसां
बंधकारित्वदर्शनाय तिसृणामपि स्वरूपं प्रत्येकं कार्यप्रदर्शनेन स्पष्टयति । किंचिद्ज्ञान
स्य स्वरूपं तावद्दर्शयति । न जानामीति कदाचिन्न व्यवहारस्य कारणं । तिव्यारप्रागभावेन
युक्तमेतज्ञानमीरितं ॥ ॥इतिबालतस्वविचारप्रागनावसहितं [illegible] न व्यवहारस्य का
रणं । न जानामीत्युच्यमानमज्ञानमीरितमित्यर्थः । आवृत्तिकार्यं दर्शयति ॥ ॥अ
र्गपाविचार्यथनास्तिनोनातिचेयसो ॥विपरीत व्यवहृतिरावृत्तेः कार्यमिष्यते [illegible] ॥ ॥आ
स्त्रोक्तप्रकारमतीत्य केवल तर्केण विचार्यानंतरं कुटस्थो न भातिनास्तीसेवंरूपाविप
रित व्यवहारकारणकार्यमित्यर्थः ॥ विपर्यसस्यास्वरूपं तत्कार्यं दर्शयति ॥ ॥देहद्वयाचि
दाभासरूपविक्षेपइरीतः । कर्तृत्वादखिलं शोकसंसाराख्यास्य बंधकः ॥ इति स्थू
लसूक्ष्माख्यशरीरद्वयसहितश्चिदाभासएवविक्षेपः । बंधकः । बंधहेतुः [illegible]
स्वयं कर्तृत्वाद्यखिलः शोकः अस्य चिदाभासस्य कार्यमिति शेषः । कर्तृत्वादिभिः दिश
द्वेन प्रमातृत्वादयो गृह्यंते ॥ नन्वसमावस्थाश्चिदाभासस्यफलं । अनुपपन्नमज्ञा

बाव

तृतीयदीप

नावरणैर्विक्षेपो व्यवहितः। पुरा स्थितेर्नाचातुचीदानीं तस्य विक्षेपान्तःपातित्वात्तदवस्था-
नुपपत्तेरित्याशंक्याह। अज्ञानमनावृत्तिश्चेत्ते विक्षेपात्प्राक् प्रसिद्ध्यतः। यथा व्य-
वस्थितेर्विक्षेपस्यैवनाशमिति॥ अनयोर्विक्षेपात् पुरा स्थितेऽपि नाशात् तदवस्थ[illegible]स्यो-
संगीनावस्थावत्त्वानुपपत्तेः॥ ॥अतः परिशेषाद्विदानीं सावस्था प्रमेवतयोर्वि[illegible]व्यानि-
तिनावः। अवस्थावतो विक्षेपस्य तदानीमेव नाशात् तदवस्थाप्राप्तिर्यानमनुपपन्नमि-
त्याशंक्य विक्षेपानावेपि तत्संस्कारस्य तदानीं सत्त्वाद्विक्षेपावस्थावत्त्वाभिधानेन विस-
ष्यतद्रसाह॥ ॥विक्षेपोत्पत्तेः पूर्वमपि विक्षेपसंस्कृतिः। अस्यैव तदवस्थावम-
विरुद्धं तेस्तयोः॥ ततः कारणात्तयोस्तदवस्था च मा विरुद्धमपि योजना॥ ॥ननु
प्रसिद्धसंस्कारान्यपगमद्वारा विक्षेपावस्थात्वे विशेषाविक्षेपोत्पत्ति[illegible]कालं
विभिन्नां संसारी चाद्यवस्थानां जीवाश्रितत्वमनुभूयमानं चान्यब्रह्मावस्था चमिति शं-
कते॥ ॥संसार्यहं विबुद्धोऽहं विशोकस्तुष्ट इत्यपि॥ जीवगा उत्तरावस्था नैतिन ब्रह्मग
इति॥ ॥संसारी कर्तृत्वादिधर्मवान् विबुद्धस्तत्र साक्षात्कारवान्। विशोकः शोकरहितः
तुष्टः वक्ष्यमाणतत्त्वसत्त्वादिजनितसंतोषवान्॥ अहमास्मीत्युत्तरावस्था जीवगा जी-
वाश्रिता च न त्वं तिन ब्रह्मगोचर इत्यर्थः॥ ॥एवं तर्ह्यज्ञानावरणयो[illegible]सांक्यस्यावित्यसा-
दर्शयितिरपि जीवाश्रितत्वेनानुभूयमानत्वाज्जीवावस्थात्वमस्त्वित्याह॥ ॥नाहं
ब्राह्म ब्रह्म[illegible]वेनानेनु दृष्टितानं हि। इति पूर्वावस्थेय[illegible]ते जीवगे स्वल्विति॥
न हृदिनेः ममानुनवेनेत्यर्थः। ननु तर्ह्यज्ञानाश्रयत्वं ब्रह्मणः पूर्वाचार्यैः कथमुक्तमि-
त्यपेक्षान्तत्याप्रसिद्धाब्रह्मावस्थाचावर्णनमित्याशंक्य अतिप्रसंगान्तेवमिति परिहर
[illegible]पितत्वेनब्रह्मावस्थेऽमेइति न शंकनीयं सर्वासां ब्रह्मण्येवाधिरोपणादिति[illegible]

यो ते वे श्री व

वर्णितं हर ता ब्रह्म

पितःचा

तृप्तिदीप

त

साशंक्य तद्विवक्षां दर्शयति ॥ ॥अज्ञानस्याश्रयो ब्रह्मेत्यधिष्ठानतया जगुरिति
॥ ॥ब्रह्मणोऽज्ञानाधिष्ठानत्वविवक्षया तदाश्रयत्वमुक्तमित्यर्थः। ननु शास्त्रे हि
क्वचिद्विवक्षया जीवावस्थात्वमुक्तमित्याशंक्य स्वविवक्षां दर्शयति॥ जीवावस्थात्वमज्ञा
नाहंकारमात्रेणैवादपादितं॥ ॥एवंबंधहेतुमवस्थात्रयं प्रदर्श्यावशिष्टास्ववस्थासु
मुक्तिहेत्ववस्थाद्वयं दर्शयति॥ ज्ञानद्वयेन
नष्टपूर्वोक्ताज्ञानावरणनिवृत्तिद्वारा मुक्तिहेतुं अवस्थाद्वयं दर्शयति ॥ परो
नहेऽस्मिन ज्ञाने तत्कृतावृत्तिः नास्तीति नास्ति चेत्येषा द्विविधापि विनश्यतीति॥ परो
क्षरूपपरोक्षत्वलक्षणेन ज्ञानद्वयेनावरणकार्यद्वयं ज्ञानेन हेऽसतीति तत्कृतावृत्तिः ते
नाज्ञानेनोत्पादितनास्तीति नास्तीति व्यवहारकारणं द्विविधमप्यावरणं कारणनाशा
न्नश्यतीति। कस्यांशस्य केन निवृत्तिरित्यपेक्षायामनुवर्त्य विनष्टं दर्शयति॥ परो
क्षज्ञानतोऽनश्येदसत्त्वावृत्तिहेतुता। अपरोक्षज्ञाननाश्या ह्यभानावृत्तिहेतुता॥
सज्ञानतो नश्येदसत्त्वावृत्तिहेतुता। अपरोक्षज्ञानेनाद्यज्ञानस्य कूटस्थो नास्तीत्येवमसत्त्वावरणकारणा
कूटस्थोऽस्तीत्येवं तत्परोक्षज्ञानादज्ञानस्य कूटस्थो नास्तीत्येवं रूपावरणकारणत्वं निवर्ति
वै वर्तते॥ कूटस्थोऽस्मीत्यपरोक्षज्ञानेन कूटस्थो न भातीत्येवंरूपावरणकारणत्वं निवर्त
ते॥ इदानीं ज्ञानस्य फलरूपावस्थाद्वयं प्रथमावस्थामाह॥ ॥आभानावरणनाशे जीव
वारोपसंक्षयात् कर्तृत्वाद्यखिलःशोकः संसाराख्यो निवर्तते इति॥ ॥आभानावरणनिवृ
त्तौ भ्रांत्या प्रतीयमानस्य जीवस्यापि निवृत्तत्वात्तन्निमित्तकः। कर्तृत्वादिलक्षणः संसाराख्यः शो
कः सर्वोऽपि निवर्तत इत्यर्थः॥ ॥एवं शोकापगमरूपामवस्थां प्रदर्श्य निरंकुशा तृप्तिलक्षणां

द्वितीय

२.९

बो

वा

नि

77

द्वितीयां दर्शयति। निवृत्ते सर्वसंसारे नित्यमुक्तत्ववासनात्। निरंकुशा न वै तृप्तिः पुनः शोकं
समुद्भवादिति॥ ॥नन्वात्मानं चेद्विजानीयादिति मंत्रव्याख्याने प्रवृत्तत्वात्तद्विहाय म
ध्ये ब्रह्मज्ञानाद्यवस्थासप्तकनिरूपणं प्रस्तुतासंगतमित्याशंक्यात्मानं चेदित्यस्याः श्रुते:
स्तात्पर्यविषयत्वेनाभिहितत्वान्न प्रस्तुतासंगतमित्यभिप्रेत्य तात्पर्यमाह॥ ॥
अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे। अवस्थे जीवगे ब्रूते आत्मानं चेदिति श्रुतिरि
ति॥ ॥चिदाभासस्यैव निर्दिष्टं यदवस्थासप्तकमस्ति तत्रापरोक्षज्ञानशोकनिवृत्तिल
क्षणमवस्थाद्वयं प्रतिपादयितुमयं मंत्रः प्रवर्तत इत्यभिप्रायः॥ ॥अथ यदिह परोक्षत्वमी
यत्रायमिति पदेनात्मनोऽपरोक्षत्वमुच्यत इत्युक्तं तथा च सति कथं परोक्षज्ञानावस्थायाम
वस्थानम्। कथं परोक्षज्ञानविषयत्वमित्याशंक्य तमनुपपादयन्। यापरोक्षं विविच्यते। स्वयमित्यस
परोक्षत्वमुक्तं तद्द्विविधं न वेचिति॥ ॥द्वैविध्यकारणमाह। विषयस्य स्वप्रकाशत्वाद्वा क्रियापे
क्षं तदीक्षणादिति॥ ॥विषयस्य चिदंशस्यात्मनः स्वप्रकाशत्वात्। स्वव्यवहारे साधनांत
रनिरपेक्षत्वात् क्रिया बुध्या एवं स्वप्रकाशत्वेन त। दीक्षणात् तस्य विषयस्यात्मनो द्वैविध्यमित्यु
र्थः। ननु द्वैविध्ये एतावता परोक्षज्ञानविषयत्वे किमायातमित्याशंक्य। विषयस्य स्वप्रका
शत्वं परोक्षज्ञानविषयत्वविरोधि न भवतीत्याह॥ ॥परोक्षज्ञानकालेऽपि विषयस्वप्रकाश
ता। समेति। अपरोक्षज्ञानकाल इव परोक्षज्ञानकालेऽपि विषयस्य ब्रह्मणः स्वप्रकाशतास्ये
व तत्रोपपत्तिमाह॥ ॥ब्रह्म स्वप्रकाशमस्तीत्येवं हि बोधनात्॥ ॥प्रसंगादिभिगोचरस्य
ज्ञानस्य कुतः परोक्षत्वमित्याशंक्य प्रयोगं साग्रहं पादितमाह॥ अहं ब्रह्मेत्यनुल्लिख्य ब्रह्मास्ती

न

ब्रह्म

सेर्वमुल्लिखेत्॥ ॥परोक्षज्ञानमिति॥ नन्विदं भ्रांतमित्याशंक्यास्य भ्रांतत्वं किं बाध्यत्वा
दुत व्यक्त्यनुल्लेखात् अथवा अपरोक्षेण ग्रहणायोग्यस्य परोक्षेण ग्रहणात् यद्वांश
ग्रहणादिति चतुर्धा विकल्प्य प्रथमं प्रत्याह॥ ॥एतन्न भ्रांतं बाधानिरूपणादिति हेतुं
विवृणोति॥ ॥ब्रह्म नास्तीति मानं चेत्स्याद्बाध्येत तत् ध्रुवं। न चैवं प्रबलं मानं पश्य
मो तेन न बाध्यते इति॥ ॥द्वितीयमभिमतिप्रसंगेन दूषयति॥ ॥व्यक्त्यनुल्लेखमात्रेण प्र
मात्वे स्वर्गधीरपि। भ्रांतीस्याद्व्यक्त्यनुल्लेखात् सामान्योल्लेखदर्शनादिति॥ ॥[illegible] स्वर्ग
इत्यक्रमाकारेण ग्रहणाभावात्॥ किंतु स्वर्गोस्तीत्येवं सामान्याकारेण प्रतीते स्वर्गबुद्धेरपि
भ्रमत्वप्रसंग इत्यर्थः॥ तृतीयं निराकरोति॥ अपरोक्षत्वयोग्यस्य न परोक्षमिति भ्रमः॥ इत्य
ति अपरोक्षत्वेन ग्रहणायोग्यस्य स्वर्गादिभिन्नपरब्रह्मविषयस्य परोक्षज्ञानस्य भ्रमत्वं न सं
भवति कुत इत्यत आह॥ परोक्षमित्यनुल्लेखादिति॥ ॥ब्रह्मापरोक्षमित्येवमाकारेण ग्रहणा
भावात्। कुतस्तर्हि तस्य परोक्षत्वमित्याशंक्याह॥ ॥अर्थात्परोक्षसंभावादिति॥ ॥इदं तु
मित्येवं व्यक्त्युल्लेखसामर्थ्याभावात्परोक्षसिद्धेरिति भावः॥ ॥चरमं प्रत्याह॥ ॥अंशा
ग्राहीभ्रांतिश्चेदिति॥ ॥ब्रह्मांशाग्रहणेऽपि प्रत्यगंशग्रहणात् भ्रमत्वमित्यर्थः॥ एवं तर्हि घ
टादिज्ञानस्यापि भ्रमत्वप्रसंग इति परिहरति॥ घटज्ञानं भ्रमो न स्यादिति॥ ॥अंतरावयवानाम
ग्रहणादिति भावः॥ ॥ननु घटस्य सावयवत्वाद्देशग्रहणेप्यंशाग्रहणं संभवति॥ ॥ब्रह्मणो
स्तु निरंशत्वात् कथमंशाग्रहणात् संभवमित्याशंक्य। व्याप्तसीशोपाधिनिमित्तं सांश

फलं तस्य न विद्यतीत्याह॥ ॥किंच शास्त्रापि सांशयाद्व्यावर्तीशादिभेद तद्वृति। दोतो व्यादस्
शा विशयाकांक्षायामाह॥ ॥असंबंधोगोनि वर्तेत परोक्षज्ञानं तस्तया। आत्मा साक्षान्नेबुद्धिस्य
दपरोक्षधियाद्भलीति॥ अपरोक्षत्वेन ग्रहणयोग्यविषयं परोक्षज्ञानं भ्रमान्नव[illegible]तन्न
दृष्टांतप्रदर्शनेनापि दृढयति॥ दशमोस्तीत्यविद्यातं परोक्षज्ञानं अपि क्षते [illegible] स्तीत्ये तत्
दस्याद्ज्ञानावरणं सममिन्द्रि॥ ॥दशमोस्तीत्याप्तवाक्यजन्यं परोक्षज्ञानं न भवतीतं यथा
बृंहा। स्तीति वाक्यजन्यज्ञानमपि न द्वंद्वत्वांतं स्यात्॥ आप्तलक्षतस्यासद्भावदर्शनात्सम
समं स्यादिति भावः॥ ॥ननु वाक्यात्परोक्षज्ञानमुत्पद्यते चेदपरोक्षज्ञानं कुतो जायत इत्या
शंक्य विचारसहितात् वाक्यादेवेत्याह॥ ॥आत्मा ब्रह्मेति वाक्यार्थे निश्चये [illegible] बाधि
ते। व्यक्तितत्त्विरव्यतद्वृति॥ ॥अयमात्मा ब्रह्मेति महावाक्यार्थसंबंधविचारेण पु
र्वमस्तीति परोक्षतया वगतस्य ब्रह्मणः प्रसंगाभिन्नत्वे साक्षात्क्रियते तत्र दृष्टांतः॥ ॥अ
दद्शमस्त्वमसीत्यस्तद्वृति॥ ॥दशमस्त्वमसीत्यतो वाक्यात्स्वात्मनि दशमत्वेयज्ञः साक्षा
त्क्रियते तद्वदित्यर्थः॥ ॥विचारसहकृतेन वाक्येनापरोक्षज्ञानोत्पत्तिप्रकारं दृष्टांतेन वद्द
र्शयति॥ ॥दशमः क इति प्रश्ने त्वमेवेति निरादृतो गणयित्वा स्वेन सह त्वमेव दशमं स्म
रेदिति॥ ॥दशमोस्तीति नीरूपितोदशमः क इति प्रश्ने कृते तस्य त्वमेवेति परिहारे निर्दि
ते स्वात्मना सह इतरान्नवगणयित्वा अहं दशमोस्मीति॥ स्वमेव दशमं स्मरेदित्यर्थः॥ ॥
अस्य दशमोस्मीति ज्ञानस्य विचारसहितवाक्यजनितत्वान्न विपर्यय इत्याह।

पि

दशमोऽस्मीति वाक्यार्थीनुधीरस्य विहन्यते॥ ॥आदिमध्यावसानेषु न नवस्वस्य
संशयइति॥ यतः। अस्य दशमस्याहमेव दशमोऽसीति वाक्यात्परिगणनादिलक्षणवि
चारसहितादुत्पन्नाहं दशमोऽस्मीति बुद्धिर्न विहन्यते केनापि ज्ञानेन बाध्यते। परिगण
नक्रियायां च नवानामादिमध्यावसानेषु स्वपरिगणनेपि अहं दशमो न वेति संशयो
न भवेत्। अतस्माद् दा[illegible] परोक्षरूपे सर्थः। एतत्सर्वं दार्ष्टान्तिके योजयति॥ ॥सदेवेत्या
दिवाक्येन ब्रह्मसत्त्वं परोक्षतः। गृहीत्वा तत्त्वमस्यादिवाक्याद्व्याप्तिं समुल्लिखेत्। आदि
मध्यावसानेषु स्वस्य ब्रह्म[illegible]धियं। नैवव्यभिचरेत्तस्मादापरोक्ष्यं प्रतिष्ठितम्॥ इति
॥ ॥सदेव सोम्येदमग्र आसीदुपक्रमे वाद्वितीयमिति वाक्येन ब्रह्मसद्भावे प्रथमं
निश्चिते सत्यस्य जीवरूपेण प्रवेशादियुक्तिपर्यालोचनया प्रसंगृहीत्वं से आत्मतत्त्वेन
सी सादिवाक्येनाद्वितीयब्रह्मरूपमात्मानं अहं ब्रह्मास्मीति सा[illegible] श्र
दयमात्मनो ब्रह्मत्वबुद्धिः। पंचानां कोशानामादिमध्यावसानेषु आ[illegible]
रपि नैवान्यथा भवति। अतोऽस्याबुद्धेरपरोक्षज्ञानत्वं सुस्थितमिस[illegible]त्वेवं प्रथ
मतः केवलवाक्यात्परोक्षज्ञानमुत्पद्यते पश्चाद्विचारसहिता[illegible]सज्ञानमुत्पद्यत
इत्येतत्कुतोऽवगम्यत इत्याशंक्यते त्तिरीयादिश्रुत्यर्थपर्यालोचनया[illegible]
न्नादिकारणत्वा रव्यलक्षणेन भृगुः पुरा। परोक्ष्येणाथ हीत्वाथ विचारात्[illegible]
तेति भृगुनामकः कश्चिद्विजः पुरा पितरं वरुणमिमानि भूतानि। आयं[illegible]

म्या

वंति यत्प्रयंत्यभिसंविशंतीति तद्विजिज्ञासस्व तद्ब्रह्मेति ॥ इति वाक्यस्य [illegible]जग[illegible]

दिकारणत्वाख्यलक्षणेन जगत्कारणं ब्रह्मापरोक्षतयावगम्य [illegible] अन्नम[illegible]दिप

कोशविचाराद्व्यक्तिं प्रत्यगात्मनो रूपं ब्रह्म दृष्टवानित्यर्थः ॥ ॥ नन्वस्मिन्[illegible]

ब्रह्मासीत्येवमादिरुपदेशकवाक्यानां वाक्यं कथं भृगोरात्मसाक्षात्कारहेतुत्व[illegible]त्यात्मसा

क्षात्कारहेतुविचारयोग्यत्वं च प्रदर्शनादित्याह ॥ ॥ यद्यपि चमसीत्य[illegible]णाकयेनो

यं नु भृगोपि ता ॥ तथाप्यन्नं प्राणमिति विचार्यत्वलमुक्तवानिति ॥ न[illegible]नन्नमया

दिकोशेषु विचारितेषु प्रतिचसासाक्षात्कारो न वर्ततु ब्रह्मणस्तत्कथमिसाशव[illegible]

वं ब्रह्मत्वात्पंचकोशविचारेण आनंदात्मकव्यक्तिं साक्षात्कृत्यानंदाध्येव[illegible]खल्विमानि

भूतानि जायंते । आनंदेन जातानि जीवंति । आनंदं प्रयंत्यभिसंविशंतीति । एवं ब्रह्मल

क्षणमपि प्रतीत्यवयोजीयानित्याह ॥ ॥ अन्नप्राणादिकोशेषु सविचार्य पुनः पुनः

। आनंदव्यक्तिमीक्षित्वा ब्रह्मलक्ष्माप्यबुध्यत ॥ नतु ब्रह्मलक्षणस्यानं [illegible]मनप्र

तीतिप्रयोजनं न घटते । ब्रह्मणस्तटस्थत्वेन प्रतीतानित्त्वादिसाशंक्य न भेदः साह । विल

क्षणस्य ब्रह्मणः प्रत्यग्रूपतावस्थानत्वमित्याह ॥ ॥ सत्यं ज्ञानमनंतं चेत्येवं ब्रह्मस्व

लक्षणं । गुहागुहाहितत्वेन कोशोक्तरूपदर्शितमिति ॥ सत्यं ज्ञानमनंतं ब्रह्मेत्येवं ब्रह्म

स्वलक्षणं ॥ ॥ ब्रह्मणः स्वरूपलक्षणमभिधाय यो वेद निहितं गुहायां परमे व्यो

मन्नित्य[illegible]वाक्येन पंचकोशगुहां स्थितत्वेन तस्यैव प्रत्यग्रूपत्वमभिहितमित्यर्थः ॥

नेन

एवं तैत्तिरीयकश्रुतिपर्यालोचनया त्वंगोपरोक्षज्ञानपूर्वकविचारजन्यत्वे साक्षात्कारस्य दर्शि
मेवावस्थान्तरं गच्छतीत्यर्थः॥ ॥पुण्यं पुण्यफलं सुखं पापं तत्फलं दुःखं ...
दाय इत्यर्थः। लोकानतिविवेचनपराणि श्रूयन्ते ... दर्शयति॥ ॥ ...
... प्रपंचस्य ... तथाग्रे ... बंधो ... ते। दकरता ...

ला र्वे व्यनुसृसागतोनभव न॰४

त्म मंतव्यो जागृत्स्वप्नसुषुप्तिषु। स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते॥ ॥त्रि
षु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्। तेभ्यो विलक्षण साक्षी चिन्मात्रोऽहं सदा
शिव इति॥ ॥यत्सच्चिदानंदलक्षणं ब्रह्म साक्षिरूपेणावस्थितं सत् जाग्रदा
दिप्रपंचं प्रकाशते प्रकाशयति। तद्ब्रह्माहमस्मि न बुद्धिचिदाभासोऽहमस्मी
ति ज्ञात्वा श्रुत्यनुभवाभ्यां निश्चित्य सर्वबंधैः प्रमातृकर्तृत्वादिभिः प्रमुच्यते प्रक
र्षेण सर्वात्मना मुच्यते। जाग्रदादिष्ववस्थास्वेक एवात्मा मंतव्यो ज्ञातव्यः॥ ॥ए
वं विवेकज्ञानेन स्थानत्रयव्यतीतस्यावस्थात्रयाद्विविक्तस्यात्मनः पुनर्ज
न्म न विद्यते। एतत्शरीरपतनानंतरं शरीरांतरप्राप्तिर्नास्तीत्यर्थः। त्रिषु धामसु
त्रिष्ववस्थासु यद्भोग्यं स्थूलप्रविविक्तानंदरूपं यश्च भोक्ता विश्वतैजसप्रा
ज्ञरूपः यश्च भोगः तत्तदनुभवरूप इति। ये विद्यंते तेभ्यः स्थानादिभ्यो विल
क्षणो यश्चिन्मात्रसाक्षी नित्यः शिवः। निरतिशयानंदरूपत्वेन सर्वदा नोऽनं
दरमात्मास्मि सोऽहमस्मीत्यर्थः। एवं विवेकेनात्मतत्त्वव्यसंगे निश्चिते सति भोक्तृ
त्वं कस्येत्याह॥ ॥एवं विवेचिते तत्त्वे विज्ञानमयशब्दितः॥ चिदाभासो विकारी यो
भोक्तृत्वं तस्य शिष्यते॥ विज्ञानशब्देनाभिधीयमानश्चिदाभासस्तस्य विकारित्वा
द्भोक्तृत्वमित्यर्थः॥ ॥ननु चिदाभासस्य भोक्तृत्वं निकाम कस्य कामायेति वचनात्

८१

स

के

कृत्नावविवक्षयेति पूर्वेव्याहृत्येतेसाशंक्य तस्यवचसः पारमार्थिकत्वे कृत्नावप
रहमिथ्युक्तिप्रसंगात् स्त्रीदानासस्य मिथ्यात्वं साधयति॥ ॥मायीकोयं विद्
नासश्रुतेरनुभवादपीति॥ ॥अयं विद्यानाशो मायामयमृषात्मकः श्रुतेः॥ ॥जीवे
नावानासेनकरोतीतिश्रुतेः॥ ॥अनुभवादपि दृष्टादित्रितयमध्यवर्तिचैतन्यमा
नुभूयमानत्वादपीत्यर्थः। देतेवोपपादयति॥ इंद्रजालंजगत्प्रोक्तं तदंतःपातीयतः
इति॥ ॥इंद्रजालवन्मिथ्याभूतेजगत्यंतर्भूतत्वादस्यापिमिथ्यात्वं तद्वदनुभूय
तेविद्वद्भिरितिशेषः। तस्माज्जगदंतःपातित्वतो मृषेतियोजना॥ ॥अस्यजगतइव
विनाशित्वानुभवादपि मृषात्वमित्याह॥ ॥विलयोऽस्यसुषुप्त्यादौ साक्षिणा ह्यनु
भूयतइति। मूर्छादिरित्यादिशब्दार्थः॥ नयतु मृषात्वं ततः। किमित्यत आह। एतादृ
शंस्वस्वभावं विवितक्ति पुनःपुनःरिति॥ ॥यदाकूटस्थाद्विवेकेन चिदाभासो
ईको जातः तदा सुस्वभावं स्वचमेतादृशं मृषात्मकं पुनःपुनर्विविनक्ति। कूटस्थाद्वि
विच्य जानाति। ततोपि किमित्यत आह॥ ॥विविच्य नाशं निश्चित्य पुनर्भोगं न वांछ
तीति॥ तत्र दृष्टांतमाह॥ मुमूर्षुः शायितो भूमौ विवाहं कोपि वांछति। किंच पूर्व
वदहंमोऽस्तीति व्यवहर्तुमपि लज्जतेत्याह। जिहेति व्यवहर्तुं च तोऽहमिति
पूर्ववदिति। तर्हि ज्ञानोत्पत्त्यनंतरं प्रारब्धावसानपर्यंतं कथं व्यवहरतीत्यत आह

यं

हू

श्नं

छिन्नानासद्भवच्छित्तक्लिन्नं नारब्धमश्नुतइति ॥ ॥छित्तः स्वच्छितः क्लिशं नेदानीम
पि कर्मक्षीयत इति कुशमनुभवन् प्रारब्धमश्नुते ॥ प्रारब्धकर्मफलं तु केवलमर्थः
॥ इदानीं ज्ञानानन्तरं साक्षिणो नोऽकृत्वाभावः । कैमुतिकन्यायसिद्धमित्याह ॥ ॥ यदा
स्वस्यापि नोऽकृत्वं मन्तुं जिहेद्ययं तदा । साक्षिण्यारोपयेदेतदिति केव कथा वृथेति
॥ अयं विद्वान् स्वस्यापि नोऽकृत्वं मन्तुं महं नो केति ज्ञातुं जिह्वति विलज्जति यदा
तदा एतत्स्वमतं नोऽकृत्वं साक्षिण्यसंगे आरोपयेदिति वृथा कथा अन्याऽकृवका
पि सर्थः । तत्क्रमर्थे श्लोकसारसदं करोति ॥ ॥ इ सप्रसंगे नोक्कारमाक्षिप सविशेषं कथा
। कस्य कामायेति । कस्य कामायेति श्रुति रिहं अट स्वच्छ स्पर्विदाना सस्य वा पारमा
र्थिकनोऽकृत्वाभावमप्रसव्यविशेषकथा ओंकारा हि सेन नोऽकारमाक्षिपतीत
ति निराकरोति । न व चैवं नोऽकृदेपः । ततः किमित्यत आह । न तु शारीरानुज्वरो न हि
ति । ज्वरः ज्वरयां संतापः । तत्र त्रिविधः शारीरानुज्वमानावेव शब्द तु शारीरत्वे तत्र
ज्वरसद्भावं दर्शयति । स्थूलं सूक्ष्मं कारणं च शारीरं त्रिविधं दर्शितं स्मृतं ॥ ॥
अपञ्चयं त्रिविधोऽस्येव तत्र तत्रो ज्वर इति । तत्र स्थूलशरीरे ज्वरो स्राव दाह ॥ वातपि
त्तश्लेष्मजन्या व्याधयः कोटिशः स्मृतो ॥ दुर्गंधत्वकूरूपत्वदाहनगादयस्तत्र येति ॥ ॥ सूक्ष्म

ये

श्रा

शारीरेज्वरान्दर्शयति॥ ॥कामक्रोधादयश्शांतिदांस्याद्यालिंगदेहगाज्वरादृति॥॥
कामादीनांशांत्यादीनांच ज्वरत्वमुपपादयति॥ ॥द्वयेपितांषतेप्राप्ताप्राप्यनरं
क्रमानुद्दति॥ ॥द्वयेपिद्विविधाअपिक्रमेणप्राप्याप्राप्तीन्यांनरंबाधंतेअतोज्वरस
म्यांतं ज्वरात्वयंतदृत्यर्थः। कारणमतोज्वरस्थावोग्यमृत्युसात्तदृत्याह॥स्वंपरंचनैसा
त्माविनष्ठदुःखकारणं। आगामीदुःखबीजंचयेयैतदीद्वैताद्दर्शितमिति॥ ॥नाहं
स्वत्वयमेवंसपरात्मानंजानाम्यहमस्मीति॥ नोएवमानिन्द्रनानिचिनाशमेवापि
यचेपरेच्छुरागामिदुःखबीजवासनासद्भावाश्चेतदीद्वैताशिष्यंगुरुःप्रजा
पतेःपुरतोनिवेदितमित्यर्थः।एवंत्रिष्वपिदेहषुज्वरानभिधायतेषामपरिहार्य
त्वमाह॥ ॥एतेज्वराश्शारीरेषुत्रिषुस्वाभावीकामतदृति॥ ॥त्रिष्वपिदेहेषुप्रतीय
मानाएतेज्वराःशारीरैसहोत्पन्नेनस्वाभावीकास्संमताः॥ ॥स्वाभाविकत्वंव्यतिरेक
मुखेनदृढयति॥ ॥वियोगेतुज्वरस्तानिशारीराण्येवनासतदृति॥ ॥यतःकारणादि
मेज्वरैस्तेषांशरीराणांवियोगेतानिशरीराणिनासन्तएवनैवभवंति।अतःस्वाभावि
कादृत्यर्थः।तत्रदृष्टांतमाह॥तंतोर्वियुज्यतपटाःवालेस्मःकंबलोयथा।मृदोघटस्तथा।
देहोज्वरेभ्योपीतिदृश्यतामिति॥ ॥इदानींकुटस्थज्वराभावंकेमुत्यैकन्यायेनदि
दर्शयिषुश्चिदाभासेतावज्ज्वराभावंदर्शयति॥ ॥चिदाभासेस्वतःकोपिज्वरोनास्ती
ति॥

ति ॥ चिदाभासे स्वतः शरीरत्रयगतज्वरसंबंधमंतरेण न कोपि ज्वरो विद्यते ॥
ऊतद्दर्शयतुमाह । यतः ॥ चितः प्रकाशैः कस्य भावचमेवदृष्टं न चेतरदिति ॥ ॥ चितः
प्रकाशैः कस्य भावच स्वविद्वदनुभवसिद्धत्वात्तत्प्रती । बीबस्यापि चिदाभासस्य
तथात्वमेवेष्टव्यमिति भावः ॥ ॥ यदर्थं चिदाभासज्वराभावत्वप्रपादितस्तदीदानी
दर्शयति ॥ चिदाभासेप्यसंभाव्याज्वराः साक्षिणि का कथेति ॥ यदा चिदाभासेपि ज्वर
नसंभाव्यं तेन तदा साक्षिणि न संभवंतीति किमु वक्तव्यमिति भावः । ननु तर्हि ज्वरा मिथ्युर्त
नवस्यकारणनिरिक्षतव्याह ॥ एवमप्येकतां मने चिदाभासो ह्यविद्ययेति ॥ एकतां
मनेदृति संक्षेपेणोक्तमर्थं प्रपंचयति ॥ साक्षी सत्यत्वमध्यस्य स्वेनोपेते वपुस्त्र
ये । तत्सर्ववास्तवं स्वस्य स्वरूपमिति मन्यतदृत्ति ॥ ॥ चिदाभासस्वेन सहिते शरी
रत्रये साक्षीगतं सत्यत्वमध्यस्य तत्सर्वं ज्वरवच्छरीरत्रयं स्वस्य वास्तवं रूपमिति
मन्यत इत्यर्थः । एवं भ्रांतिज्ञाने सति किं भवतीत्याह ॥ ॥ एतस्मिन् भ्रांतिकालेयं
शरीरेषु ज्वरत्स्वथ । स्वयमेव ज्वरामीति मन्यते हीति ॥ अयं चिदाभासः । अस्यां भ्रां
तिवेलायां शरीरेषु ज्वरत्सु शरीरनिष्ठं ज्वरं स्वात्मन्यारोपयतीत्यर्थः । तत्र दृष्टांत
माह ॥ कुटुंबिवदिति । दृष्टांतं विशदयति ॥ ॥ पुत्रदारेषु तप्यत्सु तपामीति यथा वृ
था । मन्यते पुरुषस्तद्वदाभासोप्यभिमन्यतदृति ॥ ॥ एवमविवेकदशायां चिदाभा
सस्य भ्रांतिं प्रदर्श्य विवेकदशायां तेनावं दर्शयति ॥ ॥ विविच्य भ्रांतिमुत्सृज्य

मु

वि

स्वमप्यगणयन् सदा। चिंतयन्साक्षिणं कस्माच्छरीरमनुसंज्वरेदिति॥ ॥विद्वान्
संकुटस्थं स्वात्मानं शरीरादींश्च विविच्य नेदं शरीराद्यिदं सर्वं मम वा स्वं स्वरूपमिति
मन्यतेऽहं कर्ता। विभ्रांतिपरिशून्यस्य स्वस्यात्मास्वरूपं च ज्ञानेन स्वस्मिन्नप्यादरमकुर्वन्
स्वस्य निजं रूपं ज्वरादिरहितं साक्षिणं सदा चिंतयन् शरीरमनुज्वरवच्छरीरमनुस-
यस्स्वयं कस्मात्संज्वरेत्तु। न संज्वरेदेवेत्यर्थः॥ ॥भ्रांतिज्ञानतत्वज्ञानयोः ज्वरं तदभाव
कारणत्वे दृष्टांतेन स्पष्टयति॥ अयथावस्तु सर्पादिज्ञानं हेतुः पलायने। रज्ज्वज्ञानानि
विध्वस्तो ऽस्तमप्यनुशोचति॥ ॥रज्ज्वादौ कल्पितस्य सर्पादिज्ञानं पलायनका
चौरो रणं भवति। आदिशब्देन स्थाणौ कल्पितचौरादि गृह्यते। रज्ज्वादिज्ञानेन सर्पादिबुद्धि
निवृत्तौ तदपि पलायनमनुशोचति। वृथा कृतं मयेत्यनुतप्यत इत्यर्थः॥ ॥साक्षिं सदा पं
चिंतयन् इत्युक्तं मर्थं दृष्टांतेन स्पष्टयति॥ ॥मिथ्याभियोगदोषस्य प्रायश्चित्तं विधि
द्वय। समापयन्निवात्मानं साक्षिणं शरणं गत इति। यथा लोके मिथ्याभियोगदोषस्य
प्रायश्चित्तं सिद्ध्यर्थे मिथ्याभियुक्तिं पुनः समापयति। एवं विद्वानसोऽपि साक्षिणः संगा
त्मनि लोके वाध्यारोपलक्षणमिथ्याभियोगदोषप्रायश्चित्तार्थं साक्षिणमात्मानं समाप
यन्निव शरणं गतः। तत्रैव दृष्टांतांतरमाह॥ आशु तपापनुत्यर्थं ऐश्वौघा पतंति तथा। आपर्ति
यन्नीवध्यानं सदा साक्षी परायण इति॥ ॥यथा पापकारिणा पुरुषेणानुसवापसैनु

स्मानो

सर्वमन्यत्स्वल्पपापनोदनाय विहितं स्नानादिकं प्रायश्चित्तमावर्त्यते पुनः
पुनरनुष्ठीयते। यथायमपि चिरं साक्षिणि संसारित्वारोपणादोषपरिहाराय ध्यान
मावर्तयन्निव सदा साक्षिपरायणो भवति। एवं साक्षिपरत्वे दृष्टान्तेरुपवर्ण्य स्वगु
णप्रख्यापने लज्जालुत्वे सदृष्टान्तमाह। उपस्थकुष्ठिनी वेश्या विलासेषु विलज्जते
। जानतोग्रे तथाभासः स्वप्रख्यातौ विलज्जते इति॥ इदानीं शरीरत्रयाद्विवेचि
तस्य चिदाभासस्य पुनस्तैः सह तादात्म्यभ्रमाभावे दृष्टान्तमाह॥ गृहीतो
ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरन्पुनः। म्लेच्छैः संकीर्यते नैव तथाभासः शरीरकैः॥
न केवलं स्वापराधनिवृत्तये साक्ष्यनुसरणं किन्तु नरः प्रयोजनसिध्यर्थमपीति
सिंहावलोकनन्यायेन दृष्टान्तमाह॥ यौवराज्ये स्थितो राजपुत्रः साम्राज्यवाञ्छ
या॥ राजानुकारी भवति तथा साक्ष्यनुकार्ययमिति॥ राजानुकारी भवति राजेव प्रजारञ्ज
नादिगुणवान् भवतीत्यर्थः। ननु युवराजस्य राजानुसरणे साम्राज्यं फलं दृश्यते नैवं
साक्ष्यनुसरणे। अतस्तदनुसरणे कथं प्रवर्तत इत्याशंक्याह॥ यो ब्रह्म वेद ब्रह्मैव भव
त्येष इति श्रुतीः श्रुत्वा तदेकचित्तः सन्ब्रह्म वेत्ति न चेतरदिति। स यो ह वै तत्परमं ब्रह्म
वेद ब्रह्मैव भवति। नास्याब्रह्मवित्कुले भवति। तरति शोकं तरति पाप्मानं गुहाग्र
न्थिभ्यो विमुक्तोऽमृतो भवतीति श्रुतौ ब्रह्मभावादिरूपस्य फलस्य श्रवणा

पाचात् तत्फलवांछया सोऽप्यनुसरणे प्रवर्तनं युक्तमित्यर्थः ॥ ॥ ननु ब्रह्मज्ञानेन ब्रह्म
भावप्राप्तौ चिदाभासस्तु नैव विनश्येत् अतः स्वविनाशाय कथं प्रवर्तेत इत्याशं
क्याह ॥ ॥ देवत्वकामा ह्यग्न्यादौ प्रविशंति यथा तथा ॥ साक्षित्वेनावशेषाय स्व
विनाशं स वांछतीति ॥ ॥ यथा लोके देवत्वप्राप्तिकामा भृग्वग्निप्रपातगंगाप्रवे
शादौ प्रवर्तंते । एवं साक्षिरूपेणावस्थानलक्षणस्याधिकफलस्य विद्यमानत्वाच्चि
दाभासस्य स्वाविगमहेतौ ब्रह्मज्ञाने प्रवृत्तिर्घटत एवेत्यर्थः ॥ ॥ ननु तत्त्वज्ञाने नाभा
सत्वमपगच्छति चेत् कथं तत्त्वविदां जीवत्वव्यवहार इत्याशंक्य प्रारब्धक्षयपर्यंतं त
दुपपत्तिं सदृष्टांतमाह ॥ ॥ यावत्स्वदेहदाहस्यान्नरत्वं नैव मुंचति । यावदारब्धदे
हस्यान्तास्त्वविमोचनमिति ॥ यथाग्न्यादौ प्रविष्टः पुरुषो दाहादिना स्वदेह
नाशपर्यंतं नरत्वं नरव्यवहारयोग्यपर्यंतं नैव मुंचति । एवं प्रारब्धक्षयपर्यंतं चि
दाभासत्वव्यवहारो न निवर्तत इत्यर्थः ॥ ननु रज्जौ सर्पत्वादिभ्रमोपादानस्याज्ञानस्य
निवृत्तत्वात् पुनः कथं भोगानुवृत्तिः । कथं वा मर्त्योऽहमिति विपरीतप्रतीतिरित्या
शंक्याह दृष्टांतप्रदर्शनेन तत्संभावयति ॥ रज्जुज्ञानेऽपि कंपादि ज्ञाने रेखोपशा
म्यति । पुनर्मंदांधकारे सा रज्जुः क्षिप्ता उरगी भवेदिति दार्ष्टांतिके योजयति ॥ ॥ एवमा
रब्धभोगोऽपि ज्ञानेन शाम्यति नो हठात् ॥ भोगकाले कदाचित्तु मर्त्योऽहमिति भासते ॥ ॥

ति

ननु पुनर्मर्त्य एवं बुध्युदये तेन तत्त्वज्ञानं बाध्येतेत्याशंक्याह। नैतावतापराधेन त-
त्त्वज्ञानं विनश्यतीति॥ कदाचिदहं मर्त्य एवंविधज्ञानोदयमात्रेणापराधमात्रेणानि-
तत तत्त्वज्ञानं न बाध्यते। अत इत्यत आह॥ जीवन्मुक्तिव्रतं नेदं किंतु वस्तुस्थितिः स्मृ-
तेति। इदं मर्त्यबुद्ध्युदयकरणलक्षणं जीवन्मुक्तिव्रतं नियमेनानुष्ठेयं
न भवति किंतु। सम्यग्ज्ञाने न भ्रान्तिज्ञाननिवृत्तिरित्ययं वस्तुस्वभावः अतः क-
दाचिन्मर्त्यबुद्ध्युदयेऽपि न तत्त्वज्ञानं तेन पातस्यापि एव बाध्यत्वमिति भावः॥
ननु रज्जुसर्पादिस्थले विपरीतज्ञाननिवृत्तावपि तत्कार्यकम्पाद्यनुवृत्तिं प्रद-
र्शितं तद्दशमे दशमस्त्वमसीति वाक्यविचारजन्यज्ञानेन भ्रमनिवृत्तौ न कार्या-
नुवृत्तिर्नोपलभ्यत इत्याशंक्याह॥ ॥दशमोऽपि शिरस्ताडं रुदन्बुद्ध्वा न रोदिति।
शिरोव्रणस्तु मासेन शनैः शाम्यति नो तदा॥ दशमोऽस्मीति ज्ञानोदये सति शिरस्ता-
डनपूर्वकं रोदनमात्रं निवर्तते। ताडनजन्यव्रणस्त्वनुवर्तत एवेत्यर्थः। ननु ज्ञानोत्तरका-
लेऽपि संसारानुवृत्तौ जीवन्मुक्तिः कुतः पुरुषार्थ इत्याशंक्य मुक्तिलाभजन्यहर्षस्य त-
द्दुःखाच्छादकत्वस्य सत्त्वात्पुरुषार्थत्वमस्तीति दृष्टान्तपूर्वमाह। दशमोऽमृतिलाभेन जातो ह-
र्षो व्रणव्यथाम्॥ तिरोधत्ते मुक्तिलाभस्तथा प्रारब्धदुःखताम्॥ इति जीवन्मुक्तिव्रतं नेदमि-
त्युक्तं तत्र व्रतं नामावेक्षि मायातमित्यत आह। व्रतं नाम यदा ध्यासस्तदा यामस्तयो

क

से दि

विविच्यतामिति। पुनः पुनः विचारकरणे दृष्टान्तमाहारसेति विभिन्नकेन्ते यात्कृयाय
थातथेति भयथारसस्ते विनरदैस्मिन्नदीनेदुद्वाय परिहासाय पुनःपुनर्हुकेऽत
द्वदध्यासनिवृत्तये पुनःपुनर्विचारः क्रियतामित्यर्थः॥ ज्ञानेनावृतस्य प्रारब्धकर्मप
लस्य केन तर्हि निवृत्तिरित्याशंक्य तावत्त्रैवोक्तस्य स्यान्न धैर्येन वा भोगेनैव निवृ
त्तिरित्याह॥ ॥शमयत्येव बध्नानायं दृशामस्वबणां रथ्या। भोगेन शामयेत्तेन तत्प्रा
रब्धं मुच्यते ८ तदेहि॥ ॥ [illegible]रोक्षज्ञान शोकनिवृत्याख्यैन नेदमे। अवस्थे जीवग
तवात्मानं चेदिति श्रुति रियन्नन्श्लोके नात्मानं चेद्विजानीयादयमस्मीति पूरुषः
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदित्यस्मिन्मंत्रेऽपरोक्षज्ञानशोकनिवृ[illegible]ख्या
रव्ये जीवाय स्थे द्वे अभिहिते सत्ये। इदानीं तदभिधानस्य चितां जीवस्य सप्तमीं तृ
प्तिलक्षणामवस्थां वृयनु कीर्तनपूर्वकं व क्तुमारभते॥ ॥किमिच्छन्निति याक्या
क्तेः शोकमोक्षत दीरितद्वति। किमिच्छन्निति याक्तेपरोर्थनाभितो यः शोकमोक्ष
स्तस्यैतावतायं ये संदर्भे सोऽभिरितः अभिहितः। एषामात्मज्ञानमात्रतृप्तिस्तदु
क्तिस्पष्टपरोक्षधीः। अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशा। यनेन श्लो
केनाभिहिता तृप्ति सप्तस्तु जीवावस्थास्तु षष्ठीत्याह॥ आत्मानस्य हृदेत स्थेबाव

दी

स्तृ प्त

षष्ठि स्मृप्तिस्तु सप्तमीति ॥ ॥ सप्तमीव्याख्या यत इति शेषः ॥ अपरोक्षज्ञानजन्या
या तृप्तिर्निरंकुशा त्वं प्रतियोगीप्रदर्शनपुरस्सरं प्रतिजानीते ॥ सांकुशा विषये
तृप्तिरियं तृप्तिर्निरंकुशेति ॥ विषयजन्या या तृप्तिर्विषयान्तरकामनया कु
ण्ठितत्वात् सांकुशात्वं अस्यास्तु तदभावान्निरंकुशात्वं ॥ निरंकुशत्वमेव दर्शयति
। कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तृप्यतीति ॥ कृतकृत्यत्वमेवोपपादयति ॥ ऐहि
हिकामुष्मिकव्रातसिद्ध्यै मुक्तेश्च सिद्धये । बहुकृत्यं पुरास्यान्मे तत्सर्वमद्य
ना कृतं । तदेतत्कृतकृत्यत्वमिति ॥ अस्य विदुषस्तत्त्वज्ञानोदयात्पूर्वमिहलोके
इष्टप्राप्तये अनिष्टनिवृत्तये च कृषिवाणिज्यादिकं । स्वर्गादिसिद्धये योगोपासना
दिकं मोक्षसाधनज्ञान[illegible]ये श्रवणादिकं चेति । बहुविधकर्तव्यमासीत् ॥ इदा
नीं तु सांसारिकापेक्षाभावात् ब्रह्मानंदसाक्षात्कारस्य सिद्धत्वाच्च । तत्सर्वं कृषि
यागश्रवणादिकं कृतं । कृतप्रायमभूत् ॥ इतःपरमनुष्ठेयं चान्नावादिरर्थः ॥ एवं कृ
तकृत्यत्वमुपपाद्य तत्फलभूतां तृप्तिं दर्शयति प्रतियोगीपुरस्सरं । अत्र सं दृष्ट
देवायमेवं तृप्यति निरंकुशा इति ॥ प्रतियोगिपुरस्सरं प्रतियोग्यनुसंधान
पूर्वकं यथा भवति तथा एवं वक्ष्यमाणप्रकारेण सर्वदा तृप्यति ॥ तदेवानुसंधा

तदेनकृतकृत्यत्वे २

पि

न प्रपंचयति॥ ॥दुःखिनो ज्ञा इत्यादिना कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनरिप्यं तृप्ता
कतनेय्येन तत्र तावद्देहिकसुखार्थिभ्यो वैलक्षण्यं स्वस्य दर्शयति॥ ॥दुःखिनो
ज्ञाः संसरंतु कामं पुत्राद्यपेक्षया। परमानंदपूर्णोहं संसरामि किमिच्छयेति॥ ॥स्वर्गा
द्यर्थकामो यर्थ कर्माद्यनुष्ठानकर्तृभ्यो वैलक्षण्यमाह॥ ॥अनुतिष्ठंतु कर्माणि परलोकयि
यासवः। सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथमिति॥ ननु स्वार्थप्रवृत्त्यभावेपि परा
र्थप्रवृत्तिः किं न स्यादित्याशंक्याधिकाराभावात् सापि नास्तीत्याह॥ ॥व्याचक्षतां ते शास्त्रा
णि वेदानध्यापयंतु वा। येत्राधिकारिणो मे तु नाधिकारोक्रियत्वत इति॥ ॥ननु स्वदेहस्थि
त्यर्थं भिक्षाहरणादिकं परलोकार्थं स्नानादिकं च भवता क्रियमाणमुपलभ्यते। अतो
क्रियत्वमसिद्धमित्याशंक्य तदपि स्वदृष्ट्या नैवास्ति॥ ॥किंच परैरेवाकल्प्यत इत्याह॥ ॥नि
द्राभिक्षे स्नानशौचे नेच्छामि न करोमि च। द्रष्टारश्चेत्कल्पयंतु किं मे स्यादन्यकल्पनादिति।
अन्यकल्पनया बाधोस्तीत्याशंक्य तद्दृष्टांतमाह॥ ॥गुंजापुंजादि दह्येत नान्या
रोपितवह्निना॥ नान्यारोपितसंसारधर्माने वमहं भजे इति॥ ॥ननु फलांतरेच्छाभावे क
र्मानुष्ठानं मास्तु तत्त्वसाक्षात्काराय श्रवणादिकमेव कर्तव्यमित्याशंक्य ज्ञानाद्यत्वावाश्रव
णादिकर्तृत्वमपि मम नास्तीत्याह॥ ॥शृण्वंतु अज्ञाततत्त्वास्ते जानन् कस्माच्छृणोम्यहं।
मन्यंतां संशयापन्ना न मन्येहमसंशय इति॥ ॥अज्ञाते वा अज्ञाते ब्रह्मणि केवललक्षणं

न

मेर्वर सौ

तद्वद्यैस्ते तथाभूताः श्रवणं कुर्वन्तु तत्र मिथ्यामन्यथा वेत्ति संशयवन्तो मननं कुर्वन्तु । मम
तदुभयाभावान्नोभयत्रप्रवृत्तिरित्यर्थः ॥ मा॰ भवत्तां श्रवणमनने विपर्ययनिरासार्थं नि
दिध्यासनं कर्तव्यमित्याशंक्य देहादौ वात्मबुद्धिरूपलक्षणोस्य विपर्ययस्याभावान्न तदपि
नानुष्ठेयमित्याह ॥ ॥ विपर्यस्तो निदिध्यासेत् किं ध्यानमविपर्यये । देहात्मत्वविपर्या
सं न कदाचिद्भजाम्यहमिति ॥ ॥ ननु विपर्ययाभावे अहं मनुष्य इत्यादिव्यवहारः कथं
घटत इत्याशंक्य वासनावशाद्भवतीत्याह ॥ ॥ अहं मनुष्य इत्यादिव्यवहारो विनाप्ययं वि
पर्यासं चिराभ्यस्तवासनातो वकल्पत इति ॥ ॥ तर्ह्यस्य व्यवहारस्य निवृत्तिसिद्धये
ध्यानं संपादयमित्याशंक्य प्रारब्धक्षयमन्तरेणास्य निवृत्तिर्नास्तीत्याह ॥ ॥ प्रारब्धकर्मणि
क्षीणे व्यवहारो निवर्तते । कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रत इति ॥ ॥ ननु प्रा
रब्धकर्मनिमित्तकस्यापि व्यवहारस्य विरलत्वाय ध्यानं कर्तव्यमेवेत्याशंक्य व्यवहा
रस्य बाधकत्वदर्शनाभावान्न तन्निवृत्तये ध्यानमनुष्ठेयमित्याह ॥ ॥ विरलत्वं व्यवहृतेरिष्टं चे
ध्यानमस्तु ते । अबाधिकां व्यवहृतिं पश्यन् ध्यायाम्यहं कुत इति ॥ ॥ ध्यानस्याकरणे व्यवहि
विक्षेपपरिहाराय समाधिः कर्तव्य इत्याशंक्य विक्षेपसमाधानयोर्मनोधर्मत्वान्न विक्षेप
निवारकेपि समाधावमम नाधिकार इत्याह ॥ ॥ विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम ।
विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिण इति ॥ ॥ ननु तथापि समाधिफललाभेन तव संपा
दनीय इत्याशंक्य नस्य मत्स्वरूपं चान्न संपाद्यमित्याह ॥ ॥ नित्यानुभवरूपस्य को मे त्राणु

ते

नवपृथगिति॥ ॥उपपादितं हन्तसमुच्चं निगमयति॥ ॥हन्तं लेशं प्रापणीयं प्राग्भि
यैवनिश्चय इति। एवं सर्वत्र कर्तृत्वानत्यपगमे बनीयन वृत्तिर्वा प्रसज्येत। स्यात्रां कथ प्रा
रब्धवशात्तु प्रागमनीयत्वं वृत्तिश्च मंगीकरोति॥ ॥व्यवहारो लौकिको वा शास्त्रियो वान्यथा
पि वा। ममाकर्तुरलेपस्य यथारब्धं प्रवर्त्ततामिति॥ ॥लौकिको भिक्षाहारादिः शास्त्रियो जप
ध्यानादिः अन्यथापि वा प्रतिषिद्धं हिंसादिर्वा व्यवहारः कर्तृत्वे न्यकृवाद्धिरं हि नरपमम प्रारब्ध
ं कर्माननतिक्रम्य प्रवर्त्ततामित्यर्थः॥ ॥एवं वस्तुतत्त्वमभिधाय प्रौढवादेनाह॥ ॥व्यथवाम
तत्सोऽपि लोकानुग्रहकाम्यया। शास्त्रियेणैव मार्गेण वर्त्तेऽहं का मम क्षतिः॥ ॥लोकानुग्र
हकाम्यया अप्यनुग्रहेच्छयेत्यर्थः॥ शास्त्रियेणैव मार्गेण प्रवर्त्तनो मीकारत इतिमानः॥ कुतो विक
रस्यादेवं सारांक्षयहदर्शं वाचनेसादिना श्लोकद्वयेन॥ ॥देवार्चनस्नानशौचभिक्षादौ वर्त्ततां
वपुः। तारं जपतु वाक्तद्वत् पठत्वाम्नायमस्तकं॥ विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानन्दे विलीयतां॥ साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये इति॥ ॥तारं प्रणवं। आम्नायमस्तकं वेदांत
शास्त्रं। फलितमाह॥ ॥एवं सकलहं कुत्र संभवेत्कर्मणो मम विभिन्नविषयत्वेन पूर्वापरस
मुद्र इति॥ ॥विभिन्नविषयत्वमेव स्पष्टयति॥ वपुर्वाग्धीषु निर्बंधः कर्मणानुसारतः
पि। ज्ञानिनस्साक्षिणोऽलेपत्वे निर्बंधो नेतरैर्हि इति॥ ॥यथापि ज्ञानी कर्मिणोकलहं कुर्वते
तो विद्वद्द्विपरिहासनीया इत्याह॥ ॥एवं चान्यान्यवृत्तांता भिवृत्तौ बधिराविव। विवदे
तां बुद्धिमन्तो हसंत्येव विलोक्य ताविति। अतः परिहास्य एव मिसारांक्ष्यानिर्विषयकल

ही
ज्ञा

हकारित्वादित्याह ॥ यं कर्म न विज्ञानाति साक्षिणं तस्य तत्त्ववित् ब्रह्माहं बुध्यतां त
त्कर्मिणः किं विधीयते ॥ ॥ देहवाग्बुद्धयस्य काज्ञानिनोनृतबुद्धितः । कर्म प्रवर्त
यत्वाभिर्ज्ञानीनो ह्रियते त्वकिमिति ॥ ॥ कर्मार्थसाक्षिणां कर्मानुष्ठानोपयोगी देह
वाग्बुद्ध्यतिरिक्तं प्रत्यगात्मानं विजानाति तत्त्वविदा तस्य ब्रह्म वेबुद्धेः कर्मणः कर्मा
नुष्ठानं किं हियते । ज्ञानीनो मिथ्यात्वबुध्या परिशक्ते देहवाग्बुद्धिभिः कर्मानुष्ठाने ज्ञानि
नो वा किं विहीयते अतो निर्विषय कलहकारिणो परिहसनीयत्वमित्यर्थः । कर्मानुष्ठान
प्रयोजनशून्यत्वात् ज्ञानिना नाभ्युपगम्यत इति शंकते ॥ ॥ प्रवृत्तिर्नोपयुक्ता चेन्निवृत्ति
॥ रुपयोगाभावो निवृत्तावपि समान इति परिहरति ॥ ॥ निवृत्तिः कोपयुज्यत इति ॥
निवृत्तिर्बोधहेतुत्वात् आत्मोपयोगाभाव इति शंकते ॥ बोधहेतुर्निवृत्तिश्चेदिति । तर्हि प्र
वृत्तिरपि बुभुत्साहेतुत्वादुपयोगो भवतीत्याह ॥ बुभुत्सायां तथेतरेदिति । ननु बुद्धस्य
बुभुत्सापेक्षाभावात् प्रवृत्तेरनुपयोगित्वमिति पुनः शंकते । बुद्धश्चेन्न बुभुत्सेतै
ति । तर्हि बुद्धस्य पुनर्बोधाभावात् तद्धेतुनिवृत्तिरपि न बुद्धस्य उपयोगिनीत्याह । नापबो
बुध्यते पुनरिति । सकृज्ज्ञानस्य बोधस्य स्थिरत्वाय निवृत्तिरपेक्ष्यते यदि शंक्येत तत्स्थि
रत्वं बाधकाभावमपेक्ष्यते । न साधनान्तरमित्याह ॥ ॥ अबाधात् दत्तवं ते तेन न बाधोऽन
त्वस्य साधनादिति । वाक्यप्रमाणजन्यज्ञानस्य बलवता प्रमाणेन बाधाभावात् अनु
वा

बा

वृत्तिस्यादेव अतो न साधनांतरं दैतेऽर्थमनुहेयमित्यर्थः ॥ ननु प्रमाणांतरेण बाधान
वेद्यविद्ययात् कार्यं कर्तृ बाधन्यासेन बाधः स्यादित्याशंक्याह । ता विद्यानापितका
र्यं बोधं बाधितुमर्हति । तत्र हेतुमाह । पुरेवत्वबोधेन बाधिते तत्त्वेयतद्वृत्ति । नन्व
विद्याया बाधितत्वेपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वासंभवात्तेन बोधस्य । बोधोऽस
भवेदित्याशंक्योपादाननिवृत्तेरेव तस्यापि बाधितत्वान्न तेनापि बाधः शंकितुं शक्य
तइत्याह ॥ ॥ बाधितं दृश्यमानमक्षैस्तेन बाधो न शक्यतइति । तत्र दृष्टांतमाह ॥ ॥ जी
वन्नेहनुर्न मार्जारं हंति हंत्यात्कथं मृतइति ॥ अस्तुरुषकः । द्वैतदर्शनेन तत्त्वबोधस्य
बाधाभावं कैमुतिकन्यायप्रदर्शनेन प्रथैं दृढयितुं तदनुकूलं दृष्टांतमाह ॥ अपि पाशुपता
स्त्रेण विद्धश्चेन्न ममार यः ॥ निष्फले [illegible] वितुं नागो न स्यात्तत्र का प्रमा ॥ ॥ यः समर्थः
पाशुपतास्त्रेण विद्धोपि न ममार स चेत् किल सः निष्फल [illegible] वितुं नागशल्यरहितेन [illegible]
व्यथितदेहः सन् नंक्ष्यति नाशं स्यति तत्र का प्रमा प्रमाणं ना । स्तीत्यर्थः ॥ दृष्टांतसिद्ध
मर्थं दार्ष्टांतिके योजयति ॥ आदाववविद्यया चित्रैः स्वकार्यैर्जृंभमाणया । युद्धे बोधोज
येत्सोद्यसुदृढो बाध्यतां कथमिति ॥ ॥ आदो विद्याभ्याससमये चित्रैर्बहुविधैः स्व
कार्यैः प्रमातृत्वकर्तृत्वभोक्तृत्वादिभिर्जृंभमाणया विवर्धमानया अविद्यया सह बोधा
युद्धे [illegible] जयत् स एवाभ्यासपाटवेन सुदृढः ॥ [illegible] इदानीं अविद्या
ध्वी

नीवृत्तोसस्यां निर्मूलेन न कार्येर्ब्यासेन कथं बाध्यतां कथमपि न बाध्यते इत्यर्थः॥ ॥उत्प
पादितमर्थं श्रोतृबुध्यारोहणाय दृष्टान्तेनाह॥ ॥तिष्ठंत्वज्ञानतत्कार्याः शवा बोधेन
मारिताः न भीतिर्बोधसम्राजः कीर्तिः प्रत्युत तस्य तैरिति॥ ॥नन्वेवं प्रवृत्तौ किंना
यातमित्यत आह॥ ॥य एव मतिशूरेण बोधेन सर्वो निरुध्यते प्रवृत्ता वा निवृत्ता या देहा
दिगतयोस्य किमिति॥ ॥यः पुमानेवमुक्तप्रकारेण तत्कार्यविक्षेपादिके न बोधेन
ब्रह्मात्मैक्येन ज्ञानेन विमुच्यते न कदाचिदपि विमुक्तो निवृत्तिरस्य पुंसो देहादिनिष्ठा
प्रवृत्ता वा निवृत्ता वा किं न किमपीष्टमनिष्टं वेत्यर्थः॥ तर्हि ज्ञानी वदज्ञानीनोपि प्रवृ
त्ता वा यहोर्णीयुक्तदृष्टारां क्याह॥ प्रवृत्ता वा यहोत्याख्यो बोधाहीनस्य सर्वथेति॥ ॥तत्रोप
पत्तिमाह स्वर्गाय वापवर्गाय यतितव्यं यतोनृभिरिति॥ ॥विद्वश्चाप्येहम युक्तः॥ एवं
तर्हि कर्मिणां मध्ये वर्तमानेन किं कर्तव्यमित्यत आह॥ ॥विद्वांश्चेत्तादृशां मध्ये तिष्ठे
त्तदनुरोधतः। कायेन मनसा वाचा करोत्येवाखिलाः क्रियाः॥ ॥विद्वान् तादृशां कर्मिणां
मध्ये तिष्ठेत् तदनुरोधतः तेषामनुसारेण शरीरादिभिः सर्वाः क्रियाः करोति न तान् कर्मि
णो निवारयेदित्यर्थः॥ अस्यैव तत्त्वबुभुत्सूनां मध्ये स्थितस्य कर्तव्यमाह॥ ॥एषोऽत्र तत्त्वबुभुत्सू
नां यदा तिष्ठेत्तदा पुनः। बोधायैषां क्रियाः सर्वा दूषयंस्त्यजतु स्वयमिति॥ ॥एष विद्वा
न् तत्त्वबुभुत्सूनां मध्ये यदा तिष्ठेत् तदा एषां बुभुत्सूनां बोधाय तत्त्वज्ञानजननाय यतः क्रि

विद्याते

मध्ये

क्रै पादुषयनू स्वयमपि स्यजत्तु।। अतएवं कर्तव्यमित्यत आह।। अविद्वदनुसारेणैव वृ
त्तिर्बुद्धस्य युज्यत इति।। अज्ञान्यनुसारेण ज्ञानिनो वर्तनमुचितं। तपालुचो त्तेषाम
नुकंपनीयत्वादिति भावः।। एवं घकादृशमित्यत आह।। सतु तयानुसारेण वर्तितव्यमि
त्याशयत इति।। ।।सानुकूल्यं स्वतनुपानकर्तारं शोकाद्वेद्दसर्थः। पितुस्तनं दृष्ट्वा नुसा
रिण वेमेवदर्शयति अपि चेदि मसु [illegible] इत्ता। उतो वा बालेन स्वपितानतानं क्लिश्यातेन अ
च्छे बालं प्रस्तत [illegible] लये इति।। दार्ष्टांतिके योजयति।। ।।निंदितस्तूयमानो वा
विद्वानज्ञैर्न निंदति। नस्तौति किं तु तेषां स्वाद्यथा बोधस्तथा यतेदिति।। ।।विद्वानज्ञ
र्निंदितस्तूयमानो वा स्वयं तान्न निंदति न स्तौति। किं चैषां अज्ञानिनां यथा बो
धः उपजायते तदतथा चरेत्।। एवमाचरणे निमित्तमाह।। येनायं नटनेनात्र बुध्य
ते कार्यमेव तत्त्वइति।। ।।अयमज्ञानी अत्रास्मिन् लोके विदुषा यादृशेन नटनेना
चरणेन बुध्यते बोधमवगच्छति। तदाचरणं तेन कर्तव्यमेव। तर्हि तथैव कार्यांत
रमपि प्रसज्येतेत्यत आह।। ।।अज्ञप्रबोधनेनैवास्यात्कार्यमन्यत तत्त्वविद इति
।। ।।यतस्तत्त्वविदः तत्त्वविदः। अज्ञलोकेअज्ञप्रबोधादन्यत्कर्तव्यं नैवास्ति
अतस्तदनुसरणेन तत्प्रबोधनं कर्तव्यमित्यर्थः।। ह्रीं तवर्तिष्यमाणयोस्तात्पर्य

र्थमाह। कृतकृत्यतया तृप्तः प्राप्तं प्राप्यतया पुनः। तृप्यन्नेवं स्वमनसा मन्यतेसौ
निरंतरमिति॥ ॥असौ विद्वान् पूर्वोक्तप्रकारेण कृतकृत्यतया कृतकृत्य ज्ञाने
नासौ येन केन कृतकृत्यस्तेनैवस्तता यतः तृप्तः सन् पुनः वक्ष्यमाणप्रकारेण प्रा
प्तं प्राप्यतया प्राप्तं प्राप्यं येन स प्राप्तप्राप्यः तस्य भावस्तत्ता तया तृप्तः सन् तुष्टो
भवन् स्वमनसा निरंतरमेवं मन्यते। किं मन्यत इत्यत आह। धन्योहमित्यादिना
॥ ॥धन्योहं धन्योहं नित्यं स्वात्मानमंजसा वेद्मीदृ ति। धन्यः कृतार्थः न्याद
र्शी विद्वान् नित्यमनवरतं स्वात्मानं स्वस्य निजं रूपं देशाद्यनवच्छिन्नं प्रत्यगा
त्मानमंजसा साक्षादपरोक्षतो वेद्मि जानामि नितरां धन्य इत्यर्थः। एवमात्मज्ञाने पि
नां तुष्टिमभिधाय तत्फलं ब्रह्मानंदनिमित्तं दर्शयति॥ ॥धन्योहं धन्योहं ब्रह्मानं
दो विभाति मे स्पष्टयति॥ ॥ब्रह्मानंदः ब्रह्मरूपस्तत्वानंदः मे स्पष्टं विभाति स्प
ष्टं यथा भवति तथा स्फुरतीत्यर्थः॥ एवमिष्टप्राप्त्या तुष्टिमभिधाय अनिष्टनिवृत्यानु
ष्यतीत्याह॥ ॥धन्योहं धन्योहं दुःखं सांसारिकं न वीक्षे अद्येति अद्य इदानीं सां
सारिकं संसारिणः कर्तृत्वाद्यभिमानतः दुःखसुखरूपसंसारं न वीक्षे न
पश्यामि। अतः कृतार्थ इत्यर्थः॥ दुःखाप्रतीतौ कारणमाह॥ धन्योहं धन्योहं

ज्ञाना नि

रती

स्यस्वज्ञानं पलायितं क्वापीति॥ ॥अनेकवासनाजालकुलमज्ञानं क्वापि प
लायितं नष्टमित्यर्थः॥ ॥अज्ञाननिवृत्तिफलं दृष्टतत्त्वस्य प्राप्तप्राप्यत्वं च दर्शयति
॥ ॥धन्योहं धन्योहं कर्तव्यं मेऽनेन विद्यते किंचित्॥ धन्योहं धन्योहं प्राप्तव्यं सर्व
मेऽद्य संपन्नमिति॥ इदानीं तत्त्वसाक्षात्कारादिना जातायास्तृप्तेर्निरतिशयत्वमाह॥
धन्योहं धन्योहं तृप्तेर्मे कोपमा भवेल्लोक इति॥ इतःपरं वक्तव्यादर्शनात्तु स्फुर ति
सपरितःस्फूर्तिं स्वदर्शयति॥ धन्योहं धन्योहं धन्योधन्यः पुनःपुनर्धन्य इति॥ ॥
अस्य सर्वस्य कारणभूतं पुण्यपुंजपरिपाकं चानुस्मृत्य तुष्यतीत्याह॥ ॥अहो
पुण्यमहोपुण्यं फलितं फलितं दृढमिति॥ ॥एवंविधपुण्यपुंजसंपादकमा
त्मानमनुस्मृत्य तुष्यति॥ ॥अस्य पुण्यस्य संपत्तेरहो वयमहो वयमिति॥
इदानीं सम्यक्ज्ञानसाधनं शास्त्रं तदुपदेष्टारमाचार्यं चानुस्मृत्य तुष्यति
अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुरिति॥ ॥पुनश्च शास्त्रजन्यं ज्ञा
नं तज्जन्यं सुखं चानुस्मृत्य तुष्यति॥ ॥अहो ज्ञानमहो ज्ञानमहो सुखम
हो सुखमिति॥ ॥ग्रंथाभ्यासफलमाह॥ ॥तृप्तिदीपमिमं नित्यं येनु
संदधते बुधाः। ब्रह्मानंदे निमज्जंते तृप्यंति निरंतरमिति॥ ॥ ॥ ॥२

॥छ॥ ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थवि
द्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विरचिता तृप्तिदीप
व्याख्या समाप्ता ॥छ॥ ॥ हरिः ॐ ॥ ॥ सिंहराजाय नमः ॥छ॥
॥ ॥ ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ कूटस्थदीप
स्य व्याख्यां तात्पर्यदीपिकां ॥१॥ मुमुक्षोर्मोक्षसाधनस्य ब्रह्मात्मैक
त्वज्ञानस्य त्वंपदार्थशोधनपरं कूटस्थदीपाख्यं ग्रंथमारभमाणो व्या
ख्यातॄणां ग्रंथस्य वेदांतप्रकरणत्वेन तदीयैरेव विषयादिभिस्तद्वत्तासि
द्धिमभिप्रेत्य त्वंपदलक्ष्यवाच्यौ कूटस्थजीवौ सदृष्टांतौ भेदेन निर्दि
शति यथादित्यदीपितं कुड्यं दर्पणादित्यदीप्तिवत् । कूटस्थभासितो
देहो धीस्थजीवेन भास्यते इति ॥१॥ आदित्यदीपितेत्यादिना यथादित्य
प्रसिद्धः सूर्यः स यथा तेन च तत्संबंधालोकात्मकेन दीपितं प्रकाशितं
कुड्यं दर्पणादित्यदीप्तिवत् दर्पणेषु निपतस्य प्रतिबिंबस्य कुड्यसंबंधे

ख्या

तादिसरश्मिमिश्रितस्य काशमिव कुटस्थेनासितः। कुटस्थेनाविकाशितत्वेन भा
सितः प्रकाशितो देहः॥ धीस्थजीवेन बुद्धिस्थचिदाभासेन भास्यते प्रकाश्यते भा
सिनेन हे भास्यमानो विशेषेणश्च ज्ञडयाच भासकादिस्य प्रकाशं देहमिव देहे भासकं चैत
न्यं हृदयमस्तीति प्रतिज्ञातं भवति॥ ननु तत्र दर्पणादिस्य दीप्तीव्यतिरेकेण स्वादि
स्य दीप्तिर्नोपलभ्यते तद्दृष्टान्तेनाह व्यक्तो विशत्यदर्शयति॥ ॥अनेक दर्पणादिस्थ
दीप्तीनां बहुसंधिषु। दूरे तत्रैव व्यज्यते तासां भावेपि प्रकाशते इति॥२॥ यथानेको
बहुदर्पण अन्याकुड्येतत्र तत्र मंडलाकारश्चिन्नश्च प्रतातश्यन्ते। तासां मध्ये संधिदे
शसामान्य प्रकाशरूपा रवादिस्य प्रभाव्यज्यते अभिव्यक्तोपलभ्यते। तासां दर्पणस्थे
न्यप्रभाणाम भावे दर्पणापगमादिना अभ्यासेये च स्वयं सर्वत्र प्रकाशते॥ ॥दृष्टान्ते
सिद्धमर्थं दार्ष्टान्तिके योजयति॥ ॥चिदाभासविशिष्टानां तथानेकधियामसौ॥
संधौ धीया मत्भावेच भासयन्प्रविविच्यतामिति॥३॥ तदीतैर्नेव प्रकारेणीदाभास
विशिष्टानां चिन्त्यतिबिंबयुक्तानां नैकेधियामनेकासां बुद्धिवृत्तीनां घटज्ञानादिरूपा
णां व्यानां संधिमेतरालेआयदादोधियां तासामभवे बुद्धिवृत्तीनामभावेच सुषुप्त्यादौ
भासयन्प्रकाशयन्सौ कुटस्थप्रविविच्यतां तान्यो नेदेन ज्ञायतामित्यर्थः॥ ॥
इदानीं देहांतःकूटस्थचिदाभासयोर्भेदप्रदर्शनाय देहाद्बहिरपि चिदाभास

था ८

सा
क

ब्रह्मणि विविच्य दर्शयति ॥ ॥ घटैकाकारधीस्था चित् घटमेवावभासयेत् । घट
स्य ज्ञातता ब्रह्मचैतन्येनावभास्यत इति ॥४॥ घटैकाकारधीस्था चित् घटस्यैका
स्याकार इव आकारो यस्याः घटैकाकारा तथा विधायां बुद्धौ वर्तमाना चिदाभा
सः घटमेवावभासयेत् ॥ तस्य घटस्य ज्ञातताख्यो धर्मः । घटो ज्ञात इति व्यवहा
रहेतुर्यः स घटकल्पनाधिष्ठानेन ब्रह्मचैतन्येन साधनभूतेनावभास्यते प्रकाश्य
त इत्यर्थः । ननु ज्ञाततावभासकचैतन्येनैव घटप्रतीतिसद्भावात् बुद्धिं किमर्थं स
र्वा क्ये घटस्य ज्ञातदीतान्नेदसिद्ध्यर्थमाह ॥ ॥ अज्ञातत्वेन ज्ञातोऽयं घटो बुध्युद
यात्पुरा । ब्रह्मणैवापरं तु ज्ञातत्वेनेत्यसौ भिदेति ॥५॥ बुध्युदयात् पूर्वमयं
घटो ब्रह्मणैवाज्ञातत्वेन प्रकाशितः । बुध्युदये सत्यां ज्ञातत्वेन ब्रह्मणैव प्रका
श्यत इति योऽनयोर्भेदः । नान्य इत्यर्थः । नन्वेकस्य घटस्य ज्ञातत्वाज्ञातत्वलक्षणविरुद्धे
धर्मे कथं संभवतीत्याशङ्क्य कालभेदेनाविरोधनाय ज्ञातताज्ञाततानिमित्तयोर्ज्ञानाज्ञानयोः
स्वरूपं दर्शयति ॥ ॥ चिदाभासान्तधीवृत्तिर्ज्ञानं लोहान्तकुन्तवत् । जाड्यमज्ञानमे
ताभ्यां व्याप्तः कुम्भो द्विधोच्यत इति ॥६॥ चिदाभासान्तधीवृत्तिः चेतनाभासश्चिदा
भासश्चित्प्रतिबिम्बः सोऽन्ते पुरोभागे यस्याः सा धीवृत्तिर्ज्ञानमुच्यते । बोधे सा दौबु
द्धि
द्धा

दृ२

द्धिरियाचार्यैरभिधानाच्च दृष्टांतो लोहांतकुंतवदिति ॥ जाड्यं स्वतःस्फूर्तिरहितत्वं चैतन्यं ज्ञान
निरूप्यते । एतावता स्यापर्यायेणाप्याशस्सर्वतस्संबंधः ॥ अज्ञोऽज्ञातदृशि सज्ञानदृतिज्ञो व्याप्तदृ
श्यर्थः ॥ ननु ज्ञातस्य कुंठनस्याज्ञानव्याप्तत्वात्तु ब्रह्मावभासस्य च ज्ञानव्याप्तस्य च ज्ञान
स्य कुंठनस्य कुतो ब्रह्मचैतन्यावभासस्य च मिसाशंक्याज्ञानस्याज्ञातताजननं दृश्यज्ञानस्यापि
ज्ञातताजननमात्रोपक्षीणत्वादज्ञातकं भवत्वज्ञातस्यापि ब्रह्मावभासस्य च न भवतीत्या
ह ॥ ॥ अज्ञातो ब्रह्मणा नास्य ज्ञातं भक्तत्थानकिमिति ॥ ॥ यथा अज्ञातः कंनो ब्रह्मणा
भास्यः तथाज्ञातः कंनो किं ब्रह्मावभास्यो न भवति किंतु भवत्येवेत्यर्थः ॥ ॥ अतदृश्यतमाह
॥ ॥ ज्ञातत्वजननेन चिदाभासपरिक्षयइति ॥७॥ ननु ज्ञातताजननाज्ञानायाज्ञाकिम
नाभिवज्ञातताजननायापि बुध्येवालं किमनेन चिदाभासेन यतः कथंचिदाभासरहिता
या बुद्धेः घटादिवदप्रकाशरूपत्वेन ज्ञातताजननं न संभवतीत्याह ॥ ॥ आभासहीनया
बुध्या ज्ञातत्वं नैव जन्यते । तादृग्बुद्धिविशेषकोमृदादेस्याद्धिकात्रिणादृति ॥८॥ चिदा
भासरहितबुद्धिव्याप्तस्य घटस्य चैतोत्तैज्ञातत्वं दृष्टांतप्रदर्शनेन स्पष्टयति ॥ ॥ ज्ञातत्वं
स्म्यते कुंतो मृदालिमो न अत्र चिन्त्रा । धीमात्रव्याप्तकुंठनस्य ज्ञातत्वं नेष्यते तत्थतेति ॥९॥
लोके कुत्रचित्पिच्छटो मृदाशुक्लुरत्नादिरूपयालिमा लिप्तं ज्ञातत्वैति । नोच्यते यथा
तथा चिदाभासरहितबुद्धिव्याप्तस्यापि कुंठनस्य ज्ञानत्वं भासमपगम्यत इति भावः ॥ ॥ फलि

दर

नै पि ज्ञात स

तमाह॥ ॥ज्ञातत्वं नाम कूटस्थचिदाभासफलोदयमिति। यतः केवलायाः बुद्धेर्ज्ञात
त्वजननासमर्थत्वमतः कूटस्थचिदाभाससंपर्कस्योत्पत्तिरेव ज्ञातत्वं नाम प्रसिद्ध इ
त्यर्थः। नन्वेवमपि चिदाभासोऽनकल्पनीयः ब्रह्मचैतन्यस्यैव फलस्य सद्भावादित्याशंक्या
ह। न फलं ब्रह्मचैतन्यमिति। ब्रह्मचैतन्यं पुरा केवलं घटादिस्फुरणं न भवति अतद्ब्रह्म तत्वा
ह। मानात्प्रागपि सत्त्वात्तदिति। मानात्प्रागपि प्रमाणप्रवृत्तेः पूर्वमपि विद्यमानत्वात् फलस्य
तु तदुत्तरकालीनत्वनियमादिति भावः॥ ॥नन्विदं पराग्अर्थप्रमेयेष्वित्यादिसुरेश्वरवार्ति
कविरुद्धमित्याशंक्य तद्विवक्षितज्ञान [illegible] पदं वाच्यमिति परिहरति॥ ॥पराग्अर्थप्रमेयेषु
या फलत्वेन संमता। संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः इति वार्तिककारेणापि
त्साद्दृश्यं विवक्षितमिति॥ ॥अस्यायमर्थः। पराग्अर्था बाह्याः घटादयः पदार्थाः तेषु
प्रमेयेषु प्रमाणविषयेषु सत्सु या प्रमाणफलत्वेनाभ्युपेता संवित् सैवेहास्मिन् ग्रं
थे वेदान्तोक्तिप्रमाणतः। वेदान्तवाक्यलक्षणेन प्रमाणेन मेयोऽर्थः ज्ञातव्योऽर्थ इत्यनेन
वार्तिककारेण ब्रह्मचैतन्यसदृशश्चिदाभासः प्रमाणफलत्वेन विवक्षितः। ब्रह्मचैत
न्यमिति भावः॥ ॥वार्तिककारेणाभिप्रेतं विवक्षितमनो वा गम्यत इत्याशंक्य तदुक्तमि
श्रीमहाचार्यैरुपदेशसाहस्र्यां ब्रह्मचैतन्यचिदाभासयोर्भेदस्य प्रतिपादितत्वादित्याह
बुद्ध्यात्मफलयोर्भेदः सह स्मृतौ विश्रुतौ यत इति। ब्रह्मचिद्ब्रह्मफलं च ब्रह्मचित्फलयोरिति॰
विग्रहः। एवं च सति प्रकृते किमायातमित्यत आह॥ ॥आभास उदितस्तस्मात्ज्ञा

७२

॥ तत्त्वं जनयेत् घटादौ तत्पुनर्ब्रह्मणाभास्यमज्ञातत्ववदेव हीति ॥ यस्मादुक्तरीत्या फल
योर्भेदः सिद्धस्तस्मात् घटे नहि ततः पुनः आभासश्चिदाभासस्तत्र घटे ज्ञातत्वं जनयेत्
उत्पन्नं तत् ज्ञातत्वं पुनरज्ञातत्ववत् ब्रह्मणो भास्यं न भवतीति हि प्रसिद्धमित्यर्थः ॥१२
एवं ब्रह्मचिदाभासयोर्भेदमुपपादितं विषयभेदप्रदर्शनेन स्पष्टयति ॥ ॥ चिद्वृत्त्या
भासं संभानानां समूहे भास्यते चिद्भासना ॥ अज्ञानमात्रफलं वा स्तरूपकाभासस्ततः स्फुरेदि
ति ॥१३॥ चिता ब्रह्म चैतन्येनेत्यर्थः ॥ चिदाभासस्य कुंभमात्रे सफलरूपत्वात् तेनाभा
सेन स घट एक एव स्फुरेत् भास्यतेइत्यर्थः ॥ ॥ अनस्य चिदाभासब्रह्मणोर्नया...
चे लिंगमाह ॥ ॥ चैतन्यं द्विगुणं कुंभे ज्ञातत्वेन स्फुरत्यतेइति ॥ ॥ अतो घटस्य ब्रह्मचिदा
भासोभयभास्यत्वात् अज्ञातत्वेन द्विगुणं चैतन्यं भाति ॥ इदमेव घटज्ञातताभासकं चै
तन्यं तार्किकैर्नामांतरेण व्यवह्रियत इत्याह ॥ ॥ अन्येनुव्यवसायाख्यमाहुरेतद्यथो
दितमिति ॥१४॥ यथोदितं यथोक्तं एतदेव ब्रह्मचैतन्यमन्ये तार्किकाः अनुव्यवसायाख्यं ज्ञा
नांतरं प्राहुरिति योजना ॥ अयं घट इति ज्ञाते घट इति व्यवहारस्तेदादपि चिदाभासब्र
ह्मणोर्भेदोपगंतव्य इत्याह ॥ ॥ घटोऽयमिति विसा बुद्धिरा आभासस्य प्रसादतः ॥ विज्ञातो
घट इत्येति ब्रह्मानुग्रहतो भवेदिति ॥१५॥ देहादेहि चिदाभासब्रह्मणैवि विविच्येत यथा
तथा देहांतरेश्चिदाभासकूटस्थौ विवेचनीयाविद्याह ॥ ॥ आभासब्रह्मणी देहा

वि

ष्प ॥१६॥

त्र बहिर्यद्वद्द्विवेचिते। तद्वदाभासकूटस्थौ विविच्येतां वपुष्यपीति॥ ननु देहाद्बहिश्चिदाभासव्याप्यघटाद्याकारवृत्तिवदान्तरविषयगोचरवृत्त्यन्तराभावात्कथं तद्व्यापकश्चिदाभासोऽप्युपगम्यत इत्याशंक्य विषयगोचरवृत्त्यभावेऽप्यहमादिवृत्तिसद्भावात्तद्व्यापकश्चिदाभासोऽप्युपगन्तुं शक्यत इति दृष्टान्तमाह॥ ॥अहंवृत्तौ चिदाभासः कामक्रोधाद्यधिकासु च। संव्याप्य वर्तते तप्ते लोहे वह्निर्यथा तथेति॥१७॥ अहमादिवृत्तीनां कामिव चिदाभासं नास्य च दृष्टान्तप्रपंचेन न स्पष्टयति॥ ॥स्वमात्रं भासयेत्तप्तलोहं नान्यत्कदाचन। एवमाभाससहिता वृत्तयः स्वस्वभासिका इति॥१८॥ एवं चिदाभासं व्याख्याय कूटस्थस्वरूपं व्याख्यातुं तदुपयोगीनं वृत्त्यभावावसरं दर्शयति॥ ॥क्रमाद्विच्छिद्य विच्छिद्य जायन्ते वृत्तयः खिलाः। सर्वा अपि विलीयन्ते सुप्तिमूर्छासमाधिष्विति॥१९॥ नन्वेवं समाध्यादौ वृत्तिविलये अनेन कथं कूटस्थोऽपगम्यत इत्याशंक्य वृत्तिनावसा। क्षिवेन सोऽवगम्यत इत्याह॥ ॥संधयोऽखिलवृत्तीनामभावाश्चावभासिताः। निर्विकारेण येनासौ कूटस्थ इति योच्यत इति॥२०॥ वृत्तिसंधयो। वृत्त्यभावश्च येन निर्विकारचैतन्येनावभास्यन्ते स कूटस्थोऽवगन्तव्य इत्यर्थः। एवं च सति किं फलितमित्यत आह॥ ॥घटे द्विगुणचैतन्यं यथा बाह्ये तथान्तरे। वृत्तिष्वपीति। बाह्ये घटे यथा घटमात्रावभासकश्चिदाभासः घटस्य ज्ञाततावभासकं ब्रह्मचैतन्यं चेति चैतन्यद्वैगुण्यं तथान्तरेऽहंकारादिवृत्तिष्वपि वृत्त्यवभासकश्चिदाभासस्तत्साक्षि चेतन्यं चेति द्विगुणं चैतन्यमस्ति। तत्रोपपत्तिमाह

कूटस्थचैतन्यं

घं

ततस्तत्र हि वेदार्थसंधिर्नोचितमिति ॥२४॥ यतो द्विगुणां चैतन्यमास्ते ततः संधितः
संधिन्यस्तत्र त्रिगुणितेषु चैतन्यमधिकं दृश्यतइति शेषः । ननु घटादीनां ज्ञा
ततोऽज्ञातता च नास्ति कथं न स कूटस्थः किं तु घटादिरेवेत्यत आशंक्य तत्र ज्ञाततोऽप्यवा
वादवेद्याह ॥ ॥ज्ञातताज्ञातते स्तो घटवद्बुद्धिमुखायिदिति ॥ ॥तत्रोपपत्ति
माह ॥ ॥स्वस्वेनागृहीतत्वान्नाभिज्ञाज्ञाननाशनादिति ॥२५॥ ज्ञानाज्ञानव्याप्ति
र्ज्ञातताज्ञातते भवतः बुद्धिं तु स्वप्रकाशत्वेन ज्ञानव्याप्तिर्नास्ति नापि वृत्ते
नि... स्वोत्पत्तिमात्रेण स्वगोचराज्ञानस्य निवृत्तिस्तत्त्वाद्ज्ञानव्याप्तिरपि नास्ती
ति भावः । ननु कूटस्थचिदाभासयोरुभयोरपि चिच्चे समाने एकस्य कूटस्थत्वम
परस्य न कूटस्थत्वमित्येतत्कुत इत्याशंक्य चिदाभासस्य निष्ठयोऽजन्मनाशयो
रुत्पद्यमानत्वात्तस्याकूटस्थत्वमितरस्याविकारित्वेन नाशाभावात्कूटस्थत्व
मित्याह ॥ ॥द्विगुणीकृतचैतन्ये जन्मनाशादिदर्शनात् । अकूटस्थं तदन्यत्तु कूटस्थ
मविकारि तद् इति ॥२६॥ चिदाभासस्यादि... कूटस्थापगमस्वकपोलकल्पितमित्या
शंक्याचार्यैः कूटस्थस्योपपादितत्वान्मे... मित्याह ॥ ॥अंतःकरणतद्वृत्ति
साक्षीत्यादावनेकधा कूटस्थ एव सर्वत्र सर्वोचार्यैर्विनिश्चितः इति ॥२७॥ अंतःक
रणतद्वृत्तिसाक्षिचैतन्यविग्रहः । आनंदरूपः सर्वेषां ... किं नाम प्रपद्यसे इद ॥२८॥

नु

स

कूटस्थदी॥ ॥ तृतीय

इत्यादौ। त्रिस्यार्थः। कूटस्थादिभिः चिदाभासोपि तैर्वर्णित इत्याह॥ ॥आभासा नास

श्रयाश्चैवं मुखाभासाश्रयो यथा। गम्यंते शास्त्रयुक्तिभ्यो मिसाध्यो सप्ववर्णित

इति।२६॥ आभासा च आभासश्च आश्रयश्च आभासाभासाश्रयाश्चेति द्वंद्वसमासः।

मुखाभासाश्रयादर्श इति। अत्रापि तथा मुखं प्रसिद्धं आभासो मुखप्रतिबिंबः आश्रयादर्श

पर्णादिश्चेति त्रयं यथा प्रसिद्धमेवं गम्यते एवमाभासः कूटस्थं आभासश्चिदाभा

स आश्रयोन्तःकरणादिति त्रयमपि शास्त्रयुक्तिभ्यामवगम्यते इत्यर्थः। अत्राभास

शब्देन कूटस्थादिभिरिति चिदाभासो वर्णित इति भावः॥ ॥मनसः साक्षी बुद्धे

साक्षि इति बुद्धिसाक्षित्वं प्रतिपादिकं शास्त्रं रूपं रूपं प्रतिरूपो बभूवेति। चि

दाभासप्रतिपादिकं विकारित्वाविकारित्वं तयोर्युक्तिः पूर्वमेवोक्ता इति भावः॥ ॥त

त्र चिदाभासमाक्षिपति॥ बुद्ध्यवच्छिन्नकूटस्थो लोकान्तरगमागमौ। कर्तुं शक्तो घटाका

शइवाभासेन किं वदति।२७॥ स्वास्मिन् कल्प्यमानया बुद्ध्यावच्छिन्नकूटस्थ

[illegible] लोकान्तरगमनागमने कर्तुं शक्नोति अतश्ची

व घटद्वारा घटाकाशवद्बुद्धिद्वारा [illegible]

दाभासकल्पनायां गौरवमिति भावः। असंगस्य कूटस्थस्य बुद्ध्यवच्छेदमात्रेण स्य

पाजीवत्वं न घटते अन्यथातिप्रसंगादिति परिहरति॥ ॥अवच्छिन्नस्य

जीवत्वं न घटेत अन्यथा घटकुड्यादिरवच्छिन्नस्य जीवत्वमिति।२८।

भिच्छेदमात्राज्जीवो नवत्वं हि। अन्यथा घटकुड्यादिरवच्छिन्नस्य जीवता इति शंका॥

तद्भिकुड्ययोः चिदाभासाभावाज्जीवत्वप्रसंगः कते॥ ॥न कुड्यसदृशी बुद्धिः स्वच्छ

७५

न्नादितिवेदितं ॥ ननु स्वच्छत्वं परिच्छेदे प्रयोजनं न भवतीत्याह ॥ तथा व्यस्तनाम
परिच्छेदे किं स्वच्छत्वेन भवेत्तदिति ॥ ॥ तत्क्रममर्थं दृष्टान्तेन स्पष्टयति ॥ २५ ॥ प्रत्यक्षेण दा
रुजन्येन कांस्यजन्येन वा न हि । विक्रेतुस्तंदुलादीनां परिमाणं विशिष्यतइति ॥
दारुकांस्यजन्ययोः प्रस्थयोः स्थितेस्वच्छत्वात् स्वच्छत्वे तंदुलपरिमाणेन न्यूनाधिक्ये
ना सह हत्तेन भवतइत्यर्थः ॥ कांस्यप्रस्थे तंदुलपरिमाणं नावेपि प्रतिबिंबलक्ष
णमाधिक्यमस्तीत्याशंक्य तर्हि बुद्धावप्याभासो भवतेयांगिकृतस्यादित्या
ह । परिमाणाविशेषोपि प्रतिबिंबो विशिष्यते ॥ ॥ कांस्यपदित दावद्बुद्धाव
प्याभासो भवेद्बलात्तइति ॥ २६ ॥ प्रतिबिंबांगिकारेचिदाभासः कथमंगीकृत
स्यादित्याशंक्य प्रतिबिंबाभासशब्दाभ्यामभिधेयस्यार्थस्यैक्यादित्याह ॥ ॥
ईषद्भासं भाभासः प्रतिबिंबस्तथाविधइति ॥ ॥ प्रतिबिंबस्याभासत्वे कथ
मित्याशंक्याभासलक्षणयोगादित्याह ॥ ॥ बिंबलक्षणहीनः सन् बिंबवद्भा
सते स हीति ॥ २७ ॥ हि यस्मात्कारणात् प्रतिबिंबो बिंबलक्षणरहितो बिंबवद्भा
सते अतो बिंबोभास इति भावः ॥ आभासलक्षणयोगित्वमेव स्पष्टयति ॥ ॥
ससंगत्वविकाराभ्यां बिंबलक्षणहीनता ॥ स्फूर्तिरूपत्वमेतस्य बिंबवद्भास
नं विदुरिति ॥ २८ ॥ एतस्य चिदाभासस्य संविदुरिति । एतस्य चिदाभासस्य ससंगत्व

वीकारी तान्त्यां बींबचूना संगाविकारी चैतन्यलक्षणाहीन चं स्फुरणारूपश्च
बींबवदाभासमभिसुर्थः हेतुलक्षणरहिताहेतुवदाभासमानाहेत्वाभासाइति
इक्तं चिदाभासस्याप्रयोजकत्वं निराकृत्य इदानीं तस्य बुद्धेः पृथक्त्वं साधयितुं पू
र्वपक्षमाह। नहि धीभाव भाविवाद्दाभासोस्ति धियः पृथक्॥ इति चेदिति। यद्दीवादि
सत्त्वामेवन्न घटोन मृदात्तिद्यते तद्वदिति भावः। नन्वेवं तर्हि देहोपि तिरिक्तो न सि
ध्येदिति प्रतिबंदिं परिहरति। अल्पमेवोक्तं। धीरप्येवं स्यादेह तदा इति प्रतिबंधिनो यन्न
शंकते। न देहमृतेपि बुद्धिश्चेच्छास्त्रात्सादस्तीति। देहव्यतिरिक्ता या बुद्धिः सविज्ञानोम
यतिरस्यादि श्रुतिसिद्धत्वान्न सत्त्वमिति भावः। ननु श्रुतिबलाद्देहातिरिक्ता बुद्धिः
रप्युपगम्यते चेत्तर्हि प्रवेशश्रुतिबलान्बुद्ध्यतिरिक्तश्चिदाभासोप्यभ्युपेय इत्या
ह॥ ॥तथासति बुद्धेरन्यश्चिदाभासः प्रवेशश्रुतौ श्रुतइति॥ ननु बुद्ध्युपाधिकप्रा
णप्रवेशोस्तु अन्येन तदस्येति शंकते॥ ॥धीयुक्तप्रवेशश्चेदिति॥ एतरेये बुद्ध्य
तिरिक्तस्यैव प्रवेशश्रवणान्नैवमिति परिहरति॥ नैतरेयेत्वपृथक्॥ आत्मप्रवेशसं
कल्पः प्रवीष्ट इति श्रीयते तत्त्वोतश्रुतिमर्थतः पठति। कथं न्विदं साक्षदेहं मदृते
स्यादितीरणात्। विदार्य मूर्धसीमानं प्रविष्टः संसरत्यमिति। अयमात्मा साक्षादेहं अस्मा
द्विचदेश्च साक्षाद्देहः॥ तेनसहवर्तत इति साक्षा देहं जीवं जातं महतं चेतनं मां विना
हायकथं तु स्यात् इति न कथमपि चिनिर्व हेदिति विचार्य तदुद्दसीमानं कपालत्रयमूर्ध

दा उ

श्रि

देशं विदार्य स्वसंन्निधिमात्रेणाधिष्ठाय प्रविष्टः सन् संसरति जाग्रदादिकमनुभव
तीत्यर्थः। नन्वसंगस्यात्मनः प्रवेशोऽयुक्त इति शंकते कथं मसंगस्य संगश्च
दिति। द्वंद्वयोर्द्वयोः सतोरप्यसमानमित्याह। सृष्टिर्वास्य कथं वदेति। सृष्टिकर्तुर्भर्तृ
कर्तृत्वदोषश्च स्यादाशंक्यापरिहारः। एवमर्थे विसमानं ब्रूसाहेमाइ कथं तयोस्सम
मिति प्रज्ञानघनयोर्माइकत्वहेतुत्वसमर्थयत्याह। विनाशश्च तयोरसमर्थ इति प्रज्ञानघनमे

छो

वैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति सोपाधिकरू
पस्य विनाशप्रतिपादिकां श्रुतिं दर्शयति। समुत्थायेति। भूतेभ्यस्तान्येवानुविनश्य

छो

ति। विस्पष्टमिति मैत्रेय्यै याज्ञवल्क्य उवाचाहेति। एष प्रज्ञानघन एवात्मा एत
भ्यो देहेन्द्रियादिरूपेण परिणतकार्येभ्यो निमित्तभूतेभ्यो पाधिभ्यः समुत्थाय
जीवाभिमानं प्राप्य तान्येव देहादीनि विनश्यमानान्यनुविनश्यति तेषु विनष्टेषु नश्य
ति स्वकृतजीवत्वाभिमानं जहातीति एवंप्रकारेण सोपाधिकरूपस्य विनाशित्वं या

अविनाशी वा

ज्ञवल्क्यो मैत्रेय्यै उक्त्वा निरर्थः ॥ ॥ अयमात्मा अनुच्छित्तिधर्मा इति श्रुत्या कूटस्थ

ति

तो विभिन्नः प्रदर्शित इत्याह ॥ ॥ अविनाशी अयमात्मा कूटस्थ एवेति इति ॥ ११
मात्रासंसर्गोऽस्य भवतीति श्रुत्या अविनाशित्वहेतुं च मम संगग्रहं चोक्तवानि
त्याह ॥ ॥ मात्रासंसर्ग इत्युपसंहारोऽस्य संसर्गस्य कीर्तनादिति मियते इति मात्रादेहाद
॥१४॥

यः तान्निरस्यात्मनोः संसर्गो भवतीत्यर्थः॥ ननु जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति॥ ॥श्रुत्यासोपाधिकस्याप्यविनाशित्वं प्रतिपादितं इत्याशंक्य तस्याश्रुतेर्देहांतरप्राप्तिविषयतया नाशं तिकनाशाभावपरत्वं मिस्याह॥ ॥जीवापेतं वाव किल शरीरं म्रीयते न सः॥ इत्यत्र न विमोक्षार्थः किंतु लोकांतरगतिरिति॥ ॥जीवापेतं जीवरहितं जीवेन त्यक्तमिति यावत् वाव लसजीवो न म्रियत इत्यर्थः॥ ननु जीवस्याविनाशित्वेहं ब्रह्मास्मीत्यविनाशी ब्रह्मतादात्म्यज्ञानं न घटत इति शंकते॥ ॥नाहं ब्रह्मेति बुध्येत सविनाशीति चेदिति॥ ॥विनाशी सर्वं वुः॥ अहं ब्रह्मेति ब्रह्मरूपताज्ञानं न बुध्येत ज्ञानी यादृविनाश्यविनाशिनोरकत्वविरोधादिति चेत् मुख्यसामानाधिकरण्याभावेपि बाधासामानाधीकरण्यसंभवात् जीवत्वाभावबाधेन ब्रह्मत्वावोपगंतुं शक्यत इत्याह॥ ॥न तत् सामानाधिकरण्यस्य बाधायामपि संभवादिति॥ ॥बाधासामानाधिकरण्येन वाक्यार्थप्रतिपत्तिप्रकारो वार्तिककारैः सदृष्टांतो विहिता इत्याह तत्रीतमर्थं तद्वाक्योदाहरणं पूर्वकं दर्शयति॥ यो यं स्थाणुः पुमानेष पुंधीयास्थाणुधीरिव॥ ब्रह्मास्मीति धियाशेषा ह्यहंबुद्धिर्निवर्तते निक्षप्यासिद्धान्वक्ष्ये समानार्थेस्य स्थमिति रिदं सामानाधिकरण्यस्य बाधार्थमिति॥ यस्थाणुरेष पुमा

नियस्मिन्वाक्ये पुरुषवचनाधिन स्थाणुत्वबुद्धिर्निवर्त्तते। यथायेवं ब्रह्माहमस्मि
ति बाधेनाहंबुद्धिः। कर्त्ताहमित्येवमादिरूपा सर्वापि निवर्त्तत इत्येवं तु तेन प्रक
रणाचार्यैर्वार्त्तिककारैर्नैष्कर्म्यसिद्धौ सामानाधिकरण्यस्य बाधार्थत्वं स्पष्टमर्थि
तमिति। फलितमाह। नतोस्कदीनेति। नेतः कारणात्ब्रह्माहमस्मीति तत्त
सामानाधिकरण्यस्य बाधार्थत्वमस्तीत्यर्थः। नन्वेवमपि शक्तौ तु बाधासामाना
धिकरण्यं न क्वापि दृष्टमित्याशंक्य सर्वं खल्विदं ब्रह्मेत्यत्र बाधायां सामानाधिकरण्यं
दृष्टमतो नापि न दुष्टमित्याह ॥ ॥सर्वं ब्रह्मेति जगता सामानाधिकरण्यव
त्। अहं ब्रह्मेति जीवेन सामानाधिकरण्येनैव चेदिति ।४८। ननु तर्हि विवरणाचार्यैर्बाधा
सामानाधिकरण्यं कृतो निरास्तमित्याशंक्य तेन ह शब्देन कूटस्थस्य विवक्षि
तत्वादित्याशयेनाह ॥सामानाधिकरण्यस्य बाधार्थत्वं निराकृतं ॥ प्रयत्नतो वि
वरणे कूटस्थत्वविवक्षयेति ।४९। कूटस्थे विवक्षये सक्तमर्थं विवृणोति ॥ शो
धितस्यैव त्वंपदार्थस्य कूटस्थो ब्रह्मरूपतां। तस्य वक्तुं विवरणे नयोक्तमितरत्र
चेति ।५०। शोधितः बुद्ध्यादिभ्यो विवेचितः। त्वं-पदलक्ष्योर्थः कूटस्थस्तस्य
मायालक्षणस्य ब्रह्मरूपतां सत्यज्ञानादिलक्षणब्रह्मरूपत्वं वक्तुं बाधासामा
नाधिकरण्यनिराकरणपूर्वकं मुख्यसामानाधिकरण्यमुक्तमित्यर्थः। इदानीं कूट

स्मृति

ते

विवरणादि

कूटस्थदीप

तृतीय
७८

स्थस्य ब्रह्मणो ऐक्यं संभावयितुं कूटस्थशब्देन विवक्षितमर्थमाह ॥ ॥ देहेंद्रियादियु
क्तस्य जीवाभासभ्रमस्य या । अधिष्ठानचितिः सैषा कूटस्थात्र विवक्षिता ॥ ॥ २३ ॥ आ
दिशब्देन मन आदयो गृह्यंते । एवं च देहेंद्रियादियुक्तस्य शरीरद्वयसहितस्य जी
वाभासभ्रमस्य चिदाभासरूपभ्रमस्य याधिष्ठानचितिः यदधिष्ठानचैतन्यम
स्ति तदत्र वेदांतेषु कूटस्थत्वेन विवक्षितमित्यर्थः । ब्रह्मशब्दस्यार्थमाह ॥ जगद्भ्र
मस्य सर्वस्य यदधिष्ठानमीरितं । त्रय्यंतेषु तदत्र स्यात् ब्रह्मशब्दविवक्षितमिति ॥ २४ ॥
ये इत्यस्त्रं जगत्कल्पनाधिष्ठानं यच्चैतन्यं वेदांतेषु निरूपितं तदत्र ब्रह्मशब्देन
विवक्षितमित्यर्थः ॥ ननु जीवभ्रमाधिष्ठानचैतन्यं कूटस्थ इत्युपपन्नं जीवस्याना
रोपितत्वादित्याशंक्य तस्यारोपितत्वं कैमुतिकन्यायेन साधयति । एतस्मिन्नेव
चैतन्ये जगदारोप्यते यथा । तथा तदेकदेशस्य जीवाभासस्य का कथा ॥ जग
देकदेशत्वं चाज्ञानेन जीवेनात्मनानुप्रवेश्येत्यादिश्रुतिसिद्धं ननु तर्हि जगदधिष्ठा
नचैतन्यस्यैकत्वात्त्वंपदार्थभेदाभावे तत्त्वंपदार्थयोः पौनरुक्त्यमित्याशंक्य
तयोरौपाधिकभेदो वास्तवमैक्यमित्याह ॥ ॥ जगत्तदेकदेशाख्यसमारोप्यस्य
भेदतः ॥ तत्त्वंपदार्थौ भिन्नौ स्तो वस्तुतस्त्वेकता चितेः ॥ २५ ॥ जगदिति तदेक
देशौ इति च आख्यायस्य समारोप्यस्य पतया नृ तावेकवचनं ॥ ॥ ननु यि

जो

दानासंसस्पृशुक्तिकारजतादिवद्ध्यस्तानारोप्यैतन्नयथर्मेव(वा)नुपलंभातू॥ कथमारोपि
तं वा भिसारीं क्याह॥ ॥कर्तृत्वादीन् बुद्धिधर्मान् स्फूर्त्या प्रत्यग्रूपतो दधाति नो ॥ स्वां
त्तिपुरतः॥ व्याप्तासोतोत्रमोन वेदिति॥४९॥ बुध्युपाधि द्वारा समारोप्य आत्मा नानुक
(र्तृ) र्तृत्वादीन् स्फुरणलक्षणात्मरूप चैव तत्स्फुरतो नाति स्पष्टं प्रतिभासते तततः॥ स्फुरत्
पकल्पितं तद्रूपस्यार्थ॥ अस्य त्रमस्य किं कारणमित्याकांक्षायां बुध्यादि स्वरूपापरिज्ञा
नमेवेत्याह॥ ॥कोऽ बुद्धिः कोऽयं माना सको वात्मात्र जगत्कथं इति निर्णयतो मोह इ
ति॥ ॥अस्य निवर्त्तनीयत्वायानर्थहेतुतामाह॥ सोयं संसार इष्यतइति॥५०॥ अस्य
(च) किं निवर्तकमित्याकांक्षायां बुध्यादीनां रूपं एव निवर्तकं इत्यस्ति प्रेरतत्त्वबा न च ज्ञानी (विवेक)
न तत्त्वं वा नर्थनिवृत्तिरित्याह॥ ॥बुध्यादीनां स्वरूपं यो विवित्ति स तत्त्ववित्। स एव
मुक्त इत्येवं वेदान्तेषु विनिश्चय इति॥५१॥ एवं बंधमोक्षौ रविवेकमूलं च सति व्हैतवा (वो)
दिकस्य बंधस्य वा मोक्ष इत्येवमादिरूपास्तार्किकैः क्रियमाणाः कुतर्कमूलाः परिहा
सम्मूला विशेषाः खंडनोक्तयुक्तिभिस्तेषां निरूक्त्यापादनन परिहारणीया इत्याह॥ ॥
एवं च सति बंधस्यात्मस्य इत्यादि अतर्कजाः विडंबनादृदं खंडयाः खंडनोक्तिप्रकार
तइति॥५२॥ एवं श्रुतियुक्तिभ्यां कूटस्थे बुध्यादिभ्यो विविक्तदर्शी इवापुरुषवपि
तद्धि केवलैकतइत्याह॥ ॥वृत्तेः साक्षितया वृत्ति प्रागभावस्य च स्थितः। बुभुत्सा

158

॥५५॥
यो ऽन्तथाऽज्ञो स्मीत्यानानाज्ञानवस्तुनः। असत्यालंबनत्वेन स सत्यः सर्वजीवस्य तु
साधकत्वेन चिद्रूपस्सदा प्रेमास्पदत्वतः ॥५६॥ आनंदरूपः सर्वार्थसाधकत्वेन हेतुना
। सर्वसंबंधवत्वेन संपूर्णः शिवसंज्ञितः इति ॥५७॥ कामादिवृत्त्यस्तोस्सत्तान्त
साक्षित्वेन वृत्तस्थ्य दयात् पूर्वं तत्प्रागभावसाक्षित्वेन जीवात्मा सायां सत्यां तत्साक्षि
त्वेन ततः पूर्वमज्ञोऽस्मीत्यनुभूयमानाज्ञानसाक्षित्वेन यः शिव एवेति इति सचा
सह्यस्य जगत आलंबनत्वेन सत्याधिष्ठानत्वेन सत्यः जडस्य सर्वस्य साधकत्वेन
चिन्नासकत्वाच्चिद्रूपः सर्वदा प्रेमविषयत्वादानंदरूपः सर्वार्थावभासकत्वेन सर्व
संबंधित्वात्संपूर्ण इत्युच्यते। अत्रेदमनुमानं। विमतः शिवो वृत्त्यादिभ्यो भिद्यते
वृत्त्यादिसाक्षित्वात्। यद्यद्वृत्त्यादिभ्यो न भिद्यते तन्न वृत्त्यादिसाक्षी न भवती। य
था वृत्त्यादिजनः शिवो वृत्त्यादि विमतः शिवः सत्यो भवितुमर्हति मिथ्याधिष्ठानत्वात्।
असत्यस्य रजताधिष्ठानशुक्तिवत्। विमतः शिवश्चिद्रूपो भवितुमर्हति। जडमात्रा
वभासकत्वात्। यच्चिद्रूपं न भवति तत्सर्वजडावभासकमपि न भवति। यथा घटादि।
विमतः परमानंदरूपः परप्रेमास्पदत्वात्। यत्परमानंदरूपं न भवति तत्परप्रेमा
स्पदमपि न भवति। यथा घटादौ। विमतः शिवः परिपूर्णो भवितुमर्हति सर्वसंबंधित्वा
त् गगनवत्। सर्वसंबंधित्वं च सर्वार्थसाधकत्वेन। विमतः शिवस्सर्वसंबंधवान्
दि।

१८

सर्वात्मा सन् कथं वायं सर्वसंबंधवान्न भवतीति सर्वस्य सर्वात्मत्वेनासंकोपि न भवति । यथा
दित्यादि इति ॥ ॥ उदाहृतस्य पुराणवाक्यस्य तात्पर्यमाह ॥ इ[illegible] पाद्गु
टस्थः प्रविवेचितः । जीवेशत्वादिरहितः केवलस्वप्रकाशः शिव[illegible] ॥ कौ
र्मपाद्मसूतसंहितादिषु पुराणेषु जीवेश्वरादिकल्पनारहितः केवलोद्वितीयः स्व
प्रकाशः स्वयंप्रकाशचैतन्यरूपं शिवः कूटस्थो विवेचितः तदन्वयः । जीवेशत्वादिर
हितं कूटस्थं तदुक्तमाह शंक्य [illegible] तयोर्माईकप्रदर्शनादित्याह ॥ ॥ मायाभा
सेन जीवेशौ करोतीति श्रुतत्वतः । माईकावेव जीवेशाविति ॥ ॥ जीवेशावाभा
सेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिर्मायाविद्याधीनयोश्जी
दात्मासयोर्माईकत्वं प्रतिपादयतीति भावः । माईकत्वे तयोर्देहादिभ्यो वैलक्षण्यं
न स्यादित्याशंक्य पार्थिवत्वाविशेषेपि काचकुंभस्य घटादिभ्यो वैलक्षण्यमिवा
नयोरपि स्यादित्याह ॥ ॥ स्वच्छो तो काचकुंभवदिति ॥ ननु घटकाचकुंभारंभक
योर्मृद्विशेषकयोर्भेदात्तद्वैलक्षण्यमुचितं । जगज्जीवेश्वरभेदहेतोर्मायाया ए
कत्वात्तयोर्मूर्तौ वैलक्षण्यमनुचितमित्याशंक्यांतः अनयोर्देहमनसोर्यथा वै
लक्षण्यं तद्वदित्याह ॥ ॥ अन्नजन्यं मनो देहात्स्वच्छं यद्वत्तदेवता ॥ मायिकावपि स
र्वस्मादन्यस्मात्स्वच्छतां गतौ ॥ ६० ॥ ननु काचादिवत्स्वच्छत्वं सिद्धं कुतस्तदस्या

शंक्यानुनवादित्याह॥ ॥भिन्नजन्यमनोदेहौ चिद्रूपं चैव संमतं वैचित्र्येनैव प्र
काशनादिति। वैचित्र्येन प्रकाशनमपि मायिकं योरनुपपन्नमित्याशंक्य तस्या दुर्घ
टकारित्वादुपपन्नमित्याह॥ ॥सर्वकल्पनशक्ताया मायाया दुःशकं न हि
ति॥६१॥ उक्तमर्थे कैमुतिकन्यायेन दृढयति॥ ॥अस्मन्मे निद्रापि जीवेशौ चेत
नौ स्वप्रगौ सृजेत्। माहामाया सृजत्येतावित्याश्चर्यं किमत्र तद्॥६२॥ ईश्वर
स्यापि मायिकत्वे तस्य जीववदसर्वज्ञत्वादिकं स्यादित्याशंक्य सर्वज्ञत्वादिक
मपि माययैव कल्प्यत इत्याह॥ ॥सर्वज्ञत्वादिके येनौ कल्प्यत्वात्प्रदर्शयेदि
ति॥ ॥तत्रोपपत्तिमाह॥ ॥धर्मिणं कल्पयेद्यास्याः को भारो धर्मकल्पने इति
॥६३॥ ननु जीवेशयोरिव कूटस्थस्यापि मायिकत्वं प्रसज्येतेति शंकते॥ ॥कूटस्थेऽप
ति शंका स्यादिति चेदिति। प्रमाणाभावान्नैवमिति परिहरति। मा इति शंक्यतां
मिति॥ कूटस्थमायिकत्वे तु प्रमाणं न हि विद्यते॥६४॥ कूटस्थस्य वास्तवत्वेऽपि प्रमा
णानोपलंभ्यत इत्याशंक्य श्रुतयः सर्वा अपि प्रमाणमित्याह॥ ॥वस्तुत्वं घोषयं
त्यस्य वेदांताः सकला अपि। सपत्नरूपं वस्त्वन्यं न सहंते त्र किंचन॥६५॥ अत्र
कूटस्थस्यापारमार्थिकत्वे प्रतिपक्षभूतमन्यद्वस्तु किंचन न सहन्ते इत्यर्थः॥ नु
कूटस्थस्य जीवेशयोर्वा वास्तवत्वं वा वास्तवत्वं वा साधने श्रुतय एव पक्षं ते॥ ॥

श्री

तत्त्वैः किंचिदपि साध्यं न तदृशाशंक्य मुमुक्षूणां श्रुत्यर्थविशदीकरणाय ग्र
न्थान्तरं कोऽपि कस्यासंईसाह ॥ ॥श्रुत्यर्थं विशदीकर्तुमर्मनिर्कानुवच्मि किंचन ॥ तेन
तार्किकशंकानामत्र कोऽवसरो वदेति ॥ ९ ॥ तत्र किमित्यत आह ॥ ॥तस्मात्कु
तर्कं संत्यज्य मुमुक्षुः श्रुतिमाश्रयेदिति ॥ ॥मुमुक्षुणा श्रुत्यर्थः ॥ कीदृशोऽनुसंधेय
इत्यत आह ॥ ॥श्रुता तु माया जीवेशौ करोतीति प्रदर्शिते ईक्षणादिप्रवेशान्ता सृ
ष्टिरीशकृता न वेत्तु जाग्रदादीनि मोक्षान्तः संसारो जीवकर्तृकः ॥ असंग एव कूट
स्थः सर्वथा नास्य विक्रिया न ॥ नवयतिशयस्तेन मननस्यैव विचार्यतामिति ॥ १० ॥ श्रुति
षु जीवेशयोर्माडकत्वं ईक्षणादिप्रवेशान्तस्य सृष्टिरीश्वरकर्तृकत्वं जागृत्स्वप्न
सुषुप्तिषु बंधमोक्षणस्य संसारस्य जीवकर्तृत्वं कूटस्थस्य चासंगत्वादिकं मृति
जन्मादिलक्षणस्य व्यवहारजातस्यासत्यत्वं चा प्रतिपादितं अतो मुमुक्षुरिमं
मर्थं सर्वदा विचारयेदित्यभिप्रायः ॥ कूटस्थे जन्माद्यतिशयाभावः ॥ कृतो वगम्य
तइत्याशंक्य श्रुतिवाक्यादित्यभिप्रेत्य तद्वाक्यं पठति ॥ ॥न निरोधो न चोत्पत्ति
र्न बंधो न च साधकः ॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थतेति ॥ ननु तर्हि श्रुतिषु त
त्र तत्र जीवेश्वरादिस्वरूपप्रतिपादनं किमर्थमित्याशंक्य वाङ्मानसगोचरस्या

कूटस्थदीप

तृतीय

८१

मनो व बोधनाईस्याह॥ ॥अवाङ्मनसगम्यं तं श्रुतिर्बोधयितुं सदा। जीवमी
शं जगद्वापि समाश्रित्य प्रबोधयेदिति॥७१॥ ननु तस्यैकरूपस्य श्रुतिर्बोधये
श्रुतिषु विगानं कथं तद्रूपतदस्याशंक्य न नच विगानमस्ति अपि तु तद्बोधनप्रका
र तदपि बोध्यपुरुषचित्तवैषम्यानुसारेणेति॥ सुरेश्वराचार्यैरुक्तमित्याह॥ ॥
यथा यथा भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि। तानेव सा क्रियेह स्यात्सा। ध्वीसावा
र्थनाथितमिति॥७२॥ श्रुत्यर्थस्यैकरूपत्वे तत्प्रतिपादकानामेव कथं नो विप्रतिप
रित्याशंक्य [illegible]तिना मर्यबोधशून्यानामेव विप्रतिपत्तिः। ननु तद्द्वितीयमित्याह॥ ॥
श्रुतितात्पर्यमखिलमबुध्वा भ्राम्यते जडः। विवेकी त्वखिलं बुद्ध्वा तिष्ठत्यानंद
वारिधाविति॥७३॥ तर्हि विवेकिनो निश्चयः कीदृशस्त्याकांक्षायामाह॥ ॥मायामेघोज
गन्नीरं वर्षत्वेवं यथा तथा। चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिरिति॥७४॥ ग्रं
थाभ्यासस्य फलमाह॥ ॥इमं कूटस्थदीपं ये तु संदधते निरंतरं। स्वयं कूटस्थ
रूपेण दीप्यते सो निरंतरमिति॥७५॥ ॥इति श्रीमत्परमहंसपरिव्राजका
चार्यश्रीभारतीतीर्थविद्यारण्यमुनीवर्यकिंकरेण श्रीरामकृष्णाख्यवि
दुषा विरचिता कूटस्थदीपव्याख्या समाप्ता॥ ॥ ॥८॥ ॥ ॥शुभमस्तु॥छ

श्रीलक्ष्मीनृसींहाय नमः ॥ ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ क्रियते ध्या
नदीपस्य व्याख्या संक्षेपतो मया ॥१॥ इह तावद्वेदान्तशास्त्रे नित्यानित्यवस्तुविवेका
दिसाधनचतुष्टयसंपन्नस्य सम्यक् श्रवणमनननिदिध्यासनानुष्ठानवतस्त्वं
पदार्थविवेचनपूर्वकं महावाक्यार्थापरोक्षज्ञानेन ब्रह्मात्मावलक्षणो मोक्षो भवती
ति प्रतिपादितं । तत्र श्रुतोपनिषत्कस्यापि बुद्धिमांद्यादिना केन चित्प्रतिबंधेन वा
क्यार्थविषयापरोक्षप्रतीत्यनुत्पत्तौ तस्यां तदुत्पादनद्वारा मोक्षसा[illegible]लको= पि
पी साक्षादिव सत्यपि ब्रह्मदोनात्वस्य दृष्टान्ते ब्रह्मतत्त्वोपासनयापि मोक्षो भवतीति प्र
तिज्ञानीते संवादीति संवादिभ्रमवद्ब्रह्मतत्त्वोपासनापि मूलप्रमाणवदिति धियासंब्र
द्धि नेमेपाप्रवृत्तस्यापि प्रतीतार्थलाभो भवति ॥ एवं ब्रह्मतत्त्वोपासनयापि जिल
षितो ब्रह्मात्मावलक्षणो मोक्षो भवतीत्यर्थः ॥ ॥ तत्र किं प्रमाणमित्यत आह ॥
उत्तरतापनीये श्रुतोपास्तिरनेकधेति ॥१॥ यत उपासनयापि मोक्षोऽस्ति अत उत्तरता
पनीयोपनिषद्यनेकप्रकारेण ब्रह्मतत्त्वोपासनं श्रुतमित्यर्थः ॥ संवादिभ्र
मवदिष्टं दृष्टान्तं प्रपंचयितुं संवादिभ्रमप्रतिपादकं वार्तिकं पठति ॥ मणिप्रदी
पप्रभयोर्मणिबुद्ध्याभिधावतोः ॥ मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रतीति ॥२॥
मणिश्च प्रदीपश्च मणिप्रदीपौ तयोः प्रभे मणिप्रदीपप्रभे तयोरिति विग्रहः ॥ मणि

न

प्रभायां दीपप्रभायां च यथा मणिबुद्धिस्साम्येऽप्यर्थे ज्ञानमेव अतस्मिंस्तद्बुद्धि
र्वा ॥ यथापि मणिदीपप्रभायां मणिबुद्ध्याभिधावतः पुरुषस्य मणिलाभो न भव
ति इतरस्य तु सभाक्तीसर्थक्रियायां वैषम्यमस्तीत्यर्थः ॥ वार्तिकं व्याचष्टे दीपोपवर
कस्यांतरित्यादिना श्लोकत्रयेण ॥ ॥ दीपोपवरकस्यांतर्वर्तते तत्प्रभा बहिः दृश्य
ते द्वार्यथान्यत्र तद्वद्दृष्टा मणेः प्रभा ॥ दूरे प्रभाद्वयं दृष्ट्वा मणिबुद्ध्याभिधावतोः ॥ प्र
भायां मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि ॥ न लभ्यते मणिर्दीपप्रभां प्रत्यभिधा
वता ॥ प्रभायां धावता पश्यं लभ्यतेव मणिर्मणिरिति ॥ कस्मिंश्चिन्मंदिरे दी
पवरकस्यांतर्दीपस्तिष्ठति तस्य प्रभा बहिर्द्वारप्रदेशे रत्नमिव दृश्यमानोपलभ्यते
तथान्यस्मिन्मंदिरे अपवरकस्यांतः स्थितस्य रत्नस्य प्रभा बहिर्द्वारप्रदेशे दी
पप्रभेव रत्नसमानोपलभ्यते ॥ तथाविधं प्रभाद्वयं दूरतो दृष्ट्वायं मणिरयं
मणिरिति बुद्ध्या द्वौ पुरुषावभिधावतः तत्र तयोर्द्वयोरपि प्रभाविषये जायमानं
मणिज्ञानं भ्रांतमेव तथापि दीपप्रभायां मणिबुद्ध्याधावतो मणिर्न लभ्य
ते ॥ मणेः प्रभायां मणिबुद्ध्या धावता तु मणिर्लभ्यते वा ॥ न वक्तव्यं वार्तिकेऽर्थ
पद्यते ॥ किमायातमित्यत आह ॥ दीपप्रभामणिभ्रांतिर्विसंवादिभ्रमः स्मृतः ॥
मणिप्रभामणिभ्रांतिः संवादिभ्रम उच्यते ॥ इति ॥ यादीपप्रभायां मणिभ्रांतिर

॥६॥

स्तोस विसंवादी भ्रम इति स्मृतो विहङ्गिमणी लाभालक्षणार्थक्रियारहितमा
।मत्ति। प्रभायां मणिबुद्धिस्कन्नपि लाभलक्षणार्थक्रियावत्वात् संवादि भ्रम इत्यु
च्यत इत्यर्थः। एवं प्रत्यक्षविषयसंवादी भ्रमं दर्शयित्वानुमानविषये तं दर्श
यति। बाष्पं धूमतयावधार्य तत्राग्न्यनुमानतः। वह्निं प्रदीपदीपाल ... संवादि
भ्रमो मत इति ॥७॥ क्वचित् प्रदेशे स्थितं बाष्पं धूमत्वेन निश्चित्य तन्मूलप्रदेशे यत्प्रदेशोऽग्नि
मान् धूमवादिति अनुमाय प्रवृत्तेन पुरुषेणैव गत्वा यदि अग्निस्तत्रोपलभ्यते तदा बा
ष्पविषयं धूमज्ञानं संवादिभ्रमो मतः। सम्मतः। आगमविषयेऽपि तं दर्शयति। गोदा
वर्युदकं गंगोदकं मत्वा विशुद्धये संप्रोक्ष्य शुद्धिमाप्नोति स संवादी भ्रमो मत इति ॥८॥
गोदावर्युदकस्यापि शुद्धिहेतुत्वमागमसिद्धं मतस्तत्प्रोक्षणादपि शुद्धिरस्त्येव अ
थापि गोदावर्युदके यो गंगोदकबुद्धिः सा भ्रान्तिरेव तदुदाहरणान्तरमाह। ज्वरे पासंनि
पातेन भ्रान्त्या नारायणं स्मरन्। मृतः स्वर्गमवाप्नोति स संवादी भ्रमो मत इति ॥९॥ ज्व
रेण सन्निपातं प्राप्तः पुरुषः इदं नारायणस्मरणं मम स्वर्गसाधनज्ञानमन्तरेण यदि सन्नि
पातयुक्तेन च ममवशात् साधारणपुरुषतया चेद्यादि वन्नारायणस्मरणात् ... तः स्व
र्गं प्राप्नोत्येव। हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ॥१॥ अजामिलः पुत्रमुद्दिश्य नारायणेत्याजु- त्रप-
मीलोऽपि नारायणेति म्रियमाणो ... पेति उक्तिमिस्सादि पुराणवचनेभ्यः। अ... चापि

नारायणनामक अनामकवर्णानेत्यादिरेव । एवं संवादिभ्रमोदाहरणसिद्धमर्थमाह ।
प्रत्यक्षस्यानुमानस्य तथा शास्त्रस्य गोचरे । उक्तन्यायेन संवादिभ्रमाः संति हि कोटिशः इति ॥ ७८ ॥ विपक्षे बाधकप्रदर्शनेनोक्तमर्थं दृढयति । अन्यथा मृत्तिकादारुशिलाः स्युर्देवताः कथमिति ॥ अन्यथा संवादिभ्रमाभावे मृदादयः फलसिद्धये देवतात्वेन पूज्यान भवेयुः । स्वतो देवतात्वाभावादित्यर्थः । बाबाधांतरमाह । अग्नित्वादिधीः योषापुरुषादौ कथं वा योषादयः इति पंचाग्निविद्यायां योषा वाव गौतमाग्निः पुरुषो वाव गौतमाग्निः पृथिवी वाव गौतमाग्निः पर्जन्यो वाव गौतमाग्निः असौ वाव लोको गौतमाग्निरित्यादिना कथं योषित्पुरुषपृथिवीपर्जन्यद्युलोकानामग्नित्वोपासनं ब्रह्मलोकावाप्तिफलकं न भवेदित्यर्थः । आदिशब्देन मनो ब्रह्मेत्युपासीत आदित्यो ब्रह्मेत्यादेशः इत्येवं ब्रह्मादृष्ट्यादयो गृह्यंते । इदानीं बहुभिर्ग्रंथैरुपपादितं संवादिभ्रमबुद्धिस्वरूपं संक्षिप्य दर्शयति । अयथावस्तुविज्ञानात्फलं लब्धमितीप्सितं । काकतालीयतः सोयं भ्रमः स्यादिति ॥ ७९ ॥ विहितादविहिताच्चायस्मात् अयथावस्तुविज्ञानात् विपरीतज्ञानादीप्सितमभिलषितं फलं काकतालीयतः दैवाद् वशात् प्राप्यते सोयं संवादिभ्रम इत्यर्थः ॥ ननु ब्रह्मोपासनस्यायथावस्तुविषयत्त्वे कथं सम्यग्ज्ञानसाध्यं मुक्तिफलप्रदत्वमिति आशंक्य संवादीभ्रमवदेव इत्याह ॥

संवादि

सयं भ्रमोपि संवादी यथा सम्यक्फलप्रदः। ब्रह्मतत्त्वोपासनापि तथा मुक्तिफल-
प्रदेति ॥१३॥ ननु ब्रह्मतत्त्वं ज्ञात्वोपासनं क्रियते अज्ञात्वा वा। आद्ये उपासनवैयर्थ्यं मो-
क्षसाधनस्य ज्ञानस्यैव विद्यमानत्वात्। द्वितीये विषयापरिज्ञानादुपासनमेव
न घटत इत्याशंक्याह ॥ ॥ वेदान्तेभ्यो ब्रह्मतत्त्वमखण्डैकरसात्मकं। परोक्षमवगम्यै-
तदहमस्मीत्युपासतइति ॥१४॥ अयमर्थः प्रायः ब्रह्मात्मैकत्वापरोक्षज्ञानस्य मो-
क्षसाधनस्यानुत्पन्नत्वान्नोपासनावैयर्थ्यं शास्त्रात्परोक्षतयावगतत्वान्न ब्रह्म-
णउपासनाविषयत्वमिति। उपास्यब्रह्मतत्त्वगोचरस्य परोक्षज्ञानस्य किं रूप-
मित्याकांक्षायामाह ॥ प्रत्यग्व्यक्तिमनुल्लिख्य शास्त्राद्विष्णवादिमूर्तिवत्। अस्ति
ब्रह्मेति सामान्यज्ञानेनेत्र परोक्षधीरिति ॥१५॥ प्रत्यग्व्यक्तिं बुध्यादिसाक्षिणं पा
मानं दात्मानमनुल्लिख्याविषयीकृत्य सत्यज्ञानादिवाक्यजातात् ब्र-
ह्मास्तीत्येवं सामान्याकारेण जायमानमत्र ब्रह्मण्यस्यामुपासनायां परोक्षधीः परो-
क्षज्ञानं विवक्षितमित्यर्थः। तत्र दृष्टान्तो विष्णवादिमूर्तिवदिति। विष्णवादिमूर्तिप्र-
तिपादकशास्त्रजन्यज्ञानवदित्यर्थः। ननु शास्त्रेण विष्णवादिमूर्तेश्चतुर्भुजत्वादि-
विशेषप्रतीतेस्तज्ज्ञानस्यापि अतः परोक्षत्वमित्याह ॥ ॥ चतुर्भुजाद्यवगतावपि
पि मूर्तिमनुल्लिखन्। अक्षैः परोक्षज्ञानस्यैव न तदा विष्णुमीक्षत इति। शास्त्रेणा-
॥१६॥

शोधं चतुर्भुजादि विशेषप्रतीतावपि चक्षुरादिभिर्विष्ण्वादिमूर्तीनाम विषयी कुर्व
न्नुरूपः परोक्षज्ञान्येव तत्रोपपत्तिमाक्षिपतइति ॥ हा ॥ न तदा विष्णुः साक्षात् इ
तदानुपासनाकाले विष्णुमुपास्य नेक्षते नेन्द्रिये विषयीकरोतीत्यर्थः ॥ ननु वि
ष्ण्वादिगोचरस्य ज्ञानस्य यथार्थत्वे विचाराभावात् भ्रमत्वमित्याशंक्य प्रमाणजन्य
नितत्वान्न भ्रमत्वमित्याह ॥ ॥ परोक्षत्वापराधेन भवेन्नातत्त्ववेदनं । प्रमाणेनैव
शास्त्रेण सत्यमूर्तेर्विभासनादिति ॥ १ ॥ परोक्षज्ञानत्वं भ्रांतिज्ञानत्वे कारणं न भव
ति । किंतु विषयासत्त्वं इह तु प्रमाणान्न तेनैव शास्त्रेणैव यथार्थं दर्पितं तेन शास्त्रे
णैव यथार्थं हृताविष्ण्वादिमूर्तेरवभासनायां न भ्रमत्वमित्यर्थः ॥ ननु सच्चि
दानंदव्यक्त्युल्लेखिनो ब्रह्मतत्त्वज्ञानस्य शास्त्रजन्यस्यापि अतः परोक्षत्वमाशंक्य
परोक्षत्वप्रयोजकप्रत्यक्षोल्लेखाभावादित्याह ॥ सच्चिदानंदरूपस्य शास्त्रा
ज्ञानेप्यनुल्लिखन् । प्रत्यक्षं साक्षिणां तत्तु ब्रह्म साक्षान्न वीक्ष्यत इति ॥ सत्यं ज्ञानम
नंतं ब्रह्मेति सत्यं ज्ञानं बुद्धः सत्योऽहं कोऽनिरंजनः सदिदं सर्वं सन्मयं सदिति ॥ हीदं
सर्वं शासते सादि शास्त्रात् सच्चिदानंदरूपस्य ब्रह्मणो ज्ञानेऽपि प्रत्यक्षं साक्षि
णामनुल्लिखन् तस्य ब्रह्मणः प्रत्यगात्मरूपत्वमजानानस्तत्ब्रह्म साक्षान्न वीक्ष्यते

८४

यार्थ

स्मा

नैव पश्यति। कथं तर्हि तथाविधब्रह्मगोचरस्य ज्ञानस्य तत्त्वज्ञानत्वं सिद्धमित्याशं
क्यागमप्रमाणजन्यत्वादित्याह॥ ॥शास्त्रोक्तेनैव मार्गेण सच्चिदानंदनिश्च
यात्। परोक्षमप्येतज्ज्ञानं तत्त्वज्ञानं न तु भ्रमः इति॥१९॥ तत्त्वज्ञानं परोक्षमपि
शास्त्रोक्तेनैव प्रकारेण ब्रह्मणः सच्चिदानंदरूपत्वनिश्चायकत्वात् सम्यग्ज्ञा
नमेव न भ्रम इत्यर्थः। ननु सत्यज्ञानादिवाक्यैर्ब्रह्मणः सच्चिदानंदरूपत्वेऽभि
हितत्वमस्यादिवाक्यैः प्रत्यग्रूपत्वमपि तस्य बोध्यत एव अतः शास्त्रजनितस्या
पि ज्ञानस्य प्रत्यक्त्वस्य स्फुटप्रतीतेः कथं परोक्षत्वमित्याशंक्याह॥ ॥अत्र य
द्यपि शास्त्रेषु प्रत्यग्ब्रह्मैक्यं वर्णितं महावाक्यैस्तथाप्येतद्दुर्बोधमविचारि
णः॥२०॥ इति यद्यपि वेदांतेषु महावाक्यैर्ब्रह्मप्रत्यक्त्वेनैवोपदिष्टं तथाप्येतत्
प्रत्यग्रूपत्वमन्वयव्यतिरेकाभ्यां त्वंपदार्थविवेकशून्यस्य दुर्बोधं न बो
द्धुं शक्यं। अतः केवलाद्वाक्यान्नापरोक्षज्ञानमुत्पद्यत इत्यर्थः। ननु सम्यग्ज्ञा
नस्य प्रमाणवस्तुपरतंत्रत्वात् प्रमाणस्य तत्त्वमस्यादिवाक्यरूपस्य सद्भा
वात्। वस्तुनश्च ब्रह्मात्मैकत्वलक्षणस्य विद्यमानत्वात् अतो विचारमंतरेण
दुर्बोधत्वमित्याशंक्याह॥ देहात्मात्मच विभ्रांतौ जाग्रत्यां न हठात्पुमान्

दे
तं
स

ब्रह्माद्वैतेन विज्ञातुं समर्थं मंदधीस्तु तत्॥ इति। शास्त्रं सौक्ष्म्यविरोधिनो देहादिद्वैताचि-
धात्मत्व भ्रमस्य विचारमिवर्त्यस्य सद्भावान्निवृत्तेर्यविचारोपेक्ष्यस्य तदसमर्थः॥
ननु देहेंद्रियादिगोचरस्य द्वैतभ्रमस्य सद्भावादद्वैतीतीय ब्रह्मगोचरं परोक्षज्ञा-
नमपि नोदीनीयादित्याशंक्य परोक्षद्वैतभ्रमस्य परोक्षाद्वैतज्ञानाविरोधाच्छ्र-
द्धावतः पुंसः शास्त्रात्परोक्षज्ञानमुत्पद्यत एवेत्याह॥ ॥ब्रह्ममात्रं सुधीर्ज्ञेयं श्रद्ध-
लोः शास्त्रदर्शिनः॥ अपरोक्षाद्वैतबुद्धिः परोक्षाद्वैतबुद्धिनुत् ॥२२॥ अपरोक्षाद्वैतबुद्धिर्द्वय

द्वैत

यतः परोक्षद्वैतबुद्धिनुत्। अतो ब्रह्ममात्रं सुविज्ञेयमिति योजना॥ अपरोक्षभ्र-
मस्यापरोक्षसम्यक्ज्ञानानिराधित्वे दृष्टांतमाह॥ अपरोक्षशिलाबुद्धिर्न परो-

नि

क्षशतां मुदेदिति। द्वैतरोधात्रावमेदो दृश्यदर्शयति। प्रतिमादिषु विष्णुत्वे कोपो वा
विप्रतिपद्यतदानीके चनविप्रतिपद्यमानो कस्तंतदसा शंक्याह॥ अश्रद्धा-
लोर विश्वासात् नोदाहरणमर्हति। अतद्दसतमाह श्रद्धालोरेव सर्वत्र वेदि-
केष्वधिकारितेदृति॥२४॥ सर्वत्र सर्वेषु वेदानुष्ठानेषु श्रद्धावत एवाधिकारित्वा-
दित्यर्थः॥ एतावता परोक्षज्ञानं किमायातमित्य आह॥ सकृदाप्तोपदेशेन प

रोक्षज्ञानमुद्भवेदिति। उक्तमर्थं लोकानुभवेन दृढयति॥ ॥विधूमस्य पदशो
हिनमीमांसामपेक्षितइति॥३४॥ ननु तर्हि श्रुतः शास्त्रेषु विचाराः किंयंतदंसाशं
कयानुष्ठेययोः कर्मोपासनयोः संदेहसंभवात्तन्निर्णयाय विचाराः क्रियंतदू
स्याह॥ ॥कर्मोपास्त्योर्विचार्यत्वमनुष्ठेयाद्विनिर्णयादिति॥ ॥संदेहसंभवमेवो
पपादितं दर्शयति॥ ॥बहुशाखा विप्रकीर्णा निर्णेतुं कः प्रभुर्नरइति॥३५॥ अने
कासु शाखासु तत्र तत्र चोदितं कर्मोपासनं वा एकत्र समाहृत्य निर्णेतुमस्मदा
दिर्नरः कः प्रभुः समर्थः न कोपीत्यर्थः। ननु तर्ह्यनुष्ठेयतत्तत्कर्मोपासनयोः
सामग्र्यासंग्रहं क्याह॥ ॥निर्णितोर्थः कल्पसूत्रैर्ग्रथितस्तावतास्तिकः। विचा
रमंतरेणापि शक्तोनुष्ठातुमंजसेति॥३६॥ जैमिन्यादिभिः पूर्वाचार्यैर्निर्णितोर्थः
अनुष्ठानप्रकारः कल्पसूत्रैः संग्रथितोस्ति। तावता ते ग्रंथितत्वेनैव तेषु विश्वास
वान्पुरुषो विचारं विनापि कर्म सम्यगनुष्ठातुं शक्नोत्येव। ननु तत्रोपासना वि
चाराभावात्तदनुष्ठानं न संभवेदित्याशंक्याह॥ ॥उपास्तीनामनुष्ठानमार्षग्रंथेषु
वर्णितं। विचाराक्षमनराश्च तत्कृत्वोपासते गुरोरिति॥३७॥ आर्षग्रंथेषु ब्राह्म
वासिष्ठादिमंत्रकल्पेषूपासनानुष्ठान प्रकारो वर्णितः। ततो विचाराक्षम

र्थो मनुष्याः कल्प्येषूक्तं प्रतिपादनं गुरुमुखादवगम्यानुतिष्ठन्तीत्यर्थः। ननु तर्हि
दानीं तनैरपि ग्रन्थकर्तृभिर्वेदवाक्यविचारः। कुतः क्रियत इत्याशंक्य स्वबु
द्धिपरितोषायैव क्रियते नानुष्ठानस्य सिद्धये इत्याह॥ ॥वेदवाक्यानि निर्णेतुमि
च्छन्। मीमांसतां जनः। आप्तोपदेशमात्रेण ह्यनुष्ठानं संभवेदिति॥६९॥ ननु
ब्रह्मोपासनवत् ब्रह्मसाक्षात्कारस्याप्युपदेशमात्रादेव सिद्धिः किं न स्यादित्या
शंक्याह॥ ॥ब्रह्मसाक्षात्कृतिस्त्वेवं विचारेण विना नृणां। आप्तोपदेशमात्रेण
न संभवति कुत्रचिदिति॥७०॥ आप्तोपदेशमात्रेण ध्यानासनानुष्ठानोपयोगी परो
क्षज्ञानमुत्पद्यते। अपरोक्षज्ञानं तु विचारमंतरेण न जायत इत्युक्तं। तत्र कारणमा
ह॥ ॥परोक्षज्ञानमश्रद्धा प्रतिबध्नाति नेतरः॥ अविचारोऽपरोक्षज्ञानस्य प्रति
बंधकः॥ एतत् अविश्वास एव परोक्षज्ञानं प्रतिबध्नाति न त्वविचारः। अतस्तत्प्रति
बन्धेऽसत्सद्गुरूपदेशादिव परोक्षज्ञानजन्मोपपद्यते॥ ॥अविचारप्रतिबंधस्य
परोक्षज्ञानस्य विचारद्वारा तन्निवृत्तिमंतरेणोत्पत्तिर्न संभवति। अतो विचारः क
र्तव्य इति भावः। ननु विचारे कृतेऽपि यदापरोक्षज्ञानं न जायते तदा किं कर्तव्य
मित्याशंक्याह। ॥विचार्याप्यपरोक्षेण ब्रह्मात्मानं न वेत्ति चेत्। आपरोक्ष्यावसा
॥७१॥

न वात्मन्यो मन्यो वा विचारयेदिति ॥ २२ ॥ तत्त्वंपदार्थौ सम्यग्विचार्यापि वाक्यार्थे ब्रह्मा
त्मैकत्वं अपरोक्षतया न जानाति चेत् तदापि पुनः पुनः विचारयेव कर्तव्यः अपरोक्षज्ञा
नहेतोरस्याभावादिति भावः ॥ न तु मन्यो मन्यो विचारे पापि इह साक्षात्कारानुदये स
ति विचारो व्यर्थः स्यादित्याशंक्याह ॥ विचारयं नाम मरणं नैषात्मा न लब्धे तेनेत् जन्मांतरे
लब्धे तैव प्रतिबंधासया सत्तिः २३ ॥ न त्विदं कुतोऽवगम्यते इत्याशंक्याह ब्रह्मसूत्रे सूनाथास
नपे ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनादित्यस्मिन्सूत्रे निधानादि साह ॥ इह वाम
त्र वा विद्यैवं स्तत्र दृष्टा सूत्रमिति सति प्रतिबंधे इह जन्मनि अनुत्पन्नैतो श्रुती से
दर्शयति । श्रृण्वंतोऽप्यत्र बहवो यं न विद्युरिति श्रुतिरिति इह जन्मनि श्रवणादि कर्तुं अन्मा
गर्भेषु
तरे प्यपरोक्षज्ञानं भवति । सेयं ऋक् = पिं सन्नेवेषामवेदमहं देवानां जनिमानि विश्वा सा
दि कांश्रुती मर्थतः पठति । गर्भ एव शयानस्सन् वामदेवो बुबुधे वान् । पूर्वान्यस्स
विचारेणेति ॥ इह जन्मन्यनुत्पन्नस्य ज्ञानस्य कालांतरे मतो दृष्टांतमाह ॥ यद्व
दध्ययनादि विधिविति दृष्टांतं विवृणोति ॥ बहुवारमधीतेऽपि तदा नायाति चेत् पुनः ॥
दीनांतरे नाधीयेव पूर्वाधीतं स्मरेद्यु मानदत्तिः २४ ॥ आदि शब्देन परिगृहीता
नी दृष्टांतांतराण्याह ॥ ॥ कालेन परिपच्यंते कृषिगर्भादयो यथेति ॥ दार्ष्टां

तीतिचेद्योजयति ॥ तद्वदात्मविचारोऽपि शनैः कालेन पच्यत इति ॥४१॥ बहुवारं
विचारेऽपि नैव प्रतिबंधबलात् साक्षात्कारो न जायत इत्येतद्वार्तिककारैरपि
निरूपितमित्याह ॥ ॥ पुनः पुनर्विचारेऽपि त्रिविधप्रतिबंधतः । न वेत्ति तत्त्व
मित्येतद्वार्तिके सम्यगीरितमिति ॥४२॥ तान्येव वार्तिकान्युदाहरति ॥ कुतस्तज्
ज्ञानमित्यादि नान्तरतस्य त्रिजन्मानि इरितं तेन ॥ ॥ तत्र तावत्पूर्वमनुसंधेयज्ञा
नस्येदानीमुत्पत्तौ कारणं पृच्छति ॥ कुतस्तज्ज्ञानमिति चेदिति ॥ उत्तरमाह ॥
तद्धि बंधपरिक्षयादिति । बंधप्रतिबंधः तस्य परिक्षयादित्यर्थः ॥ सोऽपि प्रति
बंधो भूतो भावी वर्तमानश्चेति त्रिविध इत्याह ॥ असावपि च भूतो वा भावी
वा वर्तते तथेति ॥४३॥ भवत्वेवं त्रिविधः । ततः किमित्यत आह ॥ ॥ अधीतवेदवेदा
र्थोऽप्यत एव न मुच्यत इति ॥ अत एव प्रतिबंधसद्भावादेवेत्यर्थः ॥ प्रतिबंधे ज्ञानं
नोदेतीति सतत्त्वं ॥ तत्र यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न वि
न्दन्ति । एवमेवेमाः प्रजाः अहरहर्ब्रह्मलोकं गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति । अनृतेन हि
प्रत्यूढा इति श्रुत्या प्रदर्शितमित्याह ॥ ॥ हिरण्यनिधिदृष्टान्तादिदमेव च दर्शित
मिति ॥ ननु अतीतस्य प्रतिबंधकत्वं न दृष्टमित्याशंक्याह ॥ ॥ अतीतेनापि महि
॥४४॥

ध्यानदीप

चतुर्थ

विस्नेहेन प्रतिबंधितः। निःस्नेहत्वेन वदति लोके गाथा प्रगीयते ति॥ अयमर्थः। कश्चि
त्पूर्वं गार्हस्थ्यदशायां कस्यांचिन्महिष्यां स्नेहं कृत्वा पश्चात् संन्यासानंतरं श्रव
णप्रवृत्तोपि तेनैव स्नेहेन जनितात् प्रतिबंधात् तत्त्वं गुरूपदिष्टमपि न ज्ञातवा
न् इत्येवंविधा गाथा लोके प्रगीयते सा उत्तरावादिषु पठितेत्यर्थः। गतहिंतया। विध
स्य कथं ज्ञानोत्पत्तिरित्यत आह॥ ॥अनुस्मृत्य गुरुः स्नेहं महिष्यां तत्त्वमुक्तवान्॥
ततो यथावद्वेदैष प्रतिबंधस्य संक्षयादिति॥ गुरुः तस्य तत्त्वोपदेष्टा तदीयम
हीविस्नेहमनुस्मृत्य तस्यामेव महिष्यां तन्महिषी उपाधिकं ब्रह्मोक्तवान्। ततः
सोपि महिषीस्नेहलक्षणप्रतिबंधकापगमे गुरूपदिष्टं तत्त्वं यथावत् शास्त्रो
क्तप्रकारेणैव ज्ञातवानित्यर्थः। एवं भूतं प्रतिबंधं प्रदर्श्य वर्तमानं दर्शयति।
प्रतिबंधो वर्तमानो विषयासक्तिलक्षणः। प्रज्ञामांद्यं कुतर्कश्च विपर्ययदुराग्रहः इ
ति॥ वर्तमानप्रतिबंधश्चित्तस्य विषयासक्तिरूपाद्येकः। प्रज्ञामांद्यं बुद्धेस्तत्त्वग्रहणा
क्षमत्वं कुतर्कश्च स्वबुद्ध्या तार्किकत्वेन श्रुत्यर्थस्यान्यथोहनं। विपर्ययः दुराग्रहः। वि
पर्ययः आत्मनः कर्तृत्वादिधर्मयुक्तत्वज्ञानं तल्लक्षणो दुराग्रहः। युक्तिरहितोऽभिनिवे
शः। एतेषामन्यतमस्यापि सद्भावे ज्ञानं नोत्पद्यत इत्यर्थः। अस्यापि प्रतिबंधस्य केनापि

इति निरस्यन्नाह ॥ शमाद्यैः श्रवणाद्यैश्च तत्र तत्रोचितैः क्षयं ॥ नीतेस्मिन्प्रतिबंधे
तः स्वस्य ब्रह्मत्वमश्नुते इति ॥ शमादयः शांतो दांत उपरतस्तितिक्षुः समाहि
तो भूत्वेति श्रुत्युक्ताः श्रवणादयः । श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्याभ
भिहिताः । एतैः साधनैस्तत्र तत्र तस्य प्रतिबंधस्य निवर्तिते । उचितैर्योग्यैस्तैः स्मि
न्न तस्मिन्प्रतिबंधे क्षयं नीते सति विनाशिते सति अतः प्रतिबंधापगमाद्वे
व स्वस्य स्वप्रत्यगात्मनो ब्रह्मत्वं प्राप्नोतीत्यर्थः । इदानीं भाविप्रतिबंधं दर्शयति । आ
गामिप्रतिबंधश्च वामदेवे समीरित इति ॥ ॥ आगामिप्रतिबंधो जन्मांतरहेतुः
प्रारब्धशेष इत्यर्थः । तस्य च भोगमंतरेणानिवृत्तेर्वा तन्निवृत्तौ कालनियमो
नास्तीत्याह ॥ ॥ एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिरिति । एकेन जन्म
ना क्षीणो वामदेवस्येति शेषः । भरतस्य त्रिजन्मभिः क्षीण इत्यनुषज्यते । नन्वेकेन त्रि
जन्मभिरिति नियता कालत्वं भवतीत्याशंक्याह । योगभ्रष्टस्य गीता
यामनिते बहुजन्मनि प्रतिबंधक्षयः । प्रोक्त इति योगभ्रष्टः । आ साक्षात्कारपर्यंत
विचारसहित इत्यर्थः । ननु तस्य विचारो निष्फलः स्यादित्याशंक्याह । विचारोऽप्यनर्थ

॥८८॥

कइति।प्रतिबंधनिवृत्तिर्नैरमेवापरोक्षज्ञानलक्षणफलसंभवादिति भावः॥गीतायां
प्रति बाधिकमर्थं दर्शयति। प्राप्य पुण्यकृतामित्यादिना नतो यातिपरांगतिं मियं तेन
प्राप्य पुण्यकृताल्लोकानात्मतत्त्वविचारतः। शुचीनां श्रीमतां गेहे साभिलाषो भिजायते
ति। योगभ्रष्टः आत्मतत्त्वविचारबलादेव पुण्यकृतां पुण्यकारिणां लोकविशेषानूप्रा
प्य तत्र बहुकालं सुखं अनुभूय तद्भोगावसाने साभिलाषश्चेत् अस्मिन् लोके शुचीनां
मात्रतः पितृतः शुद्धानां श्रीमतां कुले भिजायते पक्षांतरमाह। अथवा योगिनामेव कुले
भवति धीमतां॥ निस्पृहो ब्रह्मतत्त्वस्य विचारात्तिदि॥ निस्पृहः स्वयं अति वीरत्तः श्चेत्
ब्रह्मतत्त्व विचारादेव धीमतां आत्मतत्त्व निश्चयविचारवतां योगिनां चित्ते काप्येव जैनेत
कुले भवति॥ यतत्र्दृष्टार्थः। एवस्मादत्र कोतिशयइसत आह। तद्धि दुर्लभमिति॥ हि
यस्मात्कारणात् योगीकुले जन्म दुर्लभं। अल्पपुण्येनालभ्यं इत्यर्थः। तस्य दुर्लभत्व
मुपपादयति। तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं। यततेच ततो भूयः ततस्मादेतद्धि दु
र्लभमिति॥ हि यस्मात्कारणात् तत्र तस्मिन् जन्मनि पौर्वदेहिकं पूर्वदेहे भवं तं बुद्धि
संयोगं च तद्विचारगोचरबुद्धिसंबंधं सिद्धं लभते। प्राप्नोति केवलं बुद्धिसंबंधमा
त्रलाभः। ततः पूर्वस्मादप्रयत्नात् भूयो यततेच। अधिकं प्रयत्नं करोति तस्मादेतद्

ना ॥८८॥ कं

जन्मदुर्लभमित्यर्थः ॥ अभ्यासे कारणमाह ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि स॥
अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति ॥ स योगभ्रष्टः तेन पूर्वाभ्यासेनैवाव
शोपि स्वाधिनोपि ह्रियते आकृष्यते एवमनेकेषु जन्मसु कृतेन प्रयत्नेन संसिद्धः स्त
त्वज्ञानसंपन्नस्ततस्तस्मात्तत्त्वज्ञानात्परां गतिं याति मुक्तिं प्राप्नोतीत्यर्थः ॥ आग
मिप्रतिबंधांतरं दर्शयति ॥ ब्रह्मलोकाभिवांछायां सम्यक् सत्यां निरुध्य तां ॥ विचा
रयेद्य आत्मानं न तु साक्षात्करोत्ययमिति ॥ ब्रह्मलोकप्राप्तीच्छायां दृढायां सत्यां
तां निरुध्य य आत्मानं न विचारयेत् तस्य साक्षात्कारो नैव जायते इत्यर्थः ॥ न तर्हि
तस्य कदाचिन्मुक्तिर्न स्यादित्याशंक्याह ॥ वेदांतविज्ञानसुनिश्चितार्था इति शास्त्रतो ब्र
ह्मलोके स कल्पांते ब्रह्मणा सह मुच्यत इति ॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्या
सयोगाद्यतयः शुद्धसत्त्वाः ते ब्रह्मलोकेषु परांतकाले परामृतात् परिमुच्यंति सर्वे
ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यांते कृतात्मानः प्रविशंति परं पदमित्या
दि शास्त्रवशात् ब्रह्मलोकप्राप्त्यनंतरं तत्त्वसाक्षात्कारस्य ब्रह्मणा सह मुक्तिर्निर्विषय इत्य
र्थः ॥ एवं तत्त्वविचारे क्रियमाणेपि प्रतिबंधवशादत्र साक्षात्कारो न जातस्तदस्य निर्धार्य
ति प्र... पापिनां तु सोपि विचारो दुर्लभ इत्याह ॥ केषांचित्स विचारोपि कर्मणा प्रतिबध्य

तद्दति। तत्र प्रमाणमाह। श्रवणायापि बहुभिर्यो न लभ्य इति श्रुतेरिति। यः परमात्मा
बहुभिः पुरुषैः श्रवणायापि श्रोतुमपि न लभ्यः दुर्लभ इत्यर्थः। एतावता सति प्रति
बंधे तत्पर्यालोचनात्साक्षात्कारः तत्साधनं वृत्तौ विचारश्च न संभवति। इत्यभिप्रायः। इदानीं
विचारासमर्थे पुरुषार्थोऽधिना किं कर्तव्यमित्यपेक्षायामाह॥ ॥विचाराक्षमो मर्त्यश्च
तद्ब्रह्मचोपासते गुरोरिति॥ यत्प्रतिज्ञातं तदुपपादयति। यं संतबुद्धिमांद्याद्वा सामग्र्य
भावाप्यसंभवात्। यो विचारं न लभते ब्रह्मोपासितस्सो निश्चितमिति॥ ॥सामग्र्यसंभव
नाम तच्चोपदेष्टुर्गुरोरध्यात्मशास्त्रस्य देशकालादेर्वा असंभवः। तस्माद्विसर्थेन
नु निर्गुणब्रह्मतत्त्वस्य गुणरहितत्वात् तदुपासनं न घटते तद्ध्यानं क्वचिदुपासनस्य प्र
त्ययावृत्तिरूपत्वात्। सगुणब्रह्मणीव निर्गुणेपि तत्संभवतीत्याह॥ निर्गुणब्रह्मत
त्त्वस्य न ह्युपास्तेरसंभवः। सगुणब्रह्मणीवात्र प्रत्ययावृत्तिसंभवादिति॥ ननु नि
र्गुणस्य ब्रह्मणो वाङ्मनसगोचरत्वाभावान्नोपास्यमित्याशंक्य वेदनपक्षेप्ययं दो
षः समानमित्याह॥ अवाङ्मनसगम्यं तन्नोपास्यमिति चेत्तदा॥ अवाङ्मनसग
म्यस्य वेदनं न च संभवेदिति॥ ननु ब्रह्म वाङ्मनसगोचरमित्यवेत्तुं शक्यमित्याशं
क्य एवमेवोपासितुमप्यविशक्यमित्याह॥ वागाद्यगोचराकारमित्येवं यद्विजानसो
॥वागाद्यगोचराकारमित्युपासितनो कुतद्दति॥ ब्रह्मणानुपास्यत्वं निर्गुणत्वे प्रसं

प्रसज्येतेत्याशंक्य वेद्यत्वेपि तदुपास्त्यादित्याह॥ ॥सगुणत्वेनुपास्त्यस्याघृदि
घचतोपि तदिति। तत्सगुणत्वमित्यर्थः। ननु सगुणाद्यभ्याश्रयाणां वेद्यत्वे सगुण
त्वप्रसंग इत्याशंक्योपासनमपि तथैव विद्यतामित्याह॥ वेद्यत्वे लक्षणावृत्या ल
क्षितसमुपास्यतामिति। ननु ब्रह्मणो नोपास्यत्वं श्रुत्या निषिध्यत इत्याशंक्य तदेव ब्रह्मत्वं वि
द्धि तदेव त्वं न चेदं यदुपासत इति श्रुतेरुपास्यत्वं निषिद्धं ब्रह्मणो यदि ति॥ यन्म
नसा न मनुते येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते इति श्रुतिः स्व
परब्रह्मत्वं निषेधतीत्यर्थः। वेयदवाङ्मनसगम्यं तदेव ब्रह्म विद्धि। इदमिति यदुपा
सते पुरुषास्तन्न विद्धीति योजना। उपास्यत्व वेद्यत्वस्यापि तन्निषेधः समानमि
त्याह। विदितावन्यदेवेति श्रुतेर्वेद्यत्वमस्य नो॥ ॥अन्यदेव तद्विदितादथो अवि
दितादधीति श्रुतौ ब्रह्मणो वेद्यत्वमिति निवार्यतीत्यर्थः। विदितादन्यत्
इत्यर्थः। विदिताविदिताभ्यामन्यद्ब्रह्मेति श्रुतिः प्रतिपादयतीति त्यक्त्वेति तये
वतद्भानियादित्याशंक्योपासनेपि तत्समानमित्यासंक्याह। यथाश्रुत्यैव वेद्यत्वे
दाश्रुत्यामुपास्यतामिति। ननु वेद्यत्वं ब्रह्मणो वास्तवं न भवति सानां क्योपास्यत्व
मपि तथेत्याह॥ ॥वास्तवी वेद्यता नाथ उपास्यत्वं तथा न किमिति॥ ननु
वदनपक्षे वृत्तिर्ब्रह्माकारचमात्ति। नोपासनमित्याशंक्य शब्दबलात् मदाकार र

शास्त्या

(४)

ऽन्यत्र समानमित्याह॥ ॥वृत्तिर्व्याप्तिर्वर्ज्यतां तद्वदुपास्यत्वेपि तत्त्वमसि निर्गुणे
ऽप्युपालंभस्तत्पक्षेपि समानमित्याह। का = ते नो॥ रूपस्तोचेतकस्ते
दृष्टत्वादीदृश्यते ति। ननु निर्गुणोपासने प्रमाणाभावात्। तत्रीयां॥ क्याऽनेकासु श्रुति
षूपलभ्यमानत्वान्नैवमित्याह॥ ॥नानानाबोनवाक्योऽस्या बहुश्रुतिषु दर्शना
दिति॥ ॥बहुश्रुतीषु दर्शनादित्येतमर्थं विवृणोति। उत्तरस्मिन्तापनीये प्र
श्नप्रश्नेऽन्यकाठके मंडुक्यादौ च सर्वत्र निर्गुणोपास्तिरिरितत्ति॥ तापनीयोप
निषदि तावद्देवा ह वै प्रजापतिमब्रुवन्। अणोरणीयांसमिमममात्मानमोंका
रं नो व्याचक्ष्वेत्यादिना बहुधा निर्गुणोपासनमभिधीयते॥ प्रश्ने प्रश्नो
पनिषदि पंचमे प्रश्ने यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभि
ध्यायीतेति। काठकवल्ल्यां सर्वे वेदा यत्पदमामनंति तपांसि [illegible] इत्युपक्रम्य॥ एतद्ध्येवाक्ष
रं ब्रह्म एतदालंबनं श्रेष्ठमित्यादिना प्रणवोपासनमुच्यते। मांडुक्योपनिषदि
ॐमित्येतदक्षरमिदं सर्वमित्यादिना [illegible] तिन्नरीयोपासनमभिधी
यत इत्यर्थः। आदिशब्देन तैत्तिरीयमंडुकादयो गृह्यंते। ननु निर्गुणोपासनं
कथमनुष्ठेयमित्यत आह। अनुष्ठानप्रकारः पंचीकरणादावीरितः इति। नन्व

य

द्वा

पा

नुपासनं ज्ञानसाधनमेव न मुक्तिसाधनं इत्याशंक्य ब्रह्मन् त्वोपास्यापि मुच्य
तइति वदतां अस्माकमनुकूलं इत्याह॥ ज्ञानसाधनमेतच्चेन्नोतिके नेत्थं वणि
तं॥ ननु सगुणोपासनमेव सर्वैरनुष्ठीयते न निर्गुणोपासनमित्याशंक्य तस्य
प्रमाणसिद्धस्यापलापो न युक्त इत्याह॥ ॥नानुतिष्ठति कोप्येतदिति चेन्नानुति
ष्ठतु। पुरुषस्यापराधेन किं नु पास्तिः प्रदूष्यतीति॥ ॥प्रमाणसिद्धस्यानुष्ठाना
भाव नापरित्याज्यत्वे दृष्टांतमाह॥ ॥यतोप्यतिशयं मत्वा मंत्रान्वश्याधिकारि
णः। मूढा जीवंतु तेन्योपि मूढाः स्युर्निरुपासनम् इति। अयमभिप्रायः। यथा सगुणो
पासनेन्यः कालांतरभावि फलत्वाद्वश्यादिकारिमंत्रे वैदिकफलप्रदत्वं नाति
त्याज्य बुध्वा मूढानां तत्र अनुष्ठाने प्रवृत्तावपि विवेकिभिः सगुणोपासनं न परित्यज
ति॥ ॥यथा वा नियमानुष्ठाना सिद्धेभ्यस्तेभ्यो विमंत्रेभ्यः लब्धा त्ववति नियम
मनैरपत्यं मत्वा मूढतराणां तत्र प्रवृत्तावपि न तन्मंत्रानुष्ठानं सज्यते तथा सो
सारिकफलेष्वेतेषां निर्गुणोपासनानुष्ठानेत्वावेपि न तु मूढत्वान्निर्गुणोपासनस
त्यतद्दवि। एवं प्रासंगिकं परिसमाप्य प्रकृतमनुसरति॥ ॥तिष्ठंतु मूढाः प्रकृताः नि
र्गुणोपास्तिरीरितइति॥ ॥सर्ववेदांतप्रसंगचोदनाद्यविशेषादितोकन्यायेन

खा

निर्गुणोपासनस्यैकत्वान्नास्त्यशेषाशुभ्रतासु पास्यगुणानकत्रोपसंहृत्योपा
सनं कर्तव्यमित्याह। विद्यैक्यात्सर्वशाखास्थानां गुणानामत्रोपसंहृतिरिति॥ ॥वैस
गुणादिः प्रकारो विधेया निषेध्याश्चेति। तत्रानंदो ब्रह्म। विज्ञानमानंदं ब्र
ह्म। नित्यः शुद्धो बुद्धः सत्य एको निरंजनो विभुरद्वय आनंदः परः प्रत्यगेकरसइ
त्यादयो ये विधेयगुणास्तेषामुपसंहारः। आनंदादयः प्रधानस्येत्यस्मिन्नधिकर
णे निहितं इत्याह॥ ॥आनंदादेर्विधेयस्य गुणसंघस्य संहृतिः। आनंदादय
इत्यस्मिन् सूत्रे व्यासेन वर्णिता इति। यच्चास्थूलमनण्वह्रस्वं यत्तदद्रेश्यमग्राह्य
मशब्दमस्पर्शमरूपमव्ययमित्यादयो निषेध्या गुणास्तत्र तत्र श्रुतास्तेषा
मुपसंहारः। अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदु
क्तमित्यस्मिन्नधिकरणे निहितं इत्याह॥ ॥तथा व्यासेन सूत्रेऽस्मिन्नुक्तोऽक्षर
धीयां त्विति॥ ॥ननु निर्गुणब्रह्मविद्यायां गुणोपसंहारो नैवोपयुज्यते। निर्गु
णविद्यायाश्च विरोधादित्याशंक्य सूत्रकारेणैवाभिनस्योपसंहारस्यास्मान्निर
द्विधियमानत्वात्। नास्मान्प्रतीदं चोद्यमुचितमित्याह॥ ॥निर्गुणब्रह्मणश्चास्य
विद्यायां गुणसंहृतिः। न युज्यते कृपालेनो व्यासप्रष्टैव मां तु नेति॥ ॥हिरण्यश्म
श्रु चादिगुणविशिष्टमूर्तीनामनन्तिध्यानादिदं निर्गुणोपासनमवति यत्तत्र हिन

ध्यानदीप

विरोध इत्याह ॥ ॥हिरण्यश्मश्रुसूर्यादिमूर्तीनामनुपादृतेः॥ अविरुद्धं निर्गुणत्वमिति चेत्तुष्यतां हृदये ति॥ हिरण्यश्मश्रुसूर्यादिमूर्तीनां हिरण्मयानि श्मश्रूणि यस्यासौ हिरण्मयश्मश्रुः। तथाविधः सूर्यो हिरण्मयश्मश्रुसूर्यः। स आदिर्येषां ते हिरण्मयश्मश्रुसूर्यादयः। तेषां मूर्तयो हिरण्यश्मश्रुमूर्तयः। तासामिति विग्रहः॥ ॥ नन्वानंदादीनां स्वरूपलक्षणानां यद्गुणानामनुपास्यत्वं तत्प्रवेशाभावात् तद्गुणविशिष्टत्वेन कथमुपास्यत्वमित्याशंक्य नेषां तद्वत् तत्प्रवेशाभावे विरोधः लक्षकत्वसंभवात् तैर्लक्षितं ब्रह्मोपास्यमित्याह॥ ॥गुणानां लक्षकत्वेन तत्त्वे तत्प्रवेशनात् इति चेदस्त्वेवमेव ब्रह्म तत्त्वमुपास्यतामिति॥ ॥तदुपासनाप्रकारमेव दर्शयति। आनंदादिभिरस्थूलादिभिः श्यामात्रलक्षितः। अखंडैकरसः सोऽहमस्मीत्येवमुपासीतेति॥ ॥आनंदादिभिरस्थूलादिभिश्चात्मा गुणैर्लक्षितः सोहमस्मीत्येवमुपासीत। एवमुक्ते वदति। नन्वेवं सति विद्योपासनयोः कुतो भेद इत्याशंक्य वस्तुतत्त्वैकत्वेपि तयोर्भेदं दर्शयति। बोधोपास्त्योर्विशेषः क इति चेदुच्यते शृणु॥ ॥वस्तुतंत्रो भवेद्बोधः कर्तृतंत्रमुपासनमिति वैलक्षण्यादिरसिद्धये बोधस्वरूपं दर्शयति॥ ॥विचारा

९२

ध्या

भूमा तदिति इत्यादिना श्लोकद्वयेन ॥ ॥ विचाराज्जायते बोधो नेच्छायं न निवर्तयेत् ।
स्वोत्पत्तिमात्रात् संसारे दहत्यखिलसत्यता ॥ ॥ एतावता सततमभ्यासेन संनिहितमुमु-
पागतः जीवन्मुक्तिमनुप्राप्य प्रारब्धक्षयमीक्षत इति ॥ ॥ विचारादुत्तरश्लोकेन च विचा-
रात् बोधो जायते । किंच विचारबलाज्जायमानं यं बोधं स निजो बोधो मा स्वादि-
च्छारूपान्न निवर्तयेत् तन्न निवारयेत् । उत्पद्यमानश्च बोधः स्वजन्ममात्रात् सं-
सारोऽखिलस्य प्रपंचस्य सत्यतां दहति नाशयति तावत्तज्ज्ञानोत्पत्तिमात्रेण निरति-
शयं सुखं प्राप्नोतीत्यर्थः ॥ उपासनायाश्च बोधादेव लस्यध्यान्तरासिद्धेय तद्दर्शा-
यति ॥ ॥ आप्तोपदेशं विश्वस्य श्रद्धालुर्विचारयन् । चिंतयेत् प्रत्ययैरन्यैरनं-
तरितवृत्तिर्निरिति ॥ ॥ आप्तस्य गुरोरुपदेशं उपास्यस्वरूपं इति पादकवाक्य-
जातं विश्वस्य विश्वासं कृत्वा विचारयन् उपास्यतत्त्वं प्रत्ययैरन्यैर्घटादिविष-
यैरनंतरितवृत्तिर्निश्चिंतयेदिति । कियंतं कालं चिंतयेदित्यत आह ॥ ॥ याव-
द्ब्रह्मस्वरूपवोद्भिमानस्य जायते । तावद्विचिंत्य पश्चाच्च तथैवामृति धारये-
दिति ॥ ॥ उपासकस्य यदुपचारिमानमुदाहरणप्रदर्शनेन स्पष्टीकरोति ॥
ब्रह्मचारी भिक्षमाणो युक्तः संवर्गविद्यया । संवर्गरूपतां चिंतयेत् चिंताभ्य-

त्ति सतदृति॥ ॥कश्चित्संवर्गचतुर्गुणविशिष्टः। प्राणोपासको ब्रह्मचारी शौनका
हर पार्श्वमागत्याभिप्रतारिनाम्नो राज्ञः। पुरतो महात्मनश्चतुरो देव एकः क
स्सो जगार भुवनस्य गोपाः। तं कापेय नाभिपश्यंति मर्त्याः। अभिप्रतारिन् बहुधा
तिं संवस बोधातिमंत्रेण स्वात्मनः संवर्गरूपं चित्ते धृतं। प्रकटितवान्
इति छांदोग्ये श्रूयत इत्यर्थः। अमूर्तिधारणानिमित्तं दर्शयन् न विद्यायं नानि
वर्तयेदित्युक्तं तत्र बोधोत्पत्तिलक्षणमाह॥ ॥पुरुषस्येच्छया कर्तुमक
कर्तुं कर्तुं वैमन्यथा। शक्योपास्तिरतो नित्यं कुर्यात्प्रत्ययसंततिमिति॥ ॥उ नि
पास्तिः पुरुषस्यार्हत्वोक्त स्वेच्छया कर्तुमकर्तुमन्यथा प्रकारांतरेण वा कर्तुं कर्तुं शक्य
त्वात॥ पुरुषस्येच्छाधीनत्वादुपासनं सर्वथा कुर्यादित्यर्थः। एवं सदा चिंतनीयं
भवतीत्यत आह॥ वेदाध्यायी ह्यप्रमत्तोऽधीते स्वप्नेऽपि पीसितः। जपिता तु जप
त्येव तथा ध्याता तां विपाश्येयेदिति॥ ॥अप्रमत्तो वेदाध्यायि सदा वेदाध्ययन
शीलः। जपिता सदा जप अभ्यासो वा दृढवासनया स्वप्नादिषु पाठ्यं पठनं सदा
वा करोति एवमुपासकोऽपि वासनादार्ढ्यात्स्वप्नादावपि ध्यायतीत्यर्थः। स्व
प्नादावपि ध्यायत्यनुवर्तनेन कारणमाह॥ ॥विरोधिप्रत्ययं त्यक्त्वा नैरंतर्येण पा

१६

भावयन्न् । लब्धवासनावेशात् स्वभावादपि ध्यानमिति ॥ ॥ [illegible]नाम्नो
त्तसंस्कारपाटवात् भावनाध्यानं नतु आवश्यककर्मवशाद्विषयासक्तं भवतःतत्र
यं नैरन्तर्येण भावनासिद्धिरित्याशंक्याच्छादितशयेनैव सति विषयव्यसनी
वद्भावनासिद्धिः स्यादित्याह ॥ ॥ [illegible]ज्ञानोपि निजारब्धमाच्छादितशयनोनि
[illegible]ध्यातुं शक्तो न संदेहो विषयव्यसनीययेति ॥ ॥ दृष्टांतं विवृणोति
॥ परव्यसनिनि [illegible]व्यग्रापि गृहकर्मणि ॥ ॥ तदेवास्वादयत्यन्तःपर
संगारसायनमिति ॥ ॥ परसंगास्वादने गृहकृत्यविच्छेदः स्यादित्याशंक्याह
॥ ॥ परसंगास्वादं सा अपि नो गृहकर्म तत् । कुंठीभवदपि चेतद्दीलेनैव वर्त्त
तेत इति ॥ ॥ अपातेनैव वर्तते स्कं तं बर्थं विवृणोति । गृहकृत्यव्यसनिनि
यथासम्यक्करोति तत् । परव्यसनिनि तदनुकरोति येव सर्वथेति ॥ ॥ दा
र्ष्टान्तिके योजयति ॥ ॥ एवं ध्यानेकनिष्ठोपि लेशाल्लौकिकमाचरेदिति ॥
ननु तच्चविदपि लौकिकं व्यवहारं किं लेशेनाचरति किं वा सम्यगिति विकल्प्य
विषयव्यवहारस्य तत्त्वज्ञानाविरोधित्वात् सम्यगाचरतीत्याह ॥ ॥ नहि तत्त्व
विरोधित्वाल्लौकिकं सम्यगाचरेदिति ॥ ॥ अविरुद्धं चमेवदर्शयति ॥ ॥ मा

यानयः प्रपंचोयं आत्माचैतन्यरूपधृक्। इति बोधे विरौ लौकिकव्यवहारिणा
इति॥ ॥विरोधाभावमेव प्रपंचयति॥ उपेक्षते व्यवहृतिर्न प्रपंचस्य वस्तु
तां॥ नापेक्षते आउयं किं तेषां साधनान्येव कानीति इति॥ ॥कानि तानि व्यवहा
रसाधनानि इत्यतआह॥ ॥मनोवाक्कायतद्बाह्यपदार्थाः साधनानि तान्॥
तत्त्वविन्नोपमृद्नाति व्यवहारोस्य नो कुतः इति॥ ॥तद्बाह्यपदार्थगृहक्षेत्रा
दयः। तान् मनआदीन् तत्त्वज्ञानी न निवारयति। अतोस्य ... नि नो व्यवहा
रः कुतो न भवति। तव स्वेवेस्यर्थः॥ ननु विषयानुपमर्दने चित्तस्य विदा चित्तोपम
र्दने कार्यमित्याशंक्यात्र यथाकरणतत्त्वविदेव न स्यादित्याह। उपमृद्नाति चित्तं
चेद्ध्याता सो न तु तत्त्ववित्॥ ॥ननु तत्त्वविदा चित्तं नोपमृद्यत इत्येतत्क
हमित्याशंक्याह। न बुद्धिं मर्दयन् दृष्टो घटतत्त्वस्य वेदिता इति॥ दृष्टं तत्त्वे
दिताऽज्ञाता बुद्धिं मर्दयन् ... डयन्। एकाग्रीकुर्वन् पुरुषो न दृष्टः। नोपलब्ध
इत्यर्थः॥ ननु घटस्य स्थूलत्वेन स्पष्टत्वात् दर्शनेन चित्तपि ... सत आ
... णं स्यात्तत्त्वाविषयात्तत्त्वा ... हत्याशंक्य तस्य स्वप्रकाशत्वेन घटा
पि

टं विस्पष्टं तु रज्ज्वा भ्रान्तिनिरोधनं न तथास्य तद्दृष्टान्तमाह ॥ ॥ सत्यप्रत्ययमप्येवमा
घटश्चेद्भासते तथा । स्वप्रकाशोऽयमात्मा किं घटवच्च न भासत इति ॥ ॥ नन्व
नु ब्रह्मणः स्वप्रकाशकत्वेऽपि तत्रोपरागाय बुद्धिवृत्तेरेव । तच्चेज्ज्ञानं चात्मा
श्यकत्वेति किं च न ब्रह्मणि तु नः पुनरवस्थापनमपेक्ष्य तद्दृष्टान्तं कथ्यते दो ह
॥ घटादावपि समानमित्याह ॥ ॥ स्वप्रकाशतया किं ते तद्बुद्धिस्तत्त्ववेदने ।
बुद्धिश्च क्षणनाश्येति चोद्यं तुल्यं घटादिष्विति ॥ घटादिज्ञानस्य [illegible]त्वे
ऽपि सकृन्निश्चितस्य घटस्य सर्वदा व्यवहर्तुं शक्यत्वात्तत्र चित्तस्थैर्यसं
पादनमप्रयोजकमित्याशङ्क्यैतदात्मन्यपि समानमित्याह ॥ ॥ घटादौ नि
श्चिते बुद्धिर्नश्यत्येव यथा घटः । इष्टो नेतुं तदा शक्य इति चेत्सममात्मनी
ति ॥ ॥ सममात्मनीत्युक्तमर्थं विवृणोति ॥ ॥ निश्चित्य सकृदात्मानं यदापे
क्ष्या तदैव तं । वक्तुं मन्तुं तथा ध्यातुं शक्नोत्येव हि तत्त्वविदिति ॥ ॥ ननु नैव विद
स्युपासकवदात्मानुसंधानवशाज्जगदनुसंधानरहितो दृश्यत इ
त्याशङ्क्य सोऽनुसंधानाभावो ध्यानप्रयुक्तो न वेदनप्रयुक्त इत्याह ॥ ॥ उपा
सकवद्ध्यायतु लौकिकं विस्मरेद्यदि । विस्मरत्येव सा ध्यानाद्विस्मृतिर्न तु वेदना
स्मृ

दा

दितिनन्वेतच्च विदांपि मुक्तिसिद्धये ब्रह्मध्यानं कर्तव्यमित्याशंक्य ज्ञानादेव मुक्तेर्व
त्यं प्राप्यते येन न भूयते। तमेवं विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनाय। इ
त्यादेवं मुच्यते सर्वपाशैरित्यादि शास्त्रसद्भावान्न मोक्षाय ध्यानं कर्तव्यमि
त्याह॥ ॥ध्यानं त्वैच्छिकमेतस्य वेदनान्मुक्तिसिद्धितः। ज्ञानादेव तु कैवल्यमि
ति शास्त्रेषु डिंडिमः इति॥ ॥तत्त्वविदो निर्ध्यानस्याभ्युपगमे तस्य सदा बहिः प्रवृत्ति
स्यादित्याशंक्याबाधकत्वात् प्रवृत्तेस्ताम्भ्युपेयत इत्याह॥ ॥तत्त्वविदन्या
यत् प्रवृत्तेत सदा बहिः। प्रवर्ततां सुखेनायं को बाधोऽस्य प्रवर्तने। बहिः प्रवृत्त्यभ्यु
पगमेऽतिप्रसंगः स्यादित्याशंक्य प्रसंगस्य दुर्निरूपत्वान्नैवमिति परिहरति॥ अ
तिप्रसंग इति यत्प्रसंगं तोवदीरयति॥ स प्रसंगो दुर्निरूप्यः विधिशास्त्रस्य प्रसं
गाद्भुन विवक्षितत्वादिति चेन्न तस्यापि निर्विषयत्वेन तत्त्वविद्विषयत्वाभावादि
त्याह॥ ॥प्रसंगो विधिशास्त्रं चेन्न तत्तत्त्वविदं प्रतीति। विधिशास्त्रमस्पृष्टस्य
वा निषिद्धशास्त्रस्यापि विधिशास्त्रस्याविषयत्वमेव दर्शयति॥ ॥वर्णाश्रमा
दे[illegible]स्त्वाभिमानो यस्य विद्यते। तस्यैव च निषेधश्च विधयः सकला अपीति॥ २१
ननु तत्त्वविदो देहधारित्वेन वर्णाश्रमाद्युपस्थितानि हि मन्त्रे साशंक्याह॥ ॥वर्णाश्रमा
दयो देहे मायया परिकल्पिताः। नात्मनो बोधरूपस्येत्येवं तस्य विनिश्चयः इति॥

पि

नुत च विनिश्चयस्तावन्निष्ठतु ॥ सा ... तस्य कर्तव्यं निपादयति इत्यासांक्य

ति तस्य कर्तव्यानावमेवबोधयतीत्याह॥ ॥ सुखे चि ... कर्मी ... कर्तव्यो कर्मो

यात्हृदयेनास्तसर्वार्थो मुक्तएवा ... मोग्रयन्। योहृदयेन बुधः ... सामवा ...

आस्था: परिसकाः संबोध्याशोवा आस्छा आसक्ति विशेषा यस्य स तथा ... धि

अनेनएवाह्ना मान्नायः ... तमआशयो ... प्रायो निर्मलज्ञानं यस्य स तथा ... सतुद

एव अतः समाधिमथकर्माणि सन्त्यज्य विदुषः कर्तव्यं नास्तीत्येतद्वचनांतरमाह

हा मति। नैष्कर्म्येण ... तस्यार्थस्तस्यार्थोस्ति न कर्मी ... न समाधान ... यस्य

स्यनिर्वासनमनइति॥ ॥नैष्कर्म्यं कर्मराहित्यं तेन ... गनेरर्थः॥ समाधानं

समाधिः ... नन्तु विदुषामपि वासनानीवृत्तये ध्यानं कर्तव्यमित्याशंक्य

सम्यक् ज्ञानिनो वासनैव नास्तीत्याह॥ ॥आत्मासंगस्ततोन्यत्स्यादिंद्रजालं ... मा

ईक्षे ... निर्लज्जलिनानीतं कुतो मन सिवासनेति॥ ॥नवचेचेत्प्रलयो किमायातामिस

तत्राह॥ ॥एवं नास्तिप्रसंगोपि कुतोस्यातिप्रसंजनं इति॥ ॥तर्हि अतिप्रसंगः कस्यभा

ह। प्रसंगो यस्य तस्यैव शंकेतातिप्रसंजननिति कुत्र दृष्टमित्या = = = = = =

= = हा। विस्म्रुत्ना वाज्ञबालस्यदृश्यतेतिप्रसंजनमिति = ... श्रेयति। ...

कुतोतिप्रसंगोस्य विध्यनावस्तमेसतीति॥ बालस्य विध्यनावप्रयोजकं ... मसर्वज्ञ

चमत्कर्याह॥ ॥नकिंचिद्वेत्ति बालस्यैव नु सर्वं वेद्यं यतच्च विज्ञातं तर्हि [illegible] कार-
कस्य साशंक्याह॥ ॥ब्रह्मज्ञस्यैव विषयाः सर्वे स्युर्नान्यथा हैयादिति॥ ननु
व्यासादिवच्छापानुग्रहसामर्थ्यं यस्य स एव तत्त्ववित्नान्य इति शंकते। शापानु-
ग्रहसामर्थ्यं यस्यासौ न तत्त्ववित् स्यादिति परिहरति नेति। तत्र हेतुमाह। शा-
पादिसामर्थ्यफलं स्यात्तपसोयत इति। ननु व्यासादीनां तत्त्वविदामपि शा-
पादिसामर्थ्यदर्शनात्तद्वच्छंकायां तेषां न तत्त्वज्ञानफलं तपःफलमि-
त्याह॥ ॥व्यासादेरपि सामर्थ्यं दृश्यते तपसो बलादिति॥ ननु ब्रह्मा तपसा
विजिज्ञासस्वेति श्रुते। तपो हि तस्य तत्त्वज्ञाने निमित्तं तर्हि साशंक्य शापादि-
कारणादन्यत्तपो ज्ञानस्य कारणमिति॥ नहि निकांव्यासादीनां तत्त्वज्ञानं
शापादिकारणं चैवकं यं दृश्यते साशंक्योभयविधतपस्सद्भावादित्याह॥
द्वयं यस्यास्ति तस्यैव सामर्थ्यज्ञानयोर्जनिः। एकैकं तु तपः कुर्वन् [illegible]
न तेफलमिति। ननु यः शापादिसामर्थ्यरहितः। तस्य [illegible] नावधि [illegible]
[illegible] निर्णीयचं स्यादित्याशंक्य तेषामेव [illegible] पटे [illegible] स्यात् [illegible]
ह॥ ॥सामर्थ्यहीनो निंद्यश्चेत्तु [illegible] निंद्यते [illegible]
तपस [illegible] न्नेव [illegible] शापादिकारणादन्यत

193

निद्रां भोगलंपटैरिति॥ सतेषु विज्ञो ... कार्यं वेष्प्रान् संपादयन् ...
... स्यन्त दा तेषां यतिश्च मेव हीयेत सन्निपाते ... सति॥ ... रथादि ...
रक्षेसु खंड्यै ते नागिनुष्टये। बाहोयति च मे तेषां वैराग्य ... मं ... नमि...॥ ३
विषयलंपटैः पामरैः क्रियमाणये। निंदया क्रियापराणां विशिष्टानां हानिर्नास्तीत्युच्यते चेत्तर्हि वेदाभिमानिभिः कीयापरैः क्रियमाणायां निंदायां न तच्च
विदो विद्वान्निः द्रसाह॥ ॥वर्णाश्रमपरान्मूर्खान्निंदं ... च्यतेन ... देहात्मा ...
ये बुद्धेर्भेद वाश्रममानीनइति। प्रासंगीकं पा... सा... यथा तत्र मनुसरति
तदीये तत्त्वविज्ञाने साधनानुपमर्दनात्। ज्ञानिनामु रिंकुशांका सम्यक्कृष्यादि लौकिकमिति॥ तस्मात्कारणात् इदृशमुक्तैः प्रकारेण तत्त्वविज्ञानस्य
तिसाधनानुपमर्दनात् लौकिकव्यवहारसाधनानामनत्ययाद्दीनां आविलोपनात् लौकिकं राज्यादि राज्यपरिपालनादिकर्म ज्ञानिना सम्यगाचारितुं शक्यमित्यर्थः॥ ननु तत्त्वविदः प्रपंचमिथ्यात्वज्ञानं तत्र ... व नोदियादिति चेत् नहि स्वकर्मानुसारेण प्रवर्तितामित्याह। मिथ्यात्वबुध्या तत्रेच्छा नास्ति चेन्न तर्हि मास्तु तत्र धार्यं

ध्यायन्त्येव व्यवहारन्त्यथा रब्धं च सञ्चयमिति। इदानीमुपासकस्यातो वैषम्यं
दर्शयति॥ ॥उपासकस्तु सततं ध्यायन्नेव वसेदिति। तत्रोपपत्तिमाह। यतः
ध्यानेनैव क्लृप्तं तस्य ब्रह्मत्वमिति यतः। कारणात्तस्य ब्रह्मत्वं ध्यानेनैव क्लृप्तं न
प्रमाणप्रमितं अतो ध्यायीनां ध्यानं सदा कर्तव्यमित्यर्थः। तत्र दृष्टान्तमाह
विद्युत्वादिवदिति। यथा स्वस्मिन् ध्यानेन संपादितस्य विद्युत्वादेः पारमार्थि
कत्वं नास्ति तद्वदित्यर्थः। ध्यानसंपादितस्यापि तस्य पारमार्थिकत्वं किं न स्यादि
त्यं क्य ध्यानसंपादितस्य वा ध्यानं बोद्धव्यं ध्यानापाये पगमान्नैवमित्याह।
ध्यानोपादानकस्य तद्ध्यानाभावेऽपि लीयते इति ज्ञान[illegible]प्रकाशितं तु ब्रह्म
ततो वैलक्षण्यमाह॥ ॥वास्तवी ब्रह्मता नैव ज्ञानाभावे विलीयत इति। ध्या
नार्जितं विशेषणं। यतो ब्रह्मत्वं वास्तवं मतो ज्ञापकज्ञानाभावेऽस तिनैव विलीय
ते। वास्तवत्वादेव ज्ञानेननैव जन्यत इत्याह॥ ॥ततो [illegible] ज्ञापकं ज्ञानं न नित्यं
[illegible] वैयर्थ्यं ब्रूति। यतो व्याप्तो ब्रह्मतत्त्वं नित्यमतो ज्ञानं [illegible] तस्यापि [illegible]
अवबोधकमेव न जनकमित्यर्थः। तत्रोपपत्तिं व्यतिरेकमुखेनाह॥ ॥ज्ञा [illegible]
[illegible]वमात्रे पानहि सस्संदेहे लिखितइति व्ययमपि प्रायः। अहं तं [illegible] इति [illegible]

स्यात् न र्हि ज्ञानेनाज्ञास्य ब्रह्मणि जीयेत् न च विलीयेत। अज्ञानजन्यानर्थ इति न च ज्ञानि
वदुपासकस्यापि ब्रह्म वेदितव्यमस्तीति शंकते। [illegible] उपासकस्यापि वा [illegible]
तीति चेदिति। अत्यंतमिदमूच्यत इत्यभिप्रायेणाह। रामतापनीतिरश्रुतौ [illegible]
ब्रह्मज्ञानं किमिति। पामरादीनां विद्यमानमपि ब्रह्मत्वमज्ञातत्वात् पुरुषार्थ
याशंक्य। ज्ञानत्वेनानुरूपार्थयोगी च मुमुक्षुपासकस्यापि समानमित्याह। [illegible]
पुमर्थत्वमुभयत्रापि तत्सममिति। ननु तर्हि उपासनं किमर्थमित्याशंक्य तदृष्टां
श्च तदनुष्ठानस्य श्रेष्ठत्वं चाभिप्रायपोषकमिति दृष्टांतपूर्वकमाह। [illegible]
निश्चावरं ध्यानं दैवतं भाव्यत इति। इतरानुष्ठानेभ्यः श्रेष्ठत्वमेव दर्शयति। पामरो [illegible]
हतावरं कर्माद्यनुष्ठितिः नतोपि सगुणोपास्तिर्निर्गुणोपासनं नतदृत्ति। [illegible] श्रे
ष्ठ्यकारणमाह। यावद्विज्ञानसामीप्यं तावच्छ्रेष्ठ्यं विवर्धत इति। निर्गुणो [illegible]
नस्यापि सर्वश्रेष्ठ्यप्रकारमाह। ब्रह्मज्ञानायते साक्षान्निर्गुणोपासनं शनैरि
ति। उक्तमर्थं दृष्टांतप्रदर्शनपूर्वकं दृढयति। यथासंवादिविभ्रान्तिः फल
काले प्रमायते। विद्यायते तथोपास्तिर्मुक्तिकाले तिपाकत इति। ननु संवादी वि
भ्रांतिः स्वयमेवान प्रमा न भवति। किं तु तया प्रवृत्तस्यादिदार्थे संन्निकर्षात्प्रमान्यायं
तद्रीतिशंकते। संवादिभ्रमतः पुंसा प्रवृत्तस्यान्यमानतः। प्रमेति चेदिति। अ
ते

स्त। तर्हि निर्गुणोपासनमपि निदिध्यासनरूपं सद्वाक्यजन्यापरोक्षज्ञानेका
रणं न वीक्ष्यतीत्याह। तयोरप्यास्तिमेर्त्तेरकारणायतामिति तन्नैवं सति स्मृति
ध्यानादेरपि चित्तैकाग्र्यसंपादनद्वारापरोक्षसाधनत्वं स्यादिति म
चेत्त्वदपयोगीक्रियत इत्याह। मूर्तिध्यानस्याम्नायादेरपि। कारणतायदि दृष्टमो
नामेति। तर्हि निर्गुणोपासने कोतिशय इत्यत्राह। तथाप्यत्रय [illegible] त्विति वि
शिष्यते सामीप्यं ज्ञानं प्रतीति शेषः। विशिष्यते प्रत्यासत्तिप्रकारमेवाह [illegible] र्णीय
तुं। निर्गुणोपासनैरेव तु समाधिः स्याच्छनैस्ततः। यः समाधिर्निरोधाख्य
सोनायासेन लभ्यत इति। निर्गुणोपासनं यदा परिपक्वं भवति तदा विकल्पस
माधिः स्यात्। ततः सविकल्पसमाधेर्निरोधाख्याय स्तरस्यापि निरोधस
त्ति निरोधान्निर्बीजसमाधिरिति सूत्रोक्तलक्षणो निर्विकल्पसमाधिः सोन
सेन लभ्यते। नन्वेवं निर्विकल्पलाभः ततः किमित्यत आह। निरोधलाभे
पुंसोन्तरसंगवस्तु शिष्यत इति। ततोपि किमित्यत आह॥ पुनः पुनर्वा [illegible]
न्न वाक्यर्थ्ज्ञायते नवधीरिति। अस्मिन्निरोधे वसाने पुनः पुनर्वासि [illegible]
सति वाक्यतत्त्वमस्यादिलक्षणेन चाहं स चेतनाहं ब्रह्मास्मीति [illegible]
आयते तत्त्वधीः। तत् ब्रह्मानन्यरूपमेव विज्ञायते। निर्विकारासंगनित्यस्वप्र

कोशोकपूर्णता ॥ बुद्धौ [illegible] तिरिक्ताख्यातात्[illegible] स्वेच्छया [illegible] न इति ॥ न
निर्विकल्पसमाधिवशात् परोक्षमेव तत्त्वं [illegible] प्रमाणमिथ्या [illegible] का
तथि[illegible] दृष्टान्तमप्रमाणमाह ॥ योगा[illegible]स स्येतदर्थे [illegible] बि[illegible]
तेऽपि ति । फलितमाह एवं च दृष्टद्वारापि हेतुर्वा अन्यतावरमिति ॥ एवं च स
ति निर्गुणोपासनस्यापरोक्षज्ञानप्रहासन्निसंत्रवेसति दृष्टद्वारादिनि
कल्पसमाधिलाभद्वारेणाविशिष्टात् अदृष्टद्वारापि हेतुत्वात् ज्ञानसा
नचात् अन्यतः सगुणोपासनादिन्यापतं श्रेष्ठमिति सर्वं ॥ एवं निर्गुणोपा
नस्यापरोक्षज्ञानसाधनत्वे सिद्धे सति तत्परित्यज्यान्यत्र प्रवृत्तानां वृथाश्र
मः स्यादिति लौकिकन्यायप्रदर्शनेनाह ॥ उपेक्ष्य तत्तीर्थयात्रां जपादीनेव
कुर्वतां । पिंडं समुत्सृज्य करं लेढीति न्यायआपतेदिति ॥ न [illegible] विचा
रं परित्यज्य निर्गुणोपासनं कुर्वतामप्ययं न्यायः समानमित्याशंक्याह ॥ इति ॥
उपासकानामप्येवं विचारत्यागतो यदि ॥ बाढमिति । तर्हि निर्गुणोपासनं
कुतः प्रतिपाद्यत इत्यत आह ॥ तस्माद्विचारस्यासंभवे योग इ[illegible] इति
। यस्मादुक्तन्यायप्रसंगस्तस्माद्विचारासंभव एव योगः । उपासनं कर्तुमिति

ये

दे

तत्

र्थः। विचारासंभवे कारण म्हणे ॥ बहुव्याकुलचित्तानां विचारात्तत्त्वधीर्नहि
इति। यतोविचारो न संभवति। अतो योगः कर्तव्य इत्याह। योगो मुख्य स्तत
क्षामिति। मुख्य त्वे कारणमाह। धीदर्पस्तेन नश्यतीति। तेन योगेन यतो धी
दर्पो नश्यति अतो मुख्य इत्यर्थः। एवं व्याकुलचित्तानां योग एव मुख्य इत्युक्त्वा न
निधायत स्यै हितानां विचार एव मुख्य इत्याह॥ अव्याकुलधीयां मोह मात्रे
णाच्छादितात्मनां। सांख्यानामा विचारस्यात्मुख्य इति। सांख्यानामा वि
चारः। सांख्य शब्द वाच्य स्तत्त्व विचारो मुख्यः। कुत इत्यत आह। झटितिसि
द्धि दइति। योग सांख्ययोस्तत्त्वयोरन्यतरपि न तत्त्वज्ञान द्वारा मुक्ति साधन है
गीता वाक्यं प्रमाणयति॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते। एकं
सांख्यं च योगं च यः पश्यति स पश्यति॥ यः सांख्यं योगं च फलतः एकं पश्यति
स एव शास्त्रार्थं सम्यक् पश्यतीत्यर्थः। न केवलं गीतायां किंतु [illegible] मूलश्रु
तौ श्रुतिरप्यस्तीत्याह। तत्कारणं सांख्य योगाभिपन्नमिति। इति श्रुतिः। ए
ननु सांख्य योगयोस्तत्त्वज्ञान साधनत्वं गीतादेः तत्त्व शास्त्र प्रतिपादितं तन्नाम
कर्तानामपि विरुद्धी कारात्। इत्याह। यत्र वस्तुतो विरोध इत्यत आह। सांख्या

ते

कु

क्रमयोगमिति। व्याख्यातो बाध्यतइत्यर्थः। ननूपासनं कुर्वाणस्य स्वर्गलोकगात
प्राणमरणे सति मोक्षोनसिद्ध्येदित्याशंक्याह। उपासनेनातिपक्व... हृदयात्
स्या। सोपकेषु स अमरणे ब्रह्मलोके वा ... विस्मयमुच्यतइति॥ ॥मरणे ... सरज्ञा
नान्मुक्तिलाभे प्रमाणमाह। यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरं॥ तं तमेवे
ति ... यद्वि तस्मिन्नयातीति शास्त्रतइति। यद्वि तस्मै नैव आयाति। प्राप। ...सा
युक्तसहात्म। नायया संकल्पितं लोकं नयतीति वाक्याद्वेत्यर्थः। ननु दाहत्वान्यां स्मृ
तिस्मृतिबाधा क्वान्यो ... प्रत्ययतो नावीजन्मानि धीयते नइ। ... नान्मुक्तिरिहा
शांक्य मुखवतस्तथाभिधाने मंगीकरोति। अंत्यप्रत्ययतो ननु नेनावीजन्मेति॥ कथं
तर्हि मरणकाले ज्ञानान्मोक्षो भवतीसन्देहवाक्यद्वयं प्रमाणाचेनोपन्यस्तमित्या
शंक्याह॥ तथा सति॥ निर्गुणोपासक ... स्यात् सगुणोपासनेयथेति। तथा सति
अंसाप्रत्ययात् नाविजन्मनिश्चये सति सगुणोपासकस्य यथा मरणावसरे पूर्वा
भ्यासवशात् सगुणब्रह्माकारः प्रत्ययो जायते। एवं निर्गुणोपासकस्यापि नि
र्गुणब्रह्मगोचरः प्रत्ययो जननीय इत्यर्थः॥ ॥ननु निर्गुणप्रत्ययात्यस्व शाद
निर्गुणब्रह्मप्राप्तिरेव न नवे ... न मुक्तिरित्याशंक्य ब्रह्मप्राप्तिमुक्त्योः शब्दमात्र

क्र

प्रमाण

मोक्षस्य

पात्रेदोनार्थंतदृश्याह ॥ ॥ निरस्य निर्गुणरूपं तन्नाममात्रेण जायतां । अर्थतो मे
सद एवैष इति । तद्ब्रह्म निर्गुणमिति निर्गुणमिति । नाममात्रेणोच्यतां । अर्थतस्तु ब्र
ह्मोक्षण एव स्वस्वरूपावस्थितिर्मुक्तिः निरस्य [illegible] धानादिति भावः । तत्र दृष्टांतमाह । सं
वादिभ्रमवन्मतद् इति । यथा संवादी भ्रमो नाममात्रेण भ्रम इत्युच्यते वस्तुतो
नैव तद्वदित्यर्थः । ननु निर्गुणोपासनस्य मानसक्रियारूपस्य मुक्तिसाधनत्वाभि
धाने [illegible] मित्याशंक्य तज्जन्यस्य ज्ञानस्य मोक्षसाधनत्वाभिधानान्न विरोध
इत्याह ॥ ॥ तत्सामर्थ्याज्जायते धीर्मूलाविद्यानिवर्तिकेति ॥ तत्र दृष्टांतमाह ॥ ॥
अविमुक्तोपासनेन तारकब्रह्मवेदनादिति ॥ ननु निर्गुणोपासनस्य मोक्षः फलमि
त्यत्र किं प्रमाणमित्याशंक्याह ॥ सोऽकामो निष्काम इति ह्यशरीरो निरिंद्रियः । अभयं
त्रिनिर्मुक्तं चैवं तापनीयफलं श्रुतमिति ॥ सोऽकामो निष्काम आप्तकाम आत्मकामो
न तस्य प्राणा उत्क्रामंति अत्रैव समवलीयंते । ब्रह्मैव सन् ब्रह्माप्येति । अशरीरो नि
रिंद्रियो प्राणो तमाः सच्चिदानंदाः स स्वराड् भवति । य एवं वेद विरजो ह्यात्मका
[illegible] चिन्मयमिदं सर्वं तस्मात्परमेश्वर एव केवलो भवति तदभयमेतत्
[illegible] तानयं वै ब्रह्म [illegible] हि वै ब्रह्म भवति य एवं वेद इति रहस्यमित्यादि [illegible]

स्तापनीयोपनिषदि निर्गुणोपासनस्य मोक्षः फलं तेन श्रूते यदुक्तं सर्थः। नन्द्रुप
पासया मुक्तिः श्रेयस्या नान्यः पंथा विद्यतेऽयनायेति श्रुतिविरोध इत्या
शंक्य विद्याद्यवधानेन मोक्षप्रदत्वाभिधानान्न विरोध इत्याह। तप ... स्य
सामर्थ्याद्विद्योत्पत्तिर्भवेत्ततः। नान्यः पंथा इतीयं तद्वारत्वे न विरुध्यत इ
ति। मरणे ब्रह्मलोके वा तत्त्वं विज्ञाय मुच्यत इत्यर्थः। ... इति हृदयं प्रमाकप्र
त्ति॥ निष्कामोपासनान्मुक्तिः स्तापनीये समीरिता। ब्रह्मलोके सकाम
स्य सोऽब्द प्रश्ने समीरितेति। तत्र सोऽकामो निष्काम इत्यादि तापनी
यवाक्यं। पूर्वमेवोदाहृतं। इदानीं प्रश्नोपनिषद्वाक्यमर्थतः पठति।
योऽपास्ते त्रिमात्रेण ब्रह्मलोके स नीयते। स एतस्माज्जीवघनात्
परं पुरुषमीक्षत इति। यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण
परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा वि
निर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्र
ह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत इति। स
कामस्य ब्रह्मलोकप्राप्तिः श्रूयत इत्यर्थः॥ ननु सौम्यप्रश्ने सकामस्य ब्रह्म

१०९

८

लेखकेन विस्मृतं ग्रंथपतनं नास्ति

लोकगतिः प्रतीयते न मुक्तिरिति आशंक्य तत्रैव च [illegible] श्रेयान् आह
तत एतस्मादिति। ब्रह्मलोकं गतः स उपासक एतस्मात् जीवघनात् जीवस
रूपात् हिरण्यगर्भात् परं [illegible] पुरुषं निरुपाधिकं चैतन्यरूपं परमात्मा
नमीक्षते साक्षात्करोतीत्यर्थः॥ ॥ किं तु अप्रतीकालम्बनान् नयतीति बा
दरायणः। इह यथा दोषान्न क्रतुश्चेति [illegible] कामानुसारेण फलप्राप्तिर्भ
वतीति प्रतिपादितं तस्माद् द्विविध सकामस्य ब्रह्मलोकगतिरुक्ता आह॥ [illegible]
[illegible]तिकाधिकरणोक्तन्यायेन [illegible] ब्रह्मलोकफलं [illegible] सकाम
[illegible] निर्णीतम्। तर्हि सकामस्य तत्त्वज्ञानं अतो [illegible] इत्याशंक्याह॥ ॥ नि
र्गुणोपास्ति सामर्थ्याच्च तत्र तत्त्वमपेक्षितम् इति। इमं मानवमावर्तं नावर्तन्त इति। इ
दानीं प्रणवोपासनप्रसंगात् बुद्धिस्थं तद्द्वैविध्यं दर्शयति॥ प्रणवोपास्त
[illegible]पायो निर्गुण एव वेदगाः [illegible] प्रणवोपासनस्य [illegible]
॥ द्वैविध्ये प्रमाणमाह॥ एतद्वै ब्रह्मरूपम् ओंकार एव वर्णितः। [illegible]
मुनीना सत्यकामाय पृष्टं तदिति॥ एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकार [illegible]
नावर्तन्ते। न च पुनरावर्तते न स पुनरावर्तते। ब्रह्मणा सह ते सर्वे इत्यादि श्रुतिस्मृतिसद्भावात् न तस्य पुनः सं
सार प्राप्तिः। किं तु मुक्तिरेव स्यात्॥ पुनरावर्तिनो [illegible] लोका [illegible] इति॥ १

रस्तस्मादिक्षानेते नैवायतने नैकतरमन्वेतेति। उक्तमयरूपत्वं प्रतिपादितमि-
र्थः। कठवल्ल्यां यमेनापि एतदालंबनं श्रेष्ठमित्यादिना द्विविधमुक्तमित्याह॥
एतदालंबनं ज्ञात्वा यो यदिच्छति तस्य तत्॥ इति प्रोक्तं यमेनापि पृष्टेन नचि-
त [illegible]केतसेति॥ उक्तमर्थमुपसंहरति। इह वामरणे वास्य ब्रह्मलोकेऽथवा भव
तु। ब्रह्मसाक्षात्कृतिः सम्यगुपासीनस्य निर्गुणमिति॥ विचारासंभवज्ञान
संपादनासमर्थस्य निर्गुणब्रह्मध्यानेऽप्यधिकारमित्यत्र अध्यात्मगीता
यां सम्यगभिहितमित्याह॥ अर्थोऽयमात्मगीतायामपि स्पष्टमुदीरितः। वि
चाराक्षम आत्मानमुपासीतेति संततमिति॥ आत्मगीतावाक्यं पठति॥ दुःस्थित
। साक्षात्कर्तुमशक्तोपि चिंतयेन्मामशंकितः। कालेनानुभवारूढो भवेयं
फलितो ध्रुवमिति। ध्यानस्य सम्यग्ज्ञानोपायत्वे दृष्टांतमाह। यथागाधनिधे-
र्लब्धौ नोपायः खननं विना। दार्ष्टांतिके योजयति॥ दुर्ल[illegible] तथा स्वात्मचिं-
तां मुक्त्वा न चापर इति। व्यतिरेकमुखेनान्वयमुखेनाह। देहोपलमपाकृत्य
बुद्धिकुद्दालकात्पुनः। खात्वा मनोभुवं भूयो गृह्णीयान्मां निधिं पुमानिति॥
[illegible]तम सा[illegible]र्थस्य ध्याने अधिकार इत्यत्र वाक्यांतरं पठति [illegible] तर[illegible] वे [illegible]

व्र्नु स

१०२

ह्मास्मीत्येवं चिंत[illegible]मिति। ध्यानात् ब्रह्मप्राप्तौ कैमुतिकन्यायमाह। [illegible]

त्वाप्यते ध्यानात् नित्यासं ब्रह्म किं पुनरिति॥ उपासकस्य पूर्वमविद्यमान[illegible]

पैश्वर्यादिकं ध्यानात् प्राप्यते किल। स्वस्वरूपत्वेन नित्यप्राप्तं स[illegible]त्मकं ब्रह्म ध्या

नात् प्राप्यत इति किंतु वक्तव्यमित्यर्थः। ब्रह्म[illegible]फलस्य प्र[illegible]क्षसिद्धत्वादा[illegible]

ध्यानं कर्तव्यमित्याह॥ [illegible]नात्मबुद्धिशोधि[illegible] फलं ध्यानाद्दिने दिने। प

नपि नच ध्यायेत् कोपरोऽस्मात्पशुर्वदेति॥ ॥इदानीमुपपा[illegible]दितम[illegible]र्थं स्पष्टं

प्रदर्शयति॥ ॥देहाभिमानं विध्वस्य ध्यानादात्मानमद्वयं। पश्यन्मर्त्यो

[illegible]मृतो भूत्वा ह्यत्र ब्रह्म समश्नुत इति॥ ॥मरणशीले देहे। [illegible] भिमानं प

रित्यागात् स्वयममृतो भूत्वा। अत्रास्मिन्नेव शरीरे स्वं निजं स्वरूपं सदानंद

चिद्रूपं ब्रह्म प्राप्नोतीत्यर्थः। ध्यानप्रदी[illegible]नुसंधानफलमाह। [illegible]दीपमि

मं सम्यक् परामृशति यो नरः। मुक्तसंशय एवायं ध्यायते ब्रह्म संततमिति॥

॥श्री॥ ॥श्री॥ ॥श्री॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्या

रण्यमुनिवर्यकिंकरेण श्रीमद्रामसंज्ञारण्यविदुषा विरचिता ध्यानदीपव्याख्या॥

नाटकदीप

समाप्ता ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ शुभमस्तु ॥ ॥अविघ्नम
स्तु ॥छ॥ ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ व्याख्यां नाटकदी
पस्य मया संक्षिप्य वक्ष्यते ॥छ॥ चिकीर्षितस्य ग्रंथस्य निर्विघ्नेन परिपूर
णाया अभिमतदेवतातत्त्वानुस्मरणं मंगलमाचरन्मंदाधिकारिणामना
यासेन निष्प्रपंचब्रह्मात्मप्रतिपत्तिसिद्ध्यै अध्या[illegible]रोपापवादाभ्यां निष्प्र
पंचं प्रपंच्यत इति। न्यायमनुसृत्यात्मन्यध्यारोपमेवादाह ॥ [illegible] परमात्मा
द्वयानंदपूर्णः पूर्वं स्वमायया। स्वयमेव जगद्भूत्वा प्राविश[illegible]जीवरूपत
ः ॥ पूर्वं सृष्टेः प्राक्। अद्वयानंदपूर्णः। सदेव सोम्येदमग्र आसीदेक
मेवाद्वितीयं विज्ञानमानंदं ब्रह्म पूर्णमदः पूर्णमिदमिति प्रसिद्धस्वरू
पमानंद[illegible] परमानंदरूपः परिपूर्णः। परमात्मा स्वयात्मीयया। माया
[illegible] विंद्यान्मायिनं तु महेश्वरमिति। [illegible] स्वसृष्टेः [illegible]
यमेव जगद्भूत्वा तदात्मानं स्वयमकुरुत ॥ सच्च त्यच्चाभवदिति [illegible]
स्वयमेव ज[illegible] [illegible]कारतां प्राप्य जीवरूपतः प्राविश[illegible] [illegible] [illegible]देवानु

प्राविशत्॥ अनेन [illegible] वेनात्मनानुप्रविश्येत्यादिश्रुतौ [illegible] [illegible] णाद् विश्ववान्
दृश्यते। न तु परमात्मन एवैकस्य सर्वशरीरेषु प्रविष्टत्वेऽप्युक्ताकादि [illegible]
न फलं तेन त्वमाश्रमात्तावो विरुध्यते इत्याशंक्याह॥ ॥ विश [illegible] तु त्वमदेहेषु
विज्ञानुषतान वत्॥ महाघ्य मदेहेषु स्थिता भजति दवनामिति॥ ॥नाद
[illegible] नाचिकत्वं त्वमाधमनाव॥ किंतु शरीरो [illegible] धि निबंधनः। अतोन विरो
इतिनावः। इदं चात्मन्यध्यारोपसंक्षेपणप्रव [illegible] प्रसाधनं तेन [illegible] वादं मसि
[illegible] दर्शयति॥ ॥अनेक जन्म भजनात्स्वविचारं चिकीर्षति॥ [illegible] रण विचेष्ट
[illegible] या शिष्यते [illegible] मिति॥ ॥अनेक जन्म भजनात्। अनेकेषु जन्मसु
अनुष्ठितानां कर्मणां ब्रह्मणि समर्पणरूपाद् भजनात् स्वविचारं चिकीर्षति। स्व
स्यात्मनो ब्रह्मरूपस्य ज्ञानसाधकं श्रवणादिकं चिकीर्षति। कर्तुमिच्छति। स्वे
न स्वविचारेण विचारजनितज्ञानेन मायायां स्वस्याद्वयानंदवाप्तिमोह [illegible]
दिकायां। व्यज्ञानाविद्यादिशब्दवाच्यायां विनष्टायां निवृत्तायां सत्यां स्वय
मद्वयानंदे पूर्णः परमात्मैवावशिष्यते॥ ॥ननु तद्ब्रह्म मितिर्ज्ञातावा सर्वं वैष्ये
ला

प्रमुख्यतद्यादिश्रुतिभिः बंधनिवृत्तिलक्षणस्य मोक्षस्य ज्ञानफलत्वाभिधाना
त्परमात्मावबोधनस्य तत्फलत्वाभिधानमनुपपन्नमित्याशंक्याह ॥ ॥ अद्वया
नंदरूपस्य सद्वयत्वं च दुःखिता बंधः प्रोक्तः स्वरूपेण स्थितिर्मुक्तिरितीर्यते ॥ अ
द्वितीयब्रह्मणि वास्तवस्य मोक्षस्य बंधस्य वा दुर्निरूपत्वाद्बुद्धिकल्पितमेव
बंधः । स्वरूपावस्थितिलक्षणा तन्निवृत्तिरेव मोक्षः । अतो न श्रुतिविरोध
इति भावः ॥ ननु कर्मणो वापि संसिद्धिमास्थिता जनकादय इत्यादि [illegible] तः मोक्षस्य
कर्मसाधनत्वावगमात् किमनेन विचारजनितज्ञानेनेत्याशंक्याह ॥ ॥ अवि
चारकृतो बंधो विचारेण निवर्तते इति ॥ विचारप्रागभावेन कल्पितात्ज्ञान
[illegible] बंधस्य न विचारजन्यज्ञानादन्यतो नि[illegible]त्तिरूपपद्यते । उदाहृत[illegible]
[illegible] सिद्धिशब्देन । चित्तशुद्धिरेवाभिधीयते । न [illegible] विचारे [illegible]
[illegible] इत्यत आह ॥ किं विषयेण विचारेणेत्यत आह ॥ ॥ तस्माज्जीवपरात्मानौ स
र्वदैव विचारयेदिति ॥ ॥ तत्वसाक्षात्कारपर्यंतं सर्वदा [illegible] सर्वथा [illegible]
जीवस्वरूपं तावन्निरूपयति ॥ ॥ अहमित्यभिमंता यः [illegible] कर्तासाविति ॥ यः

ख्यिदानासविनिर्दि[illegible] हंकारो व्यवहारदशायां देहादाव[illegible]भिवाहं[illegible] मन्यते। असौ कर्ता कर्तृत्वादिधर्मविशिष्टो जीव इत्यर्थः। तस्य [illegible] करण [illegible]
प्रसायामाह। तस्य साधनं मन इति। कामादिवृत्तिमान्तः [illegible]करणमा[illegible]
नः करण [illegible]क्रिया [illegible] वा तत्क्रियां दर्शयति। तस्य क्रियासंतर्व[illegible]
[illegible]कर्मा च्छित इति। अनयोः स्वरूपं विषयं [illegible] वि[illegible]य दर्शयति। अंतर्[illegible]
हमिति एषा वृत्तिः कर्तारमुल्लिखेत्। बहिर्मुखैव [illegible]से [illegible] वा [illegible] वस्थित [illegible]
वेत्। इदमिति एषेति बहिर्वृत्तिस्वरूपाभिनयः। अव[illegible]शिष्टेन [illegible]य प्रदर्शने
बाह्ये देहा[illegible] बहिर्वर्तमानं इदंतया निर्दिश्यमानं वस्तु[illegible] लि[illegible] [illegible]विषयि
[illegible]र्यादिस्पर्शः। ननु मनसैव सर्वव्यवहारसिद्धौ [illegible]सुरादिवैयर्थ्यं प्रसज्ये
तस्मात् व्याह॥ ॥इदमाद्येविशेषास्युर्गंधरूपस्पर्शरवरसाः। तासां कार्यपा
तोपिं यामघ्राणादिंद्रियपंचकमिति॥ ॥मनसेदमिति सामान्यमात्रं म[illegible]त
द्विशेषा गंधादिः। अत सोऽ[illegible]पा[illegible] घ्राणादिकमुपयुज्यत इत्यर्थः॥ एवं सा[illegible]पद
रपां जीवस्वरूपं निरूप्य परमात्मानं निरूपयति॥ ॥कर्तारं[illegible] [illegible]यांत

नेग्रह

प

यत्नेन

द्धद्व्यावृत्तविषयानपि। स्फोरयेदेकयत्नेन योऽसौ साक्ष्यत्र चिद्वपुरिति॥ ॥ कर्ता रं पुर्वोक्तमहंकाररूपं क्रियामहमिदमात्मकं मनोवृत्तिरूपां व्यावृत्तविषया नपि व्यावृत्तानन्योन्यविलक्षणान् घ्राणादिग्राह्यान् गंधादिविषयांश्च एकयत्नेन युगपदेव चिद्वपुः चिद्रूपः स्वसंनिधिमात्रेण स्फोरयेत् प्रकाशयेत्। योऽसावत्र वेदांतशास्त्रे साक्षीत्युच्यते तद्रूपं सर्वसाक्षिपदकस्तेन सर्वसाक्षी रूपमिति निर्यदर्शयति॥ ईक्षे शृणोमि जिघ्रामि स्वादयामि स्पृशाम्यहं इति भासयते सर्वमिति। इदं रूपमहं पश्यामीतीति। एवं द्रष्टृदर्शनदृश्यात्मकं स्पर्शपर्यंतं इति कर्तृक्रियेतानि भासयेत्। एवं शृणोमि स्वादयामीत्यादावपि योज्यं। युगपदेकाकारेण नैकानां भासकत्वे दृष्टांतमाह नृत्यशालास्थदीपवदिति। दृष्टांतं स्पष्टयति। नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीं। दीपयेदविशेषेण तदभावेऽपि दीप्यतेऽइति। अविशेषेण प्रभ्वादिविषयविशेषाभावेनासंनिधानदृश्याद्विविकारमुत्तरेणेति यावत्। दार्ष्टांतिके योजयति॥ अहंकारं धियं साक्षी विषयानपि भासयेत्। अहंकाराद्यभावेऽपि स्वयं भात्येव पूर्ववदिति॥ ॥ त्यादावस्य

का यद्भावेन तत्साक्षित्वेन यावन्नाशं तावदेवेत्यर्थः। ननु प्रकाशरूपाया बुद्धेरेवाहं कामा
दि सर्वावभासकत्वसंभवात् किं तद्व्यतिरिक्तसाक्षिकल्पनयेत्याशंक्याह
निरंतरं भासमाने कूटस्थे ज्ञप्तिरूपतः। तद्भासा भास्यमानेयं बुद्धिर्नृत्यत्यनेक
धा इति ॥ कूटस्थे निर्विकारे साक्षिणि ज्ञप्तिरूपतः स्वप्रकाशचैतन्यरूपतया
निरंतरं भासमाने सदा स्फुरति सति इयं बुद्धिः तद्भासकस्य साक्षिणः स्वरूप
चैतन्येन भास्यमाना प्रकाश्यमाने वानेकधा घटोयं पटोयमित्यादिनानाका
रेण नृत्यति विक्रियते। अयं भावः। यतो बुद्धेर्विकारित्वात् तया सह चारि स्वतः स्फूर्ति
राहित्यं प्राप्तस्तदतिरिक्तः सर्वावभासकसाक्ष्य तु [illegible] क्रमर्थेश्च
नु बुद्धिसाक्षिणौ नाटकदृष्टान्तेन निरूपयति ॥ अहंकारः प्रभुः सभ्या विषया नर्त
की मतिः। तालादिधार्यक्षाणि दीपः साक्ष्यवभासकः इति ॥ विषयभोगसाक
ल्यवेषकत्वादभिमानप्रयुक्तहर्षविषादवत्त्वाच्चाभिमानी प्रभुतुल्यश्चाहंकार
स्य परिसरवर्तित्वेपि विषयाणां तदाहित्यान् सभ्यपुरुषसाम्यं नानाविधवि
कारवान् नर्तकीसाम्यं धियः। धीविक्रियायां प्रत्युकूलं व्यापारं तालादिधा

रिसमानत्वमिंद्रियाणां अतः सर्वावभासकत्वात् साक्षिणो दीपसादृश्यमिति
द्रष्टव्यं ॥ ननु साक्षिणो हंकाराद्यवभासकत्वे तेन तेन संबंधाय गमनागम
नरूपं स्थानविकारित्वं स्यादित्याशंक्याह ॥ ॥ स्वस्थानसंस्थितो दीपः सर्व
तो भासयेद्यथा ॥ स्थिरस्थायी तथा साक्षी बहिरंतःप्रकाशयेदिति ॥ दीपो य
था गमनागमनशून्यः स्वदेशावस्थित एव सन् स्वसंनिहितान् रवि[illegible] सर्वान्
वभासयति । एवं साक्ष्यपि नावः ॥ ननु साक्षिणो बहिरंतराववभासकत्वमिति मा
न मनुपपन्नं । अपूर्वमनपरमनंतरमबाह्यमिति श्रुत्या तस्य बाह्यांतर वि
भागाभावनिश्चयादित्याह ॥ बहिरंतर्विभागोयं देहापेक्षो न साक्षिणीति
॥ ॥ कस्य बाह्यत्वं कस्यांतरत्वमित्यत आह ॥ विषया बाह्यदेशस्था देहस्यांत
तरहंकृतिः ॥ इति ॥ ननु स्थिरस्थायित्वतया साक्षि बहिरंतः प्रकाशयेदिति सवि
कोविरिपासंतो बहिरंतरवभासकत्वोक्तिरयुक्ता अहं घटं पश्यामीत्यत्राहमित्यं
तरहंकारस्य साक्षितया प्रथमतोवभातस्यानंतरं घटं पश्यामीति घ
टाकारवृत्ति स्फुरणरूपेण बहिर्निर्गमानुभवादित्याशंक्याह ॥ अंतस्था या
धीः सह वासो बहिर्याति पुनः पुनः ॥ तस्य बुद्धिस्थ चांचल्यं साक्षिण्यारोप्यते वृथा ॥

दिवि कार

१०६

हरिः

213

दृष्टग्राहकं चेन्नैहान्तरावस्थितो धीबुद्धिः रूपादिग्रहणाय चक्षुरादिद्वारा
गृह्यो नूयो निर्गच्छति ॥ तथा च तन्निष्ठचाञ्चल्यं तद्भासके साक्षिण्यारोप्यते।
अतो न चास्त्वं साक्षिणश्चाञ्चल्यमिति भावः ॥ भासके नासङ्गे बा [illegible] आरोपः
दृष्टान्तेन सावधानं व्याह ॥ यथान्तरागतस्य चाञ्चल्यं गवाक्षे चातपो चलः। तच्च हस्ते
न संगतो नेत्यसति वा तपो हस्ते यथेति गवाक्षे यथान्तरागतस्य चाञ्चल्यमातपः प्रच
चलेदवबद्ध [illegible] तस्मिन्नातपे पुरुषेण हस्तेन आनीयते स्तत [illegible] चाञ्चल्यमा
ने यथातपोऽनुसञ्चरचलतीव लक्ष्यते न तु चलतीत्यर्थः ॥ दार्ष्टान्तिकमाह ॥
निजस्थानस्थितः साक्षी बहिरन्तर्गमो मोव्यद्वबुद्धिचाञ्चल्यात् कथ्यते तीव तथा
तथा ॥ निजस्थानस्थितः तद्दृसनं किं बाह्यदेशादिदेशस्थ चञ्चलो व्यपते नेत्याह।
न बाह्यो नान्तरः साक्षीति तत्र हेतुमाह बुद्धेर्देशो हि तावत् नान्यदिति तान्हि किं वि
तमित्यत आह ॥ ॥बुध्याद्यशेषसंशान्तौ यत्र नास्ति तत्र सदृ तीष्व। दिशा दे
नेन्द्रियादयोऽपि हन्ते। संशान्तिशब्देन तत्प्रतीतिरूपरतिर्विवक्षिता ॥ ननु सर्वव्यव
हारापरलोके देशोऽयं व नोपलभ्यते कुतस्त्विष्टवस्तु [illegible] तद्दृष्टा [illegible] कस्योपाय
माविष्णुरादि। देशः कोऽपि न भासते तथापि तत्र स्याद्देशनाशोऽपि [illegible] भ्यना।

मि
र्स
घ
दा
न

नाटकदीप — कृष्णलेखे — पंचम — १०९

धिष्ठानस्य स्वातिरिक्तान्तर्देशापेक्षा नास्तीति भावः। न ... त्वावेशा
च्च सर्वगतत्वसर्वसाक्षित्वायुक्तिविरुध्येते इत्यत आह। सर्वदेशप्रक्लृप्त्या सर्व
गत्वमिति। स्वाभाविकमेव किं न स्यादित्यत्राह। नतु स्वत इति॥ ॥अधिलीयेद
संग वाद्वेति भावः॥ ॥सर्वगतत्ववत् सर्वसाक्षित्वमपि न वास्तवमित्याह॥ ॥
अन्तर्बहिर्वा सर्वं वा यद्देशं परिकल्पयेत्। बुद्धिस्तद्देशगः साक्षी तथा वस्तुषु यो
जयेदिति॥ ॥तथा वस्तुषु योजयेदित्यत्र स्वं योजयेदिति। यद्यदत्रौपाधिकं कल्प्यं
तत्तत्सर्वं बुद्ध्यध्यारोपितम्। तस्य तत्स्वरूपत्वं नास्तीति। तर्हि किं तस्य निरूपमित्यत
आह॥ ॥स्वतस्तु बुद्ध्यगोचर इति॥ ॥अवाङ्मनसगोचरमुपदेशगुणान् गृह्यते
इति शंकते। कथं तादृशस्यात्मन इत्यादिविदिति। अत्र यावच्छेषमेव सा हमेवमुक्त
त्वमिति। न चात्मनो ग्राह्यत्वं नापि विचारेण विनष्टायां मायायां शिष्यते स्वा
त्मेति। परमात्मावशेषणं न सिद्ध्येदित्यत आह॥ ॥सर्वग्रहोपसंशान्तौ स्व
यमेवावशिष्यत इति॥ ॥स्वात्मातिरिक्ते द्वैतस्य मिथ्यात्वनिश्चयेन तत्र नीते उप
शान्ते। स्वात्मैव स्वसत्तयैव शिष्यत इति भावः। यद्यप्यत्र ... यथेष्टं परिशि — नाट

ध्यते। तथापि तदापरोक्ष्याय किंचित्प्रमाणमपेक्षितमित्यत आह। न तत्र मानापे
क्षास्तीति। तत्र हेतुमाह॥ स्वप्रकाशस्वरूपत्वादिति। नन्वालोकस्य प्रकाशरूपस्या
पि स्फूर्तौ मानं नापेक्ष्यत इति व्युत्पत्तिसिद्धये मानमपेक्षितं तदसाक्षं कथं श्रुति
प्रमाणमित्याह॥ ॥तावद्व्युत्पत्तिसापेक्षा चेद्बुद्धिं पश्य गुरोर्मुखादिति॥
एवं तु तमाधिकारिणं आत्मानुभवोपायमभिधाय तदधिकारिणस्तं दृश्य
ति॥ यदि सर्वग्रहत्यागोऽशक्यस्तर्हि धियं व्रज शरणं तामिति॥ ॥बुद्धिशरीरे ते चि
प्रमाणमित्याह॥ ॥तदधीनोऽन्तर्बहिर्वैषोऽनुभूयतामिति। बुध्यायत्तप
रिकल्प्यते बाह्यमभ्यंतरं वा तस्य तस्य साक्षिवत्तदधीनः परमात्मा तथैवा
नुभूयतामित्यर्थः॥१०॥ ॥१०॥ ॥१०॥ ॥१०॥ इति श्रीमत्पर
महंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनीवर्यकिंकरेण श्रीरा
मकृष्णाख्यविदुषा विरचिते नाटकदीपव्याख्या समाप्ता॥१०॥ ॥१०
नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ प्रत्यक्तत्त्वविवेकस्य क्रियते प
पददीपिका॥ प्रारिप्सितस्य ग्रंथस्याविघ्नेन परिसमाप्तिप्र[illegible]मताये

पा

ता

पा

शिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्कारलक्षणं मंगलाचरणं [illegible] चेनाद्
हितं शिष्यशिक्षार्थं श्लोके निबध्नाति। अर्थाद्विषयप्रयोजने सूचयति। न
मः श्रीशंकरानंदगुरुपादांबुजन्मने। सविलासमहामोहग्राहग्रासैकक
र्मणे इति॥ शं सुखं करोतीति शंकरः। सकलजगदानंदकरः परमात्मा
ब्रह्मैवानंदयातीति श्रुतेः। आनंदः निरतिशयप्रेमास्पदत्वेन परमानंदस्व
पः। प्रत्यगात्मा शंकरश्चासावानंद इति श्रीशंकरानंदः प्रत्यगभिन्नः परमात्मा
स एव गुरुरुपदि[illegible]मलायतनानुत्पादनेन शक्तिपातेन याजयति। परतत्त्वेदी
हस्मा[illegible]च्छद्म[illegible]। श्रीमांश्चासौ शंकरानंदगुरुश्चेति। गंध
दीपवत्[illegible]इत्यादिसमासः। अनेन गुरोरणिमाद्यैश्वर्यसंपन्नत्वं सूचितं। य
[illegible]श्रीयात्[illegible]शंकरोतीति शंकरः। [illegible] इति श्रुतेः। अनेन
श्रीगुरुत्व[illegible]सं पादेने साम[illegible]सूचितं भवति। तस्य गुरोः पादावेव
अंबुजन्मकमलं तस्मै नमः। [illegible]किं विशिष्टाय सविलासमहामोह
ग्राहः ग्रासैककर्मणे। विलासकार्यवर्गः तेन सह वर्तत इति सवि[illegible] स।

हेतु

महामोहमूलात्सुज्ञानं एव ग्राहः। मकरादिवत्स्ववशं आपन्नस्यात्सी[illegible]
त्वहेतुत्वात्। तस्य ग्रासो ग्रसनं निवर्तनं स एव वधः मुख्यं कर्म व्यापारो य[illegible]
स्य तत्तथा। तस्मान्नृहरिः। अत्र शंकरानंदपदद्वयसामानाधिकरण्येन
जीवब्रह्मणोरेकत्वलक्षणो विषयः। जीवस्य ब्रह्मरूपतया परिच्छिन्नत्वस
र्वाविर्भावलक्षणं प्रयोजनं च सूचितं। सविलासेत्यादिना निःशेषानर्थनि
वृत्तिलक्षणं प्रयोजनं मुख्यतया विहितं। इदानीं मध्यांतरप्रयोजनकथन
पुरःसरं ग्रंथारंभं प्रतिजानीते। तत्पादांबुरुहद्वंद्वसेवानिर्मलचेतसां। सु
खबोधाय तत्त्वस्य विवेकोऽयं विधीयते इति॥ तस्य गुरोः पादावेवांबुरुह
कमले तयोर्द्वंद्वं तस्य सेवया परिचर्यया स्तुतिनमस्कारादिलक्षणया नि
र्मलं रागादिरहितं चेतोंतःकरणं येषां ते तथा तेषां सुखबोधाय अनायासे
न सर्वज्ञानोत्पादनाय अयं वक्ष्यमाणप्रकारः। तत्त्वस्यानारोपितस्वरूपस्याप्र
खंडसच्चिदानंदं महावाक्येन लक्ष्यते इति। वक्ष्यमाणस्य विवेकः। आरोपित
त्पंचकोशादिलक्षणात् जगतो विवेचनं विधीयते क्रियते इत्यर्थः। जीवब्रह्मणो

१

रकेवलस्य ज्ञानविषयसंभावनाय जीवस्य सर्वज्ञानादिरूपतां दर्शयति। भेदो ज्ञानस्याभेदप्रतिपादनेन निरस्य साधयति। शब्दस्पर्शादिना तत्र तावद्विषयव्यवहारे जाग्रद्ज्ञानस्याभेदं साधयति॥ ॥शब्दस्पर्शादयो वेद्या वेद्यिव्यात् जागरे पृथक्ततो भिन्नाः तत्संविदेकरूप्यान्न भिद्यत इति। जागरे दृष्टौ योग्योपलब्धौ जागरितस्य शब्दस्पर्शाद्यवस्थाविशेषे वेद्यासंविद्भेदो बंमत्ता शब्दस्पर्शादय आकाशादिगुणत्वेन प्रसिद्धाः आकाशादस्य वैचित्र्यात्परस्परं गन्धादिवद्वैलक्षण्यापत्तेः पृथक् परस्परं भिद्यन्ते तत्त्वे भ्राविवक्षया बुद्ध्या विवेचिताः तत्संविद्रूपाः शब्दादीनां संविन्न ज्ञानैकरूप्यात् वित्संविदिति साकारता सा समानत्वात्। गगनमित्यत्र भिद्यते। अत्रायं प्रयोगः। विवादाध्यासितार्थं वित्स्वात्माविकल्पभेदस्त्वन्याप्राध्यासापरामर्शेऽपि मन्तरेण विभाव्यमानभेदत्वात्। गगनवत्। शब्दसंवित्। स्पर्शस्संविदा भेदेन भिद्यते। संविच्चात्। स्पर्शसंविदिति। एकस्यापि संविदो गगनस्येव पार्थिवभेदेनोपाधिभिन्नव्यवहारोपपत्तौ वास्तवभेदकल्पनायां गौरवं बाधकं मन्तव्यम्॥ ॥ न स्यात्स्वभेद्यनिर्दिष्टानि। तथा स्वप्न इति। यथा जागरणे ...

तदाधार हेतुः प्रति दीपे ६

...दकरूप्यात्संविदोभेदश्च। तथा तेनैव प्रकारेण स्वप्ने ... पोषु प्रसंगः ...
मरित संस्कारजन्यस्य सविषयस्य स्मरणस्य लक्षणायां स्वभावस्य ...म
पि विरयाएव भिन्नाः न संविदिति। ननु यदि स्वप्नजागरणयोरेकाकारता
विषयसंवेदनभेदाभेदाभ्यां। तर्हि स्वप्नो जागर इति भेदव्यवहारः किंनि
मित्तक इत्याशंक्याह। अत्र वेद्यं तु न स्थिरं जागरे स्थिरं। तद्भेदात इति। अत्र
स्वप्ने वेद्यं परि[illegible]मानं वस्तुजातं न स्थिरं न स्थायि प्रतीतिमात्रशरीरत्वा
त्। जागरे तु दृश्यमानं वस्तुजातं स्थिरं स्थायी कालान्तरेपि द्रष्टुं यो
ग्यत्वात्। अतः स्थिरास्थिरत्वेन [illegible] विषयवैलक्षण्यात्तद्भेदः। न योः स्व
प्नजागरणयोर्भेदस्यार्थः। ननु स्वप्नजागरयोर्भेद[illegible]श्चेत् संविदो
भेदस्यादित्याशंक्याह इति यः संविदेकरूपा निश्चीयत इति। एकरूपनिरू
पणतः विज्ञापनं। एवमेव स्थादये ज्ञानस्यैकत्वं प्रसाध्य। [illegible] कालिनः
स्थापितस्य तत्तेनैकत्वप्रसाधनाय तत्र तावत् नु ज्ञानं साधयति॥ [illegible]
सोऽपूर्वतमो बाधो न वेत्स्मृतिरिति। [illegible]

तस्मादुच्छिनद्दितिवा। तस्यसोषूमतमो बोधः। सुषुप्तिकालीनस्यतमसः
।अज्ञानस्ययो बोधो ज्ञानमस्मीनकिंचिदवेदिषमिति। स्मृतिरेवनवेत्तु।
स्मृतिरित्रिनानुभवः। नकारणस्येन्द्रियसन्निकर्षव्याप्तलिंगादेरभावादिति
भावः। तुनः किंतत्राह। साचावबुद्धविषयेति। साचस्मृतिरवबुद्धविषया।अ
वबुद्धो अनुभूतो विषयोयस्याःसा तथोक्ता। यास्मृतिः। सानुभवपूर्विकेति
व्याप्तिर्लोके दृष्टेतिभावः। ननुतोपिकिंतत्राह। अवबुद्धं तदा ततद्भिति। ततः तस्मा
त्कारणात् तर्हिसुषुप्तंतमः। तदासुषुप्तौ अवबुद्धमनुभूतमिति ... पगं
तव्यं। अत्रायंप्रयोगः। विमतंत्रकिंचिदवेदिषमिति। ज्ञानमनुभवपूर्वकं
भवितुमर्हति। स्मृतित्वात् सामेमातेतिस्मृतिवदिति। तस्यानुभवस्यस्ववि
षयाद्ज्ञानाद्भेदं बोधांतराद्भेदंचाह॥ ॥सबोधोविषयाद्भिन्नोनबोधात्स्व
प्नबोधवदिति। सबोधःसोषुप्ताज्ञानानुभवः। विषयादज्ञानाद्भिन्नःपृथक्भवि
तुमर्हति। बोधत्वात् घटबोधवत्। बोधांतरात् भिद्यते बोधत्वात् स्वसंबो
धतद्दति। फलितं कथयन्तुनन्यायमन्यत्रापतितिदिशति। एवं ...

एव स्थानत्रये ष्येकासंवित्तु तद्दद्दिनांतरं म्नासाब्द [illegible] ...लेषु गगनमानपू

षु कुर्वं कथयति। स्थानत्रये = पि यक दिनवर्त्ति जायदा पेव स्थानत्रयपि संवि दे वे

वो मः वाक्यं सावधारण मिति न्यायात्। तदद्दिनांतर इति। यथैकस्मिन् [illegible] स्मि

न्दुर्दीवसेव स्थानत्रये पि ज्ञानं स्यात्तदा। एवमन्यस्मिन्नपि दिवसे ष्वनेकधा प्र

कप्रकारयागत गम्येषु व्यतीतागामिषु मासेषु चैत्रादीष्वब्देषु प्रभवादिषु युगे

षु कृतादिषु कल्पेषु ब्रह्मादिषु ज्ञानं स्यात्तदेव स्यः॥ ॥ संविद [illegible] समर्थ

नफलमाह। नोदेति नास्तमेत्येकासंवी दि तीयतः संविदेका व्यतोनोदति न [illegible]

यते नास्तमेति न विनश्यतीत्यर्थः। अस्या [illegible] कयोः समन्ति विनाशयोरसिद्धे स्या [illegible]

त्ति। विनाशयो स्वयेव संविदा गृहितु मशक्यत्वं संविदंतराभावात् वेति [illegible]

॥ ॥ ननु संवीदंतराभावे ग्राहकाभावादस्या [illegible] मानेऽप्रत्यक्षं [illegible] प्रसज्येत

इत्यत आह॥ ॥ एषा स्वयंप्रकाशेति। अत्रायं प्रयोगः। संवित् स्वयंप्रकाशाप्यवेद्य

सा सत्पराक्षत्वात्। व्यतिरेकेणाघटवत्। न चायं विशेषणासिद्धो हेतुः। संवेदस्तै

स्ववेद्यत्वे अनवस्थानात्। अतः स्वप्रकाशत्वेन नास्त मानाद्या। संविदः सर्वा

नत्त्वविवेक

५५

१११

नन्वासकत्वसंनवान्नजगदांध्यप्रसंगइति चेन्न । अत्र वक्तव्यं संविदो निःसंगं प्र-
प्रकाशत्वं चेत् ततः किमित्यत आह ॥ इयमात्मेति ॥ अत्रायं प्रयोगः इयं संवि-
त्मा आत्मा वितुमर्हति । निःसंगत्वे सति स्वप्रकाशत्वात् । यन्नैवं तन्नैवं यथा घट इ-
ति । आत्मनो निःसंगत्वं संविदः पक्षप्रसाधनेन सत्य[illegible]मपि साधितं भवति ।
निःसंगत्वाद्विनिःसंगत्वात् । निःसंगत्वं संसर्ग[illegible]त्वे तद्यस्यासितं निःसंगत्वमि-
वात्वस्याति नि[illegible]कत्वादिति भावः ॥ ॥ आत्मनं आनंदरूपत्वं साधयति
॥ परानंद इति ॥ आत्मेयमनुभूयते । परः श्चासावानंदश्च परानंदः इति निरतिशय-
सुखस्वरूप इत्यर्थः । तत्र हेतुमाह । परप्रेमास्पदं यत इति । यतोयमात्मा कारुणा-
त्परस्यानिरुपाधिकत्वेन निरतिशयस्य प्रेम्णः स्नेहस्यास्पदं विषयः तःकृ-
तः अत्रेदमनुमानं । आत्मा परानंदरूपः परप्रेमास्पदत्वात् यः परमानंदरूपो
न भवति न चासौ परप्रेमास्पदमपि । यथा घटः न तथायायं परप्रे[illegible]न
[illegible]ति । तस्मात्परानंदरूपोपि भवतीति । नन्वात्मनिर्धेसि तिद्व प्रस्यापल-
भ्यमानत्वात् प्रेमास्पदत्वमेवासिद्धं । अतः प्रेमास्पदत्वमित्याशंक्य तस्य दुःख-
संबंधनिमित्तकत्वेनात्यन्ताऽसिद्धत्वात् प्रेम्णश्चात्मन्यनुभवसिद्धत्वान्न वावि

2230

[illegible]पमिहरति। मा न भूवं हि [illegible] भूयासमिति प्रेमात्मनीक्ष्यत इति।
यी यस्मात्कारणादात्मनि विषये मा न भूवं अहं मा भूवमिति न म-
वं कदापि मा भूवं। किंतु भूयासमेव [illegible] सचमेव मम [illegible]
दं विधं प्रेमेक्ष्यते। सर्वैरनुभूयते। अतो नास्ति द्विरिमर्थः। मा [illegible]
पासिद्धिः। प्रेम्णः परत्वेमानानामावाद्विशेषणासिद्धिहेतोरिति आशं-
ह।। तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि [illegible] मिति।
अन्यत्रस्यातितिक्ते पुत्रादौ यत्तु प्रेम तदात्मार्थं तेषामात्मशेषत्वनि-
मित्तकमेव न स्वाभाविकं। एवमात्मनि विद्यमानं प्रेमान्यार्थं [illegible] त्मना-
न्यशेषत्वनिमित्तकं न भवति। किंचात्मनिमित्तकमेव यतो निरूपा-
क चोक्तत्परमं निरतिशयं फलितमाह। तेन परमानंदतात्मन इति। ते-
न निरतिशयप्रेमास्पदत्वेनात्मनः परमानंदतो निरतिशयसुखरू-
पं सिद्धं। एतैः सप्तभिः श्लोकैः प्रतिपादितमर्थं संक्षिप्य दर्शयति। [illegible]
सच्चिदानंदत्वात्मा युक्तेयति।। ।।शब्दस्पर्शादयद्ग्र्सादिनाज्ञान-

नित्यत्वं प्रसाध्य । तस्यैव द्वयमात्मेत्यात्मत्वप्रसाधनेनात्मनः सच्चिद्रू[illegible]
त्वं साधितं परानंद इत्यादिना परमानंदरूपं समर्थितं । अतथा त[illegible]
त्माहावाक्ये त्वंपदार्थः सच्चिदानंदरूपः सिद्धः । ननूक्तलक्षणस्या[illegible]
नो दुःखस्यापगतत्वादुपनिषदां निर्विषयत्वेनाप्रामाण्यप्रसंग इत्यत
त्वं व्याह ॥ ॥ तथाविधः परब्रह्म तयोश्चैक्यं स्यात् तेषूपदि[illegible]रूपतद् [illegible]
। तथा ताहृशोविधाप्रकारो यस्य तत्तथाविधः । सच्चिदानंदरूपं [illegible]
स्य तत्पदार्थः तयोस्त्वंपदार्थयोरैक्यन् [illegible] रवं [illegible] केरस [illegible]
तेषु वेदांतेषु पदिश्यते प्रतिपाद्यते । अतोनर्थ[illegible] सान[illegible] र्तिः । [illegible]
मिसंयर्थः । आत्मनः परमानंदरूपत्वमाक्षिपति । आत्मानं [illegible] प
मेन विषये स्पृहेति ॥ परमानंदरूपत्वं [illegible] नासते नासदे [illegible] न
[illegible] प्रतीतो न परं प्रेमस्यात्मनि निरतिशयं [illegible] न स्यात् । विषय
ज्ञानजन्यत्वात् स्नेहस्य [illegible] प्रतीतेर्विषयोत्सुखं [illegible] यने [illegible] गादो [illegible] स्व
स्व बाह्य [illegible] हाई [illegible] न स्यात् । फलप्राप्ते [illegible] साधने [illegible] पप्रतेः । नि
[illegible] निरतिशयाने [illegible] सपि [illegible] साधन [illegible] रतं इत्यादिना पद्यं पैते

वैषइकेसुखेस्पृहा [illegible] स्मा [illegible] पतः । [illegible] नत्तुणप [illegible] ति [illegible] कारां

तरस्या [illegible] संगवा [illegible] भेवक्षितिपरिहरति ॥ ॥ [illegible] नामे [illegible] पनात सोप [illegible]

[illegible] इतात्मनइति ॥ ॥ यतो ज्ञानाज्ञानपर्याययोः त्रयोरपि द्वावस्ति [illegible]

[illegible] तत्स्था [illegible] नो सो परमानंदता ज्ञानेपि प्रतीतोस [illegible] लामपि व्या [illegible]

तानवति ॥ ॥ नन्वेकस्य युगपत् ज्ञानाज्ञाने न युज्येते इत्याशंक्य [illegible]

[illegible] मद [illegible] रवेनुपपत्तिरहितं वैवानाध्यइत्याह ॥ ॥ [illegible] तृ पर्ग [illegible]

ध्यस्थ पुंसो ध्ययनशब्दवत् । ज्ञानेप्यज्ञानमिति [illegible] ण वद पा [illegible]

नां वर्गः स तु हा । । तस्य मध्यौ ति स ध्येतृ वर्गमध्यस्थः । स्य [illegible]

ति तथा तस्याध्ययनं त [illegible] कर्तृकं पठनं तस्य शब्दो [illegible] ध्वनिः । य [illegible]

हस्य पितुना समानेपि सामान्यतो नास्ते न विशेषतः । [illegible] पुत्र [illegible]

रिति तथानंदस्यापि ज्ञानेप्यज्ञानं भवतीत्यर्थः ॥ द्वितीयं प्रत्याह ॥ ॥ [illegible]

स्य प्रतिबंधेन युज्यत इति । ज्ञानेप्यज्ञानमित्येतदत्राप्यनुषंजनीयं ज्ञा

नस्य स्फुरणस्य प्रतिबंधेन वक्ष्यमाणलक्षणेन ज्ञानेप्यज्ञानं सामा [illegible]

प्रतीतावपि विशेषाकारेणाप्रतीतिर्युज्यत उपपद्यत इत्यर्थः । कोसं [illegible]

बंधतेऽसत्वात्। प्रतिबंधोऽस्ति नास्तीति व्यवहारार्हवस्तुनि। संनि[illegible]स्य
विरुद्धस्य तस्योत्पादेऽनुत्पन्नस्य नष्टत्वे वा अ[illegible]लाभ्यते। इति। ॥ अस्ति नास्तीति व्यवहारार्हवस्तु
नि। अस्तीति विद्यते प्रकाशते इत्येवं प्रकारं व्यवहारमर्हतीति। अस्ति नास्तीति
तीति॥ व्यवहारार्हं तस्य तत्स्वरूपमिति तथा तस्मिन् तत्पूर्वोक्तं व्यवहारे [illegible]
स्य निरासस्य विरुद्धस्य नास्तिता। तीहेवं तस्य परस्य तस्य व्यवहारस्यानुत्पा
दनं जननं प्रतिबंधः उच्यते। तल्लक्षणस्य प्रतिबंधस्य कारणं [illegible]
र्शितिकयाक्रमेण दर्शयति। तस्य हेतुं समानाभिहार [illegible] ध्व[illegible]
तो। इत्यादि रविषय व्यामोहेकनिबंधन [illegible] ने [illegible]
त्र ध्वनिश्रवणलक्षणोऽहेतो तस्य प्रतिबंधस्य हेतुः। कारणं समाना[illegible] ना
भिहारः बहुभिः सहपठनं। इहदार्श [illegible] व्यामोहैकनीबंधनं [illegible]
हानां विपरीतज्ञानानां एकनिबंधनं मुख्यं कारणं [illegible]
अविद्यावस्थानं प्रतिबंधस्य हेतुरित्यर्थः। इदानीं प्रतिबंधहेतुम
द्यां व्युत्पादयितुं तन्मूलतां प्रदर्शयन्नुत्पादयति॥ [illegible] प २ न
अप्रतिबिंबसमन्विता। [illegible] सुवृत्ताय [illegible] संति [illegible] ति॥

सच्चिदानंदरूपं ब्रह्म तस्य प्रतिबिंबेन समन्विता प्राप्तासमन्विता [illegible]की
तमोरजःसत्त्वगुणानां साम्यावस्थाया सा प्रकृतिरुच्यते। सा च द्विविधा
द्विप्रकारा भवति। चकारादस्य मायापदवाच्यत्वं सूचयति। [illegible]
द्वैविध्यमेव दर्शयति॥ ॥सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते
॥सत्त्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिः॥ गुणांतरेणाकलुषीकृतता
विशुद्धिर्गुणांतरेण कलुषितत्वं ताभ्यां सत्त्वशुद्ध्यविशुद्धिभ्यां [illegible] ताभ्यां ते
द्विविधे माया अविद्ये मायेत्यविद्येति च मते संमते। शुद्धसत्त्वप्रधा
ना माया मलिनसत्त्वप्रधानाविद्येत्यर्थः। यदर्थं मायाविद्ययोर्भेदः कृ
तः तदिदानीं दर्शयति॥ ॥मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः॥
अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधेति॥ ॥मायाबिंबः मायायां
प्रतिफलितश्चिदात्मा तां मायां वशीकृत्य स्वाधीनां कृत्वा वर्तमानः सर्वज्ञः
सर्वज्ञत्वादिगुणकः ईश्वरः स्यात्। अविद्यावशगः अविद्याप्रतिबिंबितो
न तत्परतंत्रस्तु चिदात्मान्यो जीवः स्यात्। स च तद्वैचित्र्यात् तस्या अवि
द्याया उपाधिभूताया वैचित्र्याद्विशुद्धतारतम्यात् अनेकधा अनेकप्रकारः

देवतीर्थगादिभेदेन विवियोजना वृत्तीयार्थः॥ ॥ यथामुंजादिषिकेवमा
त्मा युक्त्या समुद्धृतः। शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायत इत्यत्र शा
रत्रयाद्विवेचितस्य परब्रह्मत्वं वक्ष्यति। तत्र को नोनि नित्रि पिशरीरोपाधि
रुपाधिकोवा जीवः किं रूपो भवतीत्याकांक्षायां तत्सर्वं क्रमेण व्यक्त्यादय
ति॥ साकारणशरीरमीत्यादिना॥ साकारणशरीरं स्यात्प्राज्ञस्तत्राभिमा
नवान्॥ ॥ साव्यविद्याकारणशरीरं। स्थूलसूक्ष्मशरीरादिकारण अनु
त्वसवस्थाविशेषात्मकारणत्वमुपचारात्। विशीर्यते न च ज्ञानेन विनश्य
तीत्युक्तिशरीरं स्यात्तत्रकारणशरीरे निमानवान् । ताद ... सनाह
मित्यभिमानवान् जीवः प्राज्ञः सप्रज्ञ व्यविनाशी स्वतत्पात्वनु ... पायस
स्य प्रज्ञः प्रज्ञ एव प्राज्ञः। एतेनामकस्यादिसर्वे क्रमप्राप्ते सूक्ष्मशरीरोत
पाधिकं च जीवं वक्ष्यन्नादयितुं तत्कारणाकाशादिसृष्टिमाह॥ ॥ तमःप्र
तां प्रसूते तत्कोपार्दश्वरात्तया। वियुक्तैव ... लेवा न्तेनाभिज्ञाद्ध्रुवति
तं ... गायते सा प्राज्ञा नाम्नीमाय सुख दुःख सर्व मन्कारा ... य स्तामः प्रधा
... तस्तमोगुणप्रधानाग्राः प्रसूते पूर्वोक्तायाः तपदान नारपान्न माया

श्री

सकाशादीश्वराद्यनादिशक्तियुक्तस्य जगदधिष्ठातुरनुग्रहादीक्षापूर्वक
सर्जनेच्छारूपया तन्निमित्तकारणभूतया वियदादीनि भूतयोर्व्यां तानि पंच
भूतानि अजनिरे पादुर्भूतानीति तत्पन्नानीत्यर्थः। भूतसृष्टिं निरूप्य [illegible] भो
तिकसृष्टिमभिदधानत्वादौ ज्ञानेन्द्रियसृष्टिमाह॥ ॥सत्वांशैः पंचभिस्तेषां
क्रमादिन्द्रियपंचकं। श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते॥ इति
तेषां वियदादीनां पंचानां सत्वांशैः सत्वगुणभागैः उपादानैः श्रोत्रत्वग
क्षिरसनघ्राणाख्यं इन्द्रियपंचकं इन्द्रियाणि ज्ञानेन्द्रियाणि तेषां पंचकं क्रमा
दुपजायते॥ एकैकस्य तु सत्वांशादेकमिन्द्रियं जायत इत्यर्थः। सत्वांशैर्मिलितै
सैकमसाधारणं कार्यमभिधाय सर्वेषां साधारणं कार्यमाह॥ ॥तैरन्त
करणं सर्वैरिति तैः सत्वांशैः सर्वैः संभूय वर्तमानैरन्तःकरणं मनोबुद्ध्याद्या
न्तःकरणं द्व्यमुपजायत इत्यनुषंगः॥ ॥तस्यावान्तरभेदं [illegible]मित्तमाह। वृत्ति
भेदेन तद्द्विधेति। तदन्तःकरणं वृत्तिभेदेन परिणामभेदेन द्विधा द्विप्रकारं
भवति। वृत्तिभेदमेव दर्शयति। मनो विमर्शरूपं स्याद्बुद्धिः स्यान्निश्चया
त्मिकेति॥ ॥विमर्शरूपं विमर्शः संशयात्मिका बुद्धिः सारूप्यं [illegible]

वृत्तिः

तन्मनस्या निश्चयो ध्यवसायः स यया सा स्वरूपं यस्याः सा निश्चयात्मिका
सा वृत्तिर्बुद्धिः स्यात् ॥ क्रमप्राप्तानां रजोंशानां प्रत्येकं असाधारणकार्य
माह ॥ ॥ रजोंशैः पंचभिस्तेषां क्रमात्कर्मेंद्रियाणि तु । वाक्पाणिपा
दपायूपस्थाभिधानानि जज्ञिरे इति ॥ ॥ तेषां वियदादीनामेव पंचभि
रजोंशैः ॥ रजोंशानां सकाशात् [illegible] पादानं [illegible] तैः वाक्पादपाणिपायूपस्थाभिधा
नि एतन्नामकानि कर्मेंद्रियाणि क्रियाजनकानींद्रियाणि जज्ञिरे ॥
रजोंशानामेव साधारणं कार्यमाह । तैः सर्वैः सहितैः प्राण इति । साहितैः
संभूय कारणतां गतैः प्राण आयत इति शेषः । तस्या वृत्तिभेदमाह ॥ वृ
त्तिभेदात्स पंचधा इति । स प्राणो वृत्तिभेदात् प्राणनादिव्यापारभेदाद्वृत्तु
पंचधा पंचप्रकारो भवति वृत्तिभेदानेव दर्शयति ॥ प्राणापानसमानश्चो
दानव्यानौ च ते पुनरिति । ते तु पुनस्ते तु भेदाः प्राणादिश[illegible] [illegible] अर्थः ॥
[illegible] स्पष्टार्थं आकाशादिकानां सूक्ष्मरूपत्वात् तदीयानीति दर्शयति । बुद्धिकर्मे
न्द्रियप्राणपंचकैर्मनसा धिया । शरीरं सप्तदशभिः सूक्ष्मं [illegible] मिति । बुद्धयो ज्ञा
नानि [illegible] मूर्तिव्यापाराः तज्जनकानींद्रियाणि बुद्धींद्रियाणि बुद्धींद्रिया

ना

११५

231

त्विक्छ्रोत्रेंद्रियाणि चेत्यर्थः। बुद्धिकर्मेंद्रियाणि च। प्राणापानव्यानोदानेंद्रियप्रा
णाः तेषां पंचकानि तैर्मनसा चिन्मात्रेणाधिकेन धिया निश्चयरूपया बुध्या
ये सह सप्तदशसंख्याकः सूक्ष्मशरीरं भवति। तस्यैव संज्ञा तत्र म
हा। तल्लिंगमुच्यत इति। तच्चैतदेवापि सर्थः। एवं सूक्ष्मशरीराभिमानित्वाय। त
दभिमानि च प्रयुक्तो। प्राज्ञस्वरूपस्य स्वच्छादर्शयति॥ प्राज्ञस्तत्राभिमानेन तैज
सत्वं प्रपद्यते। हिरण्यगर्भतामीश इति प्राहुः मलिनसत्त्वप्रधानाविद्योपा
धिको। जीवः। तत्र तैजसशब्दवाच्यः तः कथं प्राप इत्युक्ते। लिंगशरीराभिमा
नेन तदात्माभिमानेन तैजसत्वं प्रपद्यते प्राप्नोतीत्यर्थः। विशुद्धसत्त्वप्रधा
नमायोपाधिकः परमेश्वरः। तत्र शरीरेभिमानेन हिरण्यगर्भतां हिरण्य
गर्भसंज्ञकं च प्रपद्यत इत्यनुषंगः। तैजसहिरण्यगर्भयोर्व्यष्टित्वं समष्टि
त्वं च भवति तत एव भेद इत्यर्थः। ईश्वरस्य समष्टिरूपत्वे जीवानां व्यष्टिरू
पत्वे च कारणमाह॥ ॥समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात्। तद
भावात्ततोन्ये तु कथ्यंते व्यष्टिसंज्ञयेति॥ ईशः हिरण्यगर्भ ईश्वरो सर्वेषां
लिंगशरीरोपाधिकानां तैजसानां स्वात्मतादात्म्यवेदनात् स्वात्मना ता

दात्म्यस्यैकत्वस्य वेदनात् ज्ञानात् समष्टिर्भवति।। ततः ईश्वरादन्ये
जीवास्ते न तदभावात्। तस्य तादात्म्यावेदनाभावात्। व्यष्टिसंज्ञाया व्या
ःपादनकथनं। एवं लिंगशरीरं तदुपाधिकान् तैजसहिरण्यगर्भौ च
दर्शयित्वा स्थूलशरीराद्युत्पत्तिसिद्ध्यर्थं पंचीकरणं निरूपयन्नाह। तद्भोग
यपुनर्भोग्यभोगायतनजन्मने। पंचीकरोति भगवान् प्रत्येकं वियदादि
कमिति।। भगवान् ऐश्वर्यादिगुणषट्कसंपन्नः परमेश्वरः पुनःपुनरपि
तद्भोगाय तेषां जीवानां भोगायैव भोग्यस्यान्नपानादि भोगायतनस्य ज
रायुजादिचतुर्विधशरीरजातस्योत्पत्तिसिद्ध्यर्थं वियदादिकमाकाशादि
कं भूतपंचकं प्रत्येकमेकैकं पंचीकरोति। अपंचात्मकं पंचात्मकं संपद्यमा
नं करोति।। ।।कथमेकैकस्य पंचपंचात्मकत्वमित्यत आह। द्विधा विधाय चै
कैकं चतुर्धा प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते इति। विय
दादिकमेकैकं द्विधा द्विधा तत्रैकोऽर्धं इतो द्विधाशब्दः द्विरुक्तः एतत्त्वा भाग
द्वयविशिष्टं ... पुनश्च पुनरपि प्रथमं प्रथमं भागं चतुर्धा भागचतुष्टये

जन्मने

स्मान्च

पंचीकृत्याद्युपद्यते। स्वस्वेतर द्वितीयांशैः स्थान... त्मान्द्इते पंच
तुर्णां चतुर्णां भूतानां योयो द्वितीयो स्थूलो भागः। तेन तेन सहि प्रथम प्रथ
मेतानि शानां चतुर्णां चतुर्णां मध्ये एकैकस्य योजनात्तेवियदादयः प्रत्ये
कं पंच पंचात्मकानि भवंति। एवं पंचीकरणमभिधाय तेभ्यो भूतेभ्य उत्पाद्यं कार्य
मर्थं दर्शयति॥ तेभ्यस्तत्र भुवन भोग्य भोगाश्रयोद्भव इति। तेभ्यः पंचीकृत
भूतेभ्य उपादानकारणभूतेभ्यः अंडो ब्रह्मांडं उत्पद्यते। तत्र ब्रह्मांडांतः भुवना
नि उपरि भागवर्तमानाः भूर्भ्वादयः सप्त लोकाः। अधस्थितान्यत
लादीनि सप्त पातालानि तानि तेषु भुवनेषु तैस्तैः प्राणिभिः भोग्यानि भोग्या
न्यन्नादीनि तत्तल्लोकोचितशरीराणि च तेभ्यः पंचीकृतेभ्यो भूतेभ्य ईश्वरा
ज्ञया जायंते। एवं स्थूलशरीरोत्पत्तिमभिधाय तेषु शरीरेष्वभिमानवतो
हिरण्यगर्भस्य समष्टिरूपस्य वैश्वानरसंज्ञकत्वं। एकैकशरीराभिमानव
तां व्यष्टिरूपाणां तैजसानां विश्वसंज्ञकत्वं भवतीत्याह॥ हिरण्यगर्भो स्थू
लेस्मिन्देहे वैश्वानरो भवेत्। तैजसा विश्वतां याता इति॥ अस्मिन्स्थूल
देह वर्तमानो हिरण्यगर्भो वैश्वानरो भवेत्। तत्र वर्तमानास्तैजसा विश्वा भव

स्थूल

तिात षार्मे वां नर स्नेदस्माहादेवतिर्यक्नरादयइति॥ ॥इदानीं तेषां विश्व
संज्ञां प्राप्तानां जीवानां तत्त्वज्ञानं हि तच्चैन संसारापत्तिप्रकारं सदृष्टांतं लो
कदृष्टेनाह॥ नेपराकृदर्शीनः प्रत्यक्चैवबोधैचिवर्जितः॥ कर्मतो कर्मनो
गाय कर्मकर्तृत्व भुंजते॥ नघांकीटाई वावर्तादावर्ती तरमाश्नुते॥ ब्र
जतो जन्मनो जन्म लब्ध्वं तेनैव निर्वृतिमितिा॥ तदेवादयः पराकृदर्शी
नः बाह्यानेव शब्दादीन्पश्यंतः नतु प्रत्यगात्मानं। परांचि खानि व्यतृणत्स्व
यं भूस्तस्मात्पराङ्पश्यतीनांतरात्मन्नित्ति श्रुतेः॥ ननु तार्किकाद्यो देह
व्यतिरिक्तमात्मानं जानं तीत्याशंक्य यद्यपि ते देहव्यतिरिक्तमात्मानं जानं ती
तथापि श्रुति सिद्धं प्रत्यक्तत्वं न जानंतीत्याशयेनाह प्रत्यक्तत्वबोधविवर्जि
ताः मिति। अतएव नागायत्तखात्यनुमताय मनुष्यादिशरीराण्यधिष्ठाय कर्मत
त्खारोप्तचितानि कर्माणि कुर्वंति॥ अ॥ तावैषयनं पुनश्च कर्मकर्तृत्वादिना
श्रीरेसत्फलं भुंजते पाफलानुसारावानावे तत्तस्स जातीय थानुपपद्यातत्र सा
धनानुष्ठानानुपपन्ने॥ एवं वर्तमानास्ते जीवाः संसारप्रवाहपतिताः किटाद्या व
र्तिवर्तीनरनाश्नुवंजतो यथानिर्वृतिसुखं न लभंते॥ एतमीमुज... न्म

...नैव सुखेनैव लभंत इति। एवं संसृ... वृत्तिम... यः यतं ...वृत्तिरूप... दर्शयि
तुं दृष्टांतं तावदाह॥ ॥स कर्मपरिपाकात्तैकरूपा निधिना वृतः। पाश्चात्तिर
तरुच्छायां विश्राम्यंति यथा सुखं इति। तत्कीटाः स कर्मपरिपाकात् पूर्वोपा
र्जितपुण्यकर्मपरिहारात्। कृपालुना केन। चित्सुरूप विज्ञाय जोध्रु... नदीप्र
वाहाद्बहिर्निस्सार्य तास्तं तत्तीरतरुच्छायां प्राप्य सुखं यथा सुखं इद
तयायं बहिर्विश्राम्यंति। इदानीं सिद्धम यद्दृष्टांताद्दार्ष्टांतिके योजयति। उपदेशम
वाप्यैवमाचार्यात्तत्त्वदर्शिनः। पंचकोशविवेकेन लभंते निर्वृतिं परां॥ इति॥
एवमुक्तेन प्रकारेण पूर्वोपार्जितपुण्यकर्मपरि...वशादेव तत्त्वदर्शिनः प्र
त्यगभिन्नं ब्रह्म साक्षात्कारवतः आचार्यात् गुरोः सकाशात् उपदेशं॥ ॥तद्व
मस्यादिवाक्यार्थज्ञानसाधनं श्रवणं च स्पनाम... प्य संपाद्य पंचकोशवि
वेकेन अन्नादीनां पंचानां कोशानां विवेकेन वक्ष्यमाण विवेचनेन परां निर्वृतिं
मोक्षसुखं लभंते प्राप्नुवंति। किं तेऽन्नादयः पंचकोशा इत्याकांक्षायां तानुद्दिशति
। अन्नं प्राणं मनो बुद्धिरानंदश्चेति पंच ते कोशा इति। अन्नं प्राणो मनो बुद्धिरानंद
श्चेति पंचकोशाः बुद्धिर्विज्ञानं तेषामन्नमयादीनां कोशशब्दाभिधेयत्वे कारण

रा

रि दृष्टांते

पाक

श्री

माह॥ तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेदिति। तैः कोशैरावृतः। आदा
दिभिः स्वात्मा स्वरूपं तत्त्वतः। आत्मा विस्मृत्या स्वस्वरूपविस्मरणेन संसृ
जन्मादिप्राप्तिरूपं संसारं व्रजेत्॥ स्पष्टं। कोशो यथा कोशकारक्रियामा
कार कल्पेन कुशाहेतुः। एवं अन्नमयादयोऽप्यद्यानंद[illegible]रक वेनात्म
नः कुशाहेतुत्वात् कोशा इत्युच्यन्ते इत्यर्थः। तत्र को ज्ञानो स्वरूपापि क्रमेण
उत्पादयति। स्पात्त्वं छिद्यते सादिनो मोक्षादिर्निरिहं तेन। स्यात्[illegible] ह
तन्त्रे तो [illegible]देह [illegible] स्थूलान्न संज्ञकः॥ लिंगे तु राजसैः प्राणैः प्राणः कर्मेन्द्रियैः सह
॥ सात्त्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः। तैरेव साकं विज्ञानमयो धी
र्निश्चयात्मिका। कारणे सत्त्वमानंदमयो मोदादिवृत्तिभिरिति। पंचीकृतेभ्यो
भूतेभ्यो जातत्वात् स्थूलदेहो न संकेतः। अन्नमयशब्दितकोशः स्यात्। प्राणमयः
तु प्राणमयकोशस्तु लिंगे लिंगशरीरे वर्तमानैः राजसैः रजोगुणकार्यैः
[illegible]: प्राणापानादिभिः वायुभिः वागादिभिः कर्मेन्द्रियैः सह [illegible] स्यो
त्। विमर्शात्मा मनोमयः सकैः पंचभूतसत्त्वकार्यैः यन्मनःकं तत्[illegible] सात्त्विकैः
[illegible] कार्यभूतैः धीन्द्रियैः साकं [illegible] हितं मनो[illegible] कोशः स्यादित्यर्थः

237

...संबंधः। निश्चयात्मिका धीः सति ... मनः ... यरूपा बुद्धि ... वृ
त्तिः ज्ञानेंद्रियैः साकं सहिता सती विज्ञानमयः॥ विज्ञानमयाख्यः कोशः
स्यात्। कारणे कारणशरीरे ... तायां अविद्यायां यन्मलिनसत्त्वं ... [illegible]
दादिवृत्तिभिः प्रियं मोद प्रमोदाख्यवृत्तिभिः ... [illegible] ... विशे
षस्सहितमानंदमयः। आनंदमयाख्यः कोशः स्यादिति। ननु स्थूलशरी
रां अन्नमयादिशब्दवाच्यत्वे सत्यपि वायवादिरूपोऽन्तरसमयः इत्यपि ...
तस्माद्वा एतस्मादन्नरसमयात् अन्योऽन्तर आत्मा प्राणमयः। अन्यो
ऽन्तर आत्मा मनोमयः इत्यादिश्रुतौ आत्मनामन्नमयादिशब्दवाच्यत्वं कथमुच्य
त इत्याशंक्य देहादीनां अन्नादिविकारत्वेनान्नमयादिशब्दवाच्यत्वे आत्मनः को
शेन तेन तेन कोशेन तादात्म्याभिमानात् तत्तन्मयत्वं इत्याह। तैस्तैः कोशैः संगतः तादात्म्या
... तत्तन्मयो भवेदिति। आत्मा प्रसंगात् ... कोशैः तेन तेन कोशेन स
ह तादात्म्याभिमानात् तत्तन्मयः। तत्तत्कोशमयात्मत्वं व्यवहारः ...
अन्नमयादिकोशप्राधान्यादन्नमयादिशब्दवाच्यः इत्यर्थः। नु शब्दः आत्मनः को
शात्मा ३

ततः द्योतनार्थः।

शान्योवेलक्षण्यौर्थः। कथं तर्हि एवंविधस्यात्मनो ब्रह्मत्वं न वृत्तीत्याशंक्य कोशो
भ्यो विवेचनाद्भवतीत्याह॥ ॥अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः। स्वा
त्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते॥ इति॥ अन्वयव्यतिरेकाभ्यां वक्ष्यमाणाभ्यां
पंचकोशविवेकतः। पंचानां कोशानामन्नमयादीनां विवेकतः प्रत्यगात्मनः
विवेचनेन पृथक्कारणेन यद्वा पंचकोशेभ्योऽन्नमयादिभ्य आत्मनः पृथक्क
रणेन स्वात्मानं प्रत्यगात्मानं ततस्तेभ्यः कोशेभ्यः उद्धृत्य बुद्ध्या निष्कृष्य चिदा
नंदस्वरूपं निश्चित्य परं ब्रह्मोपलक्षणं ब्रह्म प्रपद्यते प्राप्नोति ब्रह्मैव भवती
त्यर्थः। इदानीं विवक्षितमन्वयव्यतिरेकौ दर्शयति॥ ॥अभाने स्थूलदेह
स्य स्वप्ने यद्भानमात्मनः। सोऽन्वयो व्यतिरेकस्तद्भानेऽन्यानवभासनं॥ इति
स्वप्ने स्वप्नावस्थायां स्थूलदेहस्यान्नमयकोशस्याभानेऽप्रतीतावपि यत्
आत्मनः प्रतीयमानस्य यद्भानं स्वप्नसाक्षित्वेन तद्भासकत्वेन स्फुरणमस्ति सः अन्वयो
ऽयं। तस्यामेव स्वप्नावस्थायां तद्भाने तस्यात्मनः स्फुरणे सति [illegible] नवभासन
स्य स्थूलदेहस्यानवभासनं अप्रतीतिर्व्यतिरेकः। स्थूलदेहस्येति [illegible]
अन्वयव्यतिरेकशब्दाभ्यामनुवृत्तिरनुवृत्तिरूपेण एवं रूपतयेत्

स्यानात्मत्वावबोधकान्वयव्यतिरेकादुक्तरीत्या वा लिंगदेहस्यानात्मत्वावबो-
धकौ तौ दर्शयति॥ लिंगाभावे सुषुप्तौ स्यादात्मनो भानमन्वयः। व्यतिरे-
कस्तु तद्भाने लिंगस्याभानमुच्यत इति॥ सुषुप्तौ स्वप्नवस्थायां लिंगभा-
ने लिंगस्य सूक्ष्मदेहस्याभानेऽप्रतीतावात्मनो भानं तदवस्थासा-
क्षित्वेन स्फुरणमात्मनोऽन्वयस्यात्। तद्भाने त्वात्मनो भाने लिंगदेहस्या-
स्फुरणं व्यतिरेक उच्यते। ननु पंचकोशविवेचनमुपक्रम्य लिंगदेहविवेच-
ने प्रवृत्तस्य संगतिमित्याशंक्य प्राणमयादिकोशत्रितयस्य तत्रैवांतर्भावेन
प्रवृत्तासंगतिरित्याह॥ तद्विवेकाद्विविक्ताः स्युः कोशाः प्राणमनोधियः इ-
ति। तस्य लिंगशरीरस्य विवेकात् विवेचनात् प्राणमनोधीयस्तत्नामकाः
कोशाः विविक्ताः आत्मनः पृथक्कृताः स्युः। नन्वयत्न आह। ते हि त्रयो गुणा-
वस्थाभेदमात्रात् पृथक्कृता इति॥ ॥हि यस्मात् कारणात् ते प्राणमयाद्-
यः तत्र तस्मिन् लिंगशरीरे गुणावस्थाभेदमात्रात् गुणयोस्तत्वरजसोर-
वस्थाभेदमात्रात् गुणप्रधानभावेनावस्थाविशेषादेव पृथक्कृतास्ते त्रैन
निर्दिष्टा इत्यर्थः॥ इदानीमानंदमयकोशत्वेन विवक्षितस्य कारणशरीरस्य

न २

नन्दविवेक

वा

विवेचन — माह। स्थूलशिशनेन ना ततु समाधा [illegible] त्मनोन्वयः। व्यतिरेकस्त्वा
त्मनाने स्थूलभूत्येन वनासनमिति॥ समाधौ विदयमाणलक्षणायां सन्ध्या
वस्थायां स्थूलदृष्टिनाने स्थूलभिशब्दोपलक्षितस्य कारणदेहस्य रूपस्या
प्रतीतो व्यात्मनस्तु। तुशब्दावधारणो आत्मन एव भानं स्फुरणं यदस्ति
स आत्मनोन्वयः। आत्मानाने आस्तस्फुतोस्ति सा सुषुप्त्यनवभासनं स्थू
लस्थूपलक्षितस्याज्ञानस्याप्रतीतिरेव व्यतिरेकस्तस्येति। अत्रायं प्र
योगः। प्रत्यगात्मा अन्नमयादिभ्यो भिद्यते तेषु परस्परं व्यावर्तमानेष्वपि
स्वयमव्यावर्तित्वात्। यद्येषु व्यावर्तमानेष्वपि न व्यावर्तते तत्तेभ्यो भिद्यते
यथा कुसुमेभ्यः सूत्रं यथा वा शरवेणादिभ्यो व्यक्तिभ्यो गोत्वमिति। एतच्च यव्य
तिरेकाभ्यां कोशपंचकादिविवेकस्य आत्मनो ब्रह्मप्राप्तिर्नवनीतस्यैको त
त्प्रतिवादिकोऽयं गुहमात्रं पुरुषात तरात्मसादिकोतं विंचाक्षुरेमसूत
इषीकां कठवल्लिश्रुतिमर्थतः पठति। कथमुक्तं स्पष्टीकरोति वामा माशु समासः सु
बुनेः। शरीरचितादिरे परं ब्रह्मैव जायते इति। यथा येत प्रकारेण उत्पात
वालका = विज्ञापालड पीकाम न स्व मो मल्लं तु सं सु क्याबहि वरवेम

यद्वा सच्चिदानंदलक्षणं ब्रह्म तामसीं तमोगुणप्रधानां मायामादाय तदुपाधि-
त्वेन स्वविलसज्जगतः चराचरात्मकस्य कार्यवर्गस्य उपादानमध्यासा-
धिष्ठानं शुद्धसत्त्वां विशुद्धसत्त्वप्रधानां तामुपाधित्वेन स्वीकृत्य निमित्तमु-
पादानाद्यखिलं कर्तृ भवति तद्ब्रह्म निमित्तोपादानोभयरूपं ब्रह्म तत्त्व-
मीरितं च तमस्यादिवाक्यस्थेन तत्पदेनोच्यते॥ ॥ त्वंपदस्यार्थमाह॥ ये-
दा मलिनसत्त्वां तां कामकर्मादिदूषितां। आदत्ते तत्परं ब्रह्म त्वंपदेन
तदोच्यत इति॥ तदेव ब्रह्म यदा यस्यामवस्थायां मलिनसत्त्वां मिश्र-
रजस्तमोमिश्रणेन मलिनसत्त्वप्रधानामत एव कामकर्मादिदूषितां तामवि-
द्याशब्दवाच्यां मायामादत्ते उपाधित्वेन स्वीकरोति तदा त्वंपदेनोच्यते॥
एवं तत्त्वंपदार्थौ निर्धार्य वाक्यार्थमाह॥ त्रितयीमपि तां मुक्त्वा परस्परवि-
रोधिनीं। अखंडं सच्चिदानंदं महावाक्येन लक्ष्यते इति॥ त्रितयीमपि त्रि-
प्रकारमपि तमःप्रधान विशुद्धसत्त्वप्रधान मलिनसत्त्वप्रधानभेदेन भिन्नां
मा एव परस्परविरोधिनीं मायां [illegible] अखंडं भेदरहितं सच्चि-
दानंदं ब्रह्म महावाक्येन लक्ष्यत इत्यर्थः॥ ननु एवं लक्षणावृत्त्या वाक्यार्थ

व्यतिरेक

नंस्थितानां स्थूलप्रपंचानां विलजनलक्षणेनोपायेन समुच्छिद्यते । एवमा
त्मापि युक्त्यान्वयलक्षणेनोपायेन शरीरत्रितयात् शारीरात्तत्पूर्वकोशा
नुयायिभिः ब्रह्मचर्यादिसाधनसंपन्नैरधिकारिभिः समुद्धृतः पृथक्कृतस्त
श्चेत्परं ब्रह्मैव जायते चिदानंदरूपत्वस्य लक्षणस्योभयोर विशि
ष्टत्वादि सन्निप्रायः । एतावद्ग्रंथसंदर्भेण परस्य तत्वज्ञानस्य निरूपितत्वा
त्तदुत्तरग्रंथजातस्यानारंभप्रसंग इत्याशंक्य तदारंभसिद्धये पूर्वोक्तानु
कीर्तनपूर्वकमुत्तरग्रंथस्य तात्पर्यमाह ॥ परावरात्मनोरेवं युक्त्यासं
भाविता ऐकता । तत्त्वमस्यादिवाक्यैः सा भागत्यागेन लक्ष्यते ॥ इति ॥ एवमुक्त
प्रकारेण परावरात्मनोस्तत्त्वंपदार्थयोः परमात्मजीवात्मनोरेकताभिधी
न युक्त्या लक्षणसाम्यप्रदर्शनाद्युपायेन संभाविता अंगीकारिता सा
एकता तत्त्वमस्यादिवाक्यैः स्पष्टं भागत्यागेन विरुद्धांशपरित्यागेन लक्ष्य
ते लक्षणावृत्त्या बोध्यते ॥ ॥ तत्त्वमसीति वाक्यार्थज्ञानस्य तदाति
पदार्थज्ञानपूर्वकत्वात् तत्पदस्य वाच्यार्थं तावदाह ॥ जगतो यदुपादान
मायामादाय तामसीं । निमित्तं शुद्धसत्वादिमुच्यते ब्रह्म तद्गिरा ॥

बोधनं क्वाप्यदृष्टमित्याशंक्याह सोयमित्यादि वाक्येषु विरोधात्तदिदं त
या ॥ भागेन भागयोरेक आश्रयो लक्ष्यते यथा ॥ सोयं देवदत्त इत्यादि
वाक्येषु तदिदं तयोर्देशकालवैशिष्ट्यलक्षणयोर्धर्मयोर्विरोधादै
क्यानुपपत्तेः ॥ भागयोर्विरुद्धांशयोस्त्यागेन एक आश्रयो देवदत्तस्व
रूपैककमेव यथा लक्ष्यते । एवं दृष्टांतमभिधाय दार्ष्टांतिकमाह । मायाविद्ये वि
हायैवमुपाधी = परजीवयोः ॥ अखंडं सच्चिदानंदं परं ब्रह्मैव लक्ष्यते इति
॥ एवं सोयं देवदत्त इत्यादि यथा तद्वत्परजीवयोः उपाधिभूते माया वि
द्ये पूर्वोक्ते विहाय अखंडैकरसं सच्चिदानंदं परब्रह्म महावाक्येन ल
क्ष्यते ॥ ननु किं महावाक्यस्य लक्ष्यं सविकल्पकमुत निर्विकल्पकमिति
विकल्प्य प्रथमपक्षे दोषमाह । पूर्वं [illegible] सविकल्पस्य लक्ष्यस्य वेद्यस्य स्याद
वस्तुतेति ॥ सविकल्पस्य विकल्पेन विपरीतत्वेन कल्पितेन नामजात्यादि
रूपेण सह वर्तत इति सविकल्पं तस्य लक्ष्यस्य वाक्येन बोध्यस्य च लक्ष्यस्य वा
क्यार्थतया लक्ष्यस्य अवस्तुता स्यात् मिथ्यात्वं स्यात् ॥ द्वितीये दोषमाह । नि

र्विकल्पकस्यैव लक्ष्यत्वेन दृष्टं न च संभवे। इति। निर्विकल्पस्य नामजात्या
दिना रहितस्य लक्ष्यत्वं न दृष्टं। लोकेन क्वापि न दृष्टं न च संभ [illegible] विशेषण घ मान
मपि न भवति। लक्ष्यत्वधर्मवतो निर्विकल्पस्य व्या [illegible] नादिति यावत्। सिद्धां
ती आ। सत्तरत्वानौ [illegible] यो घ मिति। विकल्पपूर्वकं दोषमाह।। [illegible] कल्पो नि वि
कल्पस्य स विकल्पस्य वा भवेत्। आद्ये व्याहतिरन्यत्रानवस्थाना श्र
दय इति। सविकल्पस्य वा निर्विकल्पस्य लक्ष्यत्वमिति यो विकल्पस्त्वयाङ्गी
तः। स किं निर्विकल्पस्य विकल्प इष्यते उत सविकल्पस्य भवेत्। आद्ये न
मिपसे व्याहतिस्त्वयो क्तो व्याघात एव। अन्यत्र द्वितीयपक्षे अनवस्थादयः
। तथा हि सविकल्पस्य विकल्प इ सत्रे तेन [illegible] तियां तु विकल्पपदेन प्रथमे
न विकल्पपदेन च एक एव विकल्पो विधीयते।। द्वौ तौ। एक एव चेत्तत्स्व
यमेव कयेव विकल्पं आश्रय विशेषणतयोः आश्रयस्तदाश्रये विकल्प
स्येया ना श्रयता — द्वो चेत्। तदा त्रितियां तु शब्दनिर्दिष्टस्यापि विकल्प
[illegible] विकल्परूपात्मा तदाश्रयस्यापि सविकल्पत्वात् द्विशोषकणान्ते तो विक
ल्प। किं। प्रथमान्तेशब्दनिर्दिष्ट एव विकल्पः। उत तान्यामन्यः। आद्ये ०

घा
ट

१२२
या

न्यान्याश्रयत्वाद्द्वितीयेपि धर्मविशेषेरतो विक॰ प॰ किं च अमातर॰ दूषि

दूषितं ततेन्योन्याश्रयचक्रकापतिः। द्वितीये तु स्याच्च पक्षस्तस्याप

न्यदृश्यन वस्तुष्वापातइति। न केवलमत्रैवेदं दूषणं अपितु सर्वत्रैवेति

स्थितिविकल्पपूर्वकं दूषणं प्रसरतीत्याह॥ द्रव्यं गुणक्रियाजातिद्रव्यसं

बंधवस्तुषु सममिति। यदिदं विकल्पदूषणं तं गुणक्रियाजातिद्रव्य

संबंधवस्तुषु गुणापि संबंधांतेषु पंचसु वस्तुषु समं तत्याहि॥ गुणादि

निर्गुणावर्तते। अथवा गुणावति क्रिया क्रियारहिते वर्तते। क्रियान तिष्ठ

ये व्याघातः अन्यत्र आत्माश्रयादयइति। सर्वत्रोह्यं। ननु इदं स तेन

व तु किं सदुत्तरमित्याशंक्याह। तेन स्वरूपस्य सर्वमितमेतदितीष्यता

मिति तेनैव विकल्पस्यासंगैवेन एतद्गुणादिकं सर्वं स्वरूपस्येतीष्यतां॥

गुणादयः सर्वे वस्तुस्वरूपे वर्ततइत्यभिप्रायः। न वचनमन्यत्र प्रव

र्तितिकिमायातमित्यत आह॥ विकल्प्यतदनावान्यामसंस्पृष्टात्मव

स्तुनि। विकल्पितलक्षणस्य च संबंधाद्यास्तुकल्पितादृतो। विकल्प

तदनावान्यां विकल्पैर्विकल्प्यानावेन च असंस्पृष्टात्मवस्तुनि। सं स

ने

पी॰ | येत | वि | ता | अग | दु | दु

भ्रीरहितेपरमात्मवस्तुनि विकल्पितत्वेलक्ष्यत्वसंबंधाद्याः तत्र विक
ल्पितंनाम सविकल्पस्य वा निर्विकल्पस्य वाद्येति। सर्वोक्तेनविव
क्षितत्वंलक्ष्यत्वंलक्षणत्वसाक्षात्त्वंसंबंधः संयोगादिः। ज्ञानेन
वेदनद्रव्यादयोगृह्यंते। तत्र शब्दोवधारणे। तत्रद्रव्यंनामगुणाना
श्रयोद्रव्यंसमवायिकारणंद्रव्यमितितार्किकैर्लक्षितंकर्मव्यति
रिक्तेचसतिजातिमात्राश्रयोगुणः। नियमेकमनेकवृत्तिसामान्यमि
तिलक्षिताजातिः। संयोगवियोगयोरसमवायिकारणंकर्मेतिलक्षि
ता। कथ्यतेति सर्वस्वरूपकल्पितात्वैवप्यर्थः। एतावतायंयसंदर्भे
णकिमुक्तंभवतीत्याकांक्षायांफलितमाह। इदंवाक्यस्तदर्थानुसं
धानंश्रवणंभवेत्। युक्त्यासंभावितत्वानुसंधानंमननंतुदितीदं
जगतोपादानमित्यादिग्रंथआतोक्तप्रकारेणवाक्यैः तत्वमस्यादिवा
क्यैः तदर्थानुसंधानंतेषांवाक्यानामर्थजीवब्रह्मणोरेकत्वंतस्य
स्यानुसंधानंश्रवणंभवेत्। युक्त्यासर्वस्यप्रत्यग्व्यावृत्त्याइत्यादिनापर
मात्मनोरेवयुक्त्यासंभावितत्वंतेनयत्संदर्शनं प्रकार

यांसंभाविनं चानुसंधानेश्च तस्यार्थस्योपपद्यमा॰ तन्न ज्ञानं यदस्ति तन्नु न
न॥ न मिथ्या अतद्रदानीं निदिध्यासनमाह॥ ता॰ निर्विचिकित्सेर्थे चेत
सः स्थापितस्य यत्॥ एकतानत्वमेतद्धि निदिध्यासनमुच्यते इति॥ ता॰ श्र
वणमननाभ्यां निर्विचिकित्से। निर्गता विचिकित्सा संशयो यस्मात्तस्मिन् निर्वि
चिकित्से। तस्मिन्नर्थे विषये स्थापिते धारणावतश्चेतसः। देशबंधश्चि
त्तस्य धारणेति पतंजलिनोक्तत्वात्। यदेकतानत्वं एकाकारवृत्तिप्रवाहत्वं ए
तं निदिध्यासनमुच्यते। हि प्रसिद्धं योगशास्त्रे। तत्र प्रत्ययैकतानता ध्यानमि
ति। तस्यैव निदिध्यासनस्य परिपाकावस्थारूपं समाधिमाह॥ ॥ ध्यातृध्याने प
रित्यज्य क्रमाद्ध्येयैकगोचरं। निवातदीपवच्चित्तं समाधिरभिधीयते
। निदिध्यासने तावत् ध्याता ध्यानं ध्येयं चेति त्रितयं भासते। तत्र प्रयाखि तम
भ्यासवशेन ध्यातृध्याने ध्याता च ध्यानं च क्रमात्परित्यज्य ध्येयैकगोचरं
ध्येयमेकमेव गोचरं विषयो यस्य तत्तथाविधं भवति समाधिरित्युच्यते।
तत्र दृष्टांतः। निवातदीपवदिति। वायुरहितप्रदेशे वर्तमानो दीपो यथा
निश्चलो भवति। तद्वदित्यर्थः॥ ननु समाधिवृत्तीनामनुपलब्धौ ध्येयका

यरत्वमपि निरुद्धे तु न शक्यत इत्याशंक्य वृत्तिसद्भावस्यानुमानगम्यत्वा-
वमित्याह ॥ वृत्तयस्तु तदानीमज्ञाता अप्ययोगो यरा: । स्मरणादनुमीयन्ते
व्युत्थितस्य समुच्छितादिति । व्यात्मगोचरा: । व्यात्मगोचरायासौ ता:
वृत्तयस्तु तदानीं समाधिकाले अज्ञाता अपि व्युत्थितस्य समाधेरु-
द्धितस्य समुच्छितान् उत्पन्नात् स्मरणात् एतावन्तं कालं समाहितोऽभू-
वमित्येवंरूपात् अनुमीयन्ते यद्यत् स्मर्यते तत्तदनुभूतमिति व्याप्ते-
र्लोकसिद्धत्वादित्यर्थ: । ननु तदा निवृत्त्युत्पादकप्रयत्नाभावात् तावत् तत्का-
र्यं वृत्त्यनुवृत्तिरित्याशंक्य तात्कालिकप्रयत्नाभावेऽपि प्राथमिकादेव प्रय-
त्नात् । अदृष्टादिसहकारिसहिताद्भवतीत्याह ॥ वृत्तीनामनुवृत्तिस्तु प्र-
यत्नाद्यत्नादपि । अदृष्टात्सहकृत्याप्तसंस्कारं सहितादुद्भवतीति ॥
व्ययेकमोचराणां वृत्तीनामनुवृत्तिस्तु प्रवाहरूपेणानुगतिस्तु प्रयत्नादपि
प्रयत्नात् समाधिपूर्वकालीनादपि अदृष्टं शुक्लकृष्णं [illegible] रव्याय: पुण्यवि-
विशेष: । कर्म शुक्लकृष्णयोगिनास्त्रिविधमितरेषामिति पतंजली

नास्त्रि[illegible]व। यश्च सदृदभ्यासंसंस्कारः [illegible] अध्यभ्यासेन जनीतो
भावनाख्यसंस्कारविशेषः। ताभ्यां सह कार्त्रिको[illegible]भ्यास ह वर्तमा
नो भवति। नन्वयं समाधिः पूर्वाचार्यैः निरूपितो न इह इदं सासंवृ
सर्वगुणातान्। अपि पुरुषोत्तमेन निरूपित इत्यतो वक्ष्यामिस्साह। यथा दीपो निवा
तस्थ इत्यादिनिरनेकधा भगवान् किमर्थे वार्जुनाय निरूपयति। य
था दीपो निवातस्थो नेंगते सोपमा स्मृतेत्यादिभिः श्लोकैरनेकधा नानाप्र
कारेण भगवान् ज्ञानैश्वर्यादिसंपन्नः इममेव निर्विकल्पसमाधिरूप
मर्थमर्जुनाय शिष्याय अन्यरूपयन् निरूपितवान्। अस्य समाधेरवांतर
फलमाह। अनादाविह संसारे संचिताः कर्मकोटयः। अनेन विलयं यां
ति शुद्धो धर्मोऽभिवर्धते इति। अनादौ अस्पष्टे इह अस्मिन् संसारे संचिताः
संपादिताः कर्मकोटयः। कर्मणां पुण्यापुण्यलक्षणानां कोटयः इयत्तापल
क्षणं अपरिमितानि कर्माणीत्यर्थः। अनेन समाधिना विलयं यांति विन
श्यंति॥ क्षियंते चास्य कर्माणि ज्ञानाग्निः सर्वकर्माणीति श्रुतेः स्मृतेश्च

शुद्धो धर्मः। सविलासा विद्यानिवर्तकत्वसाक्षात्कारसाधनत्वतो धर्म विवर्द्धते स्पष्टो तत्र किं प्रमाणमित्यत आह॥ ॥धर्ममेव भिन्नं प्राहुः समाधियोगवित्तमाः॥ इति योगवित्तमाः इति धुरीशयेन योगज्ञाः ब्रह्मसाक्षात्कारं तद्दृश्यर्थः। इमं निर्विकल्पकसमाधिं धर्ममेव प्राहुः स्पष्टो। तदुपपादयति॥ ॥वर्षयेवद्वतो धर्मामृतधाराः सहस्रशः इति॥ ॥यतः कारणाद्दिवसमाधिः धर्मामृतधाराः धर्मलक्षणाः अमृतधाराः सहस्रशो वर्षति लक्षणमेकं कृत्वा शतस्यापि श्रुतेः। अतो धर्ममेव प्राहुरिति पूर्वेण[illegible]व संधः। इदानीं समाधेः परमप्रयोजनमाह॥ ॥अमुना वासनाजालनिःशेषं प्रविलापिते। समूलोन्मूलितं पुण्यपापाख्यकर्मसंचयः इति॥ ॥अमुना समाधिना वासनाजाले अहंकारसंस्कार कर्तृत्वाद्यभिमानहेतु ज्ञानविशुद्धसंस्कारसमूहे निःशेषं यथा न भवति तथा प्रविलापिते विनाशिते पुण्यपापाख्यकर्मसंचये समूलोन्मूलिते [illegible] सहितं यथा [illegible] [illegible]ितमाह॥ [illegible] यथा न प्रवर्तते तथोन्मूलिते उत्पत्तिविनाशितेऽतिया[illegible]

तिबद्धं सं[illegible]कुपरोक्षावभासते। करामलकव[illegible] ह्यपरोक्षं [illegible]

।इति वाक्येन त्वमस्यादिवाक्यं प्रतिबंधसकामवर्जितान्यां प्रतिबंधर

हितं सत्याक्कुपरोक्षावभासते। पूर्वं परोक्षतया प्रकाशितेन [illegible] करामल

कवत्। करस्थितामलकगोचरमिव परं। सत्यपरोक्षतयानवभासस

मर्थबोधं ज्ञानं प्रसूयते जनयति। इदानीं परोक्षज्ञानस्य फलमाह।। प

रोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकं। बुद्धिपूर्वकृतं पापं कृत्स्नं [illegible] इति

व[illegible] द्विवदिति।। देशिकपूर्वकं गुरुमुखाल्लब्धं। शाब्दं तत्वमस्यादिवाक्याग

मजन्यं परोक्षं ब्रह्मविज्ञानं। बुद्धिपूर्वकृतं तु ज्ञानपूर्वकं। यथा भवति त

था कृतं। कृत्स्नं समस्तं पापं वह्निवद्दहति। अपरोक्षज्ञानफलमाह।।

अपरोक्षात्मविज्ञानं शाब्दं देशिकपूर्वकं। संसारकारणाज्ञानतम

सश्चंडभास्कर इति।। शाब्दं देशिकपूर्वकं व्याख्यातं अपरोक्षात्मविज्ञानं

अपरोक्षस्यात्मनो विज्ञानं। संशयविपर्ययरहितं यद्विज्ञानं तत्संसारका

रणाज्ञानतमः। संसारकारणं। यदज्ञानं मलिनं तदेव तमः। तस्य चंडभास्क

रः।

व

र्त

द

रः मध्याह्नकालिनसूर्यः। दाह्यतमसोऽखंडभास्करः दग्धाज्ञानतमसो निव-
र्तक इत्यर्थः। ग्रंथाभ्यासफलमाह। इत्थं तत्त्वविवेकं विधाय विधिवन्मनः
समाधाय विगलितसंसृतिबंधः। प्राप्नोति परमं पदं नरो न चिरादि-
ति॥ नरः इत्थमुक्तप्रकारेण तत्त्वविवेकं तत्त्वस्य ब्रह्मात्मैकत्वलक्षणस्य
विवेकं कोशपंचकाद्विवेचनं विधाय कृत्वा तद्विधिवच्छास्त्रोक्तप्रकारेण
मनः समाधाय स्थिरीकृत्य विगलितसंसृतिबंधः अपरोक्षज्ञानेन नि-
वृत्तसंसारबंधः सन् परं पदं निरतिशयानंदरूपं मोक्षं न चिरात् अवि-
लंबेन प्राप्नोति। सत्यज्ञानानंदलक्षणं ब्रह्मैव भवतीत्यर्थः॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीभा-
रतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचि-
तायां तत्त्वविवेकस्य प्रदीपिका समाप्ता॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
श्रीलक्ष्मीनृसिंहायनमः॥ ॥ अविघ्नमस्तु॥ ॥ ॥ शुभमस्तु॥ ॥

[illegible]

ती॰ २

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ । पंचभूतविवेकस्य व्याख्यानं
क्रियते मया ॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुत्या
जगदुत्पत्तेः पूर्वं यज्जगत्कारणं सद्वस्त्वद्वितीयं ब्रह्म श्रुतं तस्य वाङ्मन
सागोचरत्वेन स्वतोऽवगंतुमशक्यत्वात्तत्कार्यत्वेन तदुपाधिभूतस्य भू
तपंचकस्य विवेकद्वारा तदवबोधयितुं शक्यत्वेन भूतपंचकविवेकं द्वा
प्रतिजानीते ॥ ॥ सदद्वैतं श्रुतं यत्तद्भूतपंचविवेकतः । बोद्धुं शक्यं
ततो भूतपंचकं प्रविविच्यत इति ॥१॥ तत्र तावदाकाशादीनां पंचानां भूता
नां गुणान्विवेकज्ञानाय तद्गुणानाह । शब्दस्पर्शौ रूपरसौ गंधो भूतगुणा इमे
इति ॥ ॥ ननु एते गुणाः किं सर्वे सर्वेषामुत एकैकस्यैकैक गुणा इति वि
शयेनोत्तर यथापि किंतु प्रकारांतरमस्तीत्यभिप्रायेणाह । एकद्वित्रिच
तुःपंचगुणा व्योमादिषु क्रमात् इति द्वैतेव प्रकारांतरं विशदयति ॥ प्र
ध्व तिध्वनिर्वियच्छब्दो वायौ बीसीति शब्दनं । अनुष्णाशीतसंस्पर्शो वह्नौ
भुगुभुगुध्वनिः । उष्णस्पर्शः प्रभा रूपं जले बुलुबुलुध्वनिः ॥ शीतस्पर्शो बु

बिसि

शुक्लं रूपं रसो माधुर्यमीरितं ॥३॥ भूमौ कटकटाशब्दः काठिन्यं स्पर्श इष्य-
ते । नीलादिकं चित्ररूपं माधुराम्लादिको रसः ॥ सुरभीतरगंधौ द्वौ गु-
णाः सम्यग्विवेचिता इति । आकाशे तावच्छब्दः एक एव गुणः स च प्रति-
ध्वनिरूपः । वायोः शब्दस्पर्शौ द्वौ तत्र वायुः शब्दमनुकारेण दर्शयति
बीसीति शब्दमनुकरणमिति । एवमुत्तरत्राप्यनुकरणशब्दो बोद्धव्यः । तस्य
स्पर्शमाह । अनुष्णाशीतसंस्पर्श इति । वह्नौ शब्दस्पर्शौ रूपं चेति ॥
त्रयो गुणाः । ते च क्रमेण निर्दिश्यंते । वह्नौ भुगुभुगुध्वनिः उष्णस्पर्शः
प्रभा रूपमिति । जले शब्दादयो रसांताश्चत्वारः । तानाह । जले बुलबुल-
ध्वनिः शीतस्पर्शः शुक्लं रूपं रसो माधुर्यमिति । भूमौ शब्दादिगंधांताः
पंच गुणाः । तानुदाहरति । भूमौ कटकटाशब्द इत्यादि सुरभीतरगंधौ
द्वावित्यंतेन तत्क्रमार्थमुपसंहरति । गुणाः सम्यग्विवेचिता इति । एवं गुण-
नानात्वेदमन्निर्णयस्य । कार्यतो भेदज्ञानाय तत्कार्याणि ज्ञानेंद्रियाणि तावदा-
ह । श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चेंद्रियपंचकमिति । तेषां स्थानानि व्या-
॥५॥

त्रि

व्या॰ ३

पां[illegible]णांश्चदर्शयति। कर्णादिगोलकस्थं तत्तद्वादिग्राहकं तन्मादिति
इंद्रियसद्भावे किं प्रमाणं [illegible] मित्याकांक्षायां कार्यलिंगानुमानमित्याह
॥ सोऽस्त्या कार्यानुमेयं तदिति। तद्रूपोपलब्धिः करणजन्या क्रिया
वा [illegible] छिदिक्रियावदित्यादि दृष्टव्यं। सोऽस्त्यादपेचीकृतनूतनकार्यत्वेन
तुल्यस्पर्शादिसर्वः। तेषां स्वभावमाह। प्रायो यावत् बहिर्मुखवृत्ति। परां
चि खानि व्यतृणात् स्वयंभूरिति श्रुतेरित्यर्थः। प्रायःशब्देन सूचितं। कचि
त्कारणावांतरविषयग्राहकं दर्शयति॥ कदाचित्पिहिते कर्णेंद्रिये
शब्द आंतरः प्राणवायोर्जाठराग्नेर्जलपानेऽन्नभक्षणे च व्यज्यंते। आंतरस्प
र्शोन्मीलने चांतरं तमः। उद्गारे रसगंधौ चेत्यक्षाणामांतरग्रहे इति
कदाचित् कर्णस्य पिधाने सति प्राणवायोर्जाठराग्नेश्च विद्यमानत्वां
तरशब्दः श्रूयते। जलपानेऽन्नभक्षणे च आंतरस्पर्शाभिव्यज्यंते। अनि
व्यक्तानुवृत्ति। नेत्रनिमीलने सति आंतरं तमउपलभ्यते। उद्गारे जाते सति
रसगंधौ द्वौ गृह्येते। इत्यनेन प्रकारेणाक्षाणामांतरग्रहः। अक्षाणामिति कर्ण

चि

रिषष्टि। बाह्यांतरस्य विषयस्य ग्रहो ग्रहणं। इंद्रियकर्तृकमांतरविषयग्रहण
मवतीत्यर्थः। एवं ज्ञानेंद्रियव्यापारमभिधाय कर्मेंद्रियस्य वागादिनेः प्रति
नियतसद्भावसमनोर्थेयतल्लिंगभूतानुक्तव्यापारानाह। पंचोक्तयोदानग
मनविसर्गानंदकाः क्रिया इति। उक्तिश्च आदानं च गमनं च विसर्गश्चानंद
श्चेति। द्वंद्वसमासः। उक्त्यादानगमनविसर्गानंदकाख्याः पंच क्रियाः प्रसि
द्धा इति शेषः। ननु कृष्यादीनां क्रियांतराणामपि सत्त्वात्कथं पंचेत्यत आशं
क्याह॥ ॥कृषिवाणिज्यसेवाद्याः पंचस्वंतर्भवंति हि॥ इति॥ कानि तानि क्रि
याजनकानींद्रियाणीत्यत आह॥ वाक्पाणिपादपायूपस्थैरः स्तैः स्तत्क्रिया
जनिः। तासां क्रियाणां उत्पत्तिर्भवतीति शेषः। अत्राप्युक्तिः कस्यापृ वि
का क्रियाद्यादि विकार्यलिंगमनुमानं द्रष्टव्यं। तस्य कर्मेंद्रियपंचकस्य
स्थानान्याह॥ ॥मुखादिगोलके वासीनं च कर्मेंद्रियपंचकमिति॥ आदिश
ब्देन करचरणगुदशिश्नच्छिद्रं वा गृह्यते। इदानीमुक्तदशेंद्रियप्रेरकत्वेन
प्रसक्तस्य मनसः स्वस्थानं वदर्शयति॥ ॥मनो दशेंद्रियाध्यक्षं हृत्प
द्मगोलके स्थितमिति। तस्यांतरिंद्रियत्वं निमित्तकमाह। तच्चांतःकरणं

गुरु

॥११॥

छाद्योष स्वातंत्र्यादिनेंद्रियैरिति दत्तो द्वितीयाध्यस्य च मेव विशदयति। अक्षेषु
र्थीवति षु तन्न। गुणदोषविचारकमिति। अर्थेष्विंद्रियेषु अर्थैरिति तेषु वि
षयेषु अपि तेषु स त्सु एकजन्मनो गुणदोषविचारकः। इदं समीचीनं इदं
समीचीनमित्यादि विचारकारीत्यर्थः। अयं भावः। आत्मनः प्रमातृत्वेन
सर्वज्ञानसाधारण्या। चक्षुरादीनां यरूपादिज्ञानजननेनार्थे चरि
तार्थत्वात्। गुणदोषविचारस्योपलभ्यमानस्यान्यथानुपपत्या तत्क
रणत्वेन मनोभ्युपगंतव्यमिति। मनसो वैराग्यकामाद्यनेकवृत्तिमत्त्वकु
वप्रदर्शनाय स चाद्भिगुणाववृंदर्शयति। स च रजस्तामसश्चास्य गुणा इति
तयोर्तद्रूपा है कारयोर्मात्। विक्रियते हि तेनेति गुणोस्तस्य विक्रियम
प्यावमेव प्रपंचयति। वैराग्यं क्षांतिरौदार्यमित्याद्याः सात्त्विकाः। का
मः क्रोधो लोभो यत्नो विषयाद्यारा जसो हिताः। आलस्यभ्रांतितंद्राद्यावि
कारास्तामसाहिताः इति। वैराग्यादीनां कार्याण्यपि दर्शयति। सा
त्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः। तामसैर्नोभयं किंतु वृथायुः क्ष
पणं नेवत्। इति। एषां बुद्धिस्त्वावंतःकरणादिनां सर्वेषां स्वामिन आह॥

पञ्चतत्त्वविवेक

२

॥१५॥

अत्राहं प्रसङ्ग कर्तव्यं लोके व्यवस्थितिः॥ इति। एवं जगत स्थितिमभिधा
यइदानीं तस्य भौतिकत्वज्ञानोपायमाह। स्पष्टशब्दादिषु इति। भौतिक
त्वमतिस्फुटमिति। स्पष्टशब्दादिषु इति। स्पष्टः शब्दस्पर्शादिगुणो येषु
घटादिवस्तुषु तेषां भौतिकत्वं स्पष्टमेवोपगम्यते इन्द्रियादिषु कथं तत्
तत्कार्यं निश्चीयत इत्याशंक्य आगमानुमानाभ्यामित्याह। वागादाववि
तत्त्वात्स्पष्टत्वात् श्रुतिभ्यामन्वधार्यतां इति। अन्नमयं हि सोम्य मन आपोमयः
प्राणस्तेजोमयी वागीत्यादिश्रुत्या अत्रमनुमानं च विमतानीन्द्रियादीनि भूत
कार्याणि भवितुमर्हन्ति भूतान्वयव्यतिरेकानुविधायित्वाद्यदन्वयव्यतिरे
कानुविधायि तत्तत्कार्यं दृष्टं। यथा मृदन्वयव्यतिरेकानुविधायि घटो मृ
त्कार्यं दृष्टः। तथा चेमानि तस्मात्तथेति तदन्वयव्यतिरेकानुविधायित्वं। षो
डशकलः सोम्य पुरुष इत्यादिना छान्दोग्यश्रुतौ मनसोऽन्नायत्तत्वदर्शना
च्च द्रष्टव्यं। एवं भूतानि भौतिकानि विविच्य तदर्थं तत्त्वं प्रकृतां सदेव
सोम्येदमग्र आसीत् एकमेवाद्वितीयं ब्रह्म इत्यादिकां श्रुतिं व्याचष्टे
तत्र वाक्यस्थितस्येदं पदस्यार्थमाह। एकादशेन्द्रियैर्युक्त्या शास्त्रेणाप्य

सप्तम

श्रुत

व गम्यते। यत्त्वं किंचिद् वेद तत् इदं इदं शब्दो। ...दितं जगत्॥३१॥ इति। अस्य सत्ताद्वि
सर्वैः प्रमाणैरपि शब्दादिप्रमाणैर्ज्ञानैश्च यावत्किंचिज्जगदवगम्यते
। तत्सर्वं सदेवेत्यादि वाक्यस्थेनेदंपदेनोक्तं निहितमित्यर्थः। एवमिदंशौ
शब्दस्यार्थमभिधाय। इदानीं तां श्रुतिस्थयमेवार्थं तैः पठति। इ
दं पुरा सृष्टेरेकमेवाद्वितीयकं। सदेवासीन्नामरूपे नास्तामित्यारु
र्वचइति॥३०॥ आरुणस्यापत्यमारुणिः उद्दालकः तस्य वर... नमित्यर्थः।
एकमेवाद्वितीयमिति पदत्रयेण सद्वस्तुनि स्वगतादिभेदत्रयं जस्य
त्वं निवारयितुं लोके स्वगतादिभेदं तावद्दर्शयति। वृक्षस्य स्वगतो भेदः
पत्रपुष्पफलादिभिः। वृक्षान्तरात्सजातीयो विजातीयः शिलादितः
ति॥१९॥ एवमनात्मनि भेदत्रयं प्रदर्श्य। सद्वस्तुन्यपि प्रसक्तिं तद्भेदत्रयं
तिः पदत्रयेण निवारयतीत्याह। तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते
। ऐक्यावधारणद्वैतप्रतिषेधास्त्रिधायकैः॥२०॥ एकमेवाद्वितीयमिति त्रिभिः
पदैः क्रमेण निवार्यत इत्यर्थः। सद्वस्तुनः स्वतो वस्तु स्वगतभेदं शंकितुं शा

क्यते तस्य निरवयवत्वं चाक्षिप्याह ॥ ॥ सतो नावयवाः शंक्यास्तदंशस्या
निरूपणादिति ॥ नामरूपयोः सदवयवत्वं किं न स्यादित्याशंक्य सृष्टेः पु
रा तयोरभावान्न सदंशत्वमित्याह ॥ ॥ नामरूपे न तस्यांशौ तयोरद्या
प्यनुद्भवात् इति ॥२९॥ कुतो नामरूपयोरभाव इत्याशंक्याह ॥ नामरूपो
द्भवस्यैव सृष्टित्वात् सृष्टितः पुरा न तयोरुद्भव इति । फलितमाह ॥ तस्मा
त्स निरंशो यथा वियद् इत्ययं प्रयोगः । सद्वस्तु स्वगतभेदशून्यं न वि
भक्तुमर्हति । निरवयवत्वाद्गगनवदिति मात्रोक्तं । स्वगतो भेदः । सजा
तीयभेदः किं न स्यादित्याशंक्य । तत्सजातीयं सदंतरमिति न केर्व्यं (?) नतं
निरूपयितुं शक्यते । सतो वैलक्षण्याभावादित्याह ॥ सदंतरं सजातीयं
न वैलक्षण्यवर्जनात् इति । ननु घटसत्ता पटसत्तेति सतो भेदः प्रति
भासत इत्याशंक्य घटाकाशपटाकाशवदौपाधिको भेदो न स्वाभा
विक इत्याह । नामरूपोपाधिभेदं विना नैव सतो भिदा इति । अजातं (?) प्र
योगः । सर्वेषु (?) सजातीयभेदरहितं उपाधिपरामर्शमन्तरेण (?) [illegible]

रुपमानन्नेदवार्त्तिगगनवदितिनवकुचहिं विजातीयाद्भेदइ स शंक्य

सतो विजातीयमसत्तत्स्यासवादेव प्रतियोगित्वासं[illegible]

तियोगीकोपिनेदानास्तीत्याह ॥ विजातीयमसचानुनरवत्व

स्तीतिगद्यते। नास्यातः प्रतियोगित्वं विजातीयाद्भेदाऽतइ

ति। फलितमाह। एकमेवाद्वितीयं सत्सिद्धमिति। स्वगतिद्भु

तार्थीनिरासेनन्यायेन सदद्वैतमेवमत्र्यदइतुपूर्वपक्षमाह। अवतु

क चनेविद्धलाव्य सदेवेदं पूरासीदित्येवमवधारयन्निति। विह्वल वेद्य

त्वंतमाह। मय स्योश्चैय योस्साणितिंद्ध आनिंदा ह्री तिक्रियोज

यति। तथास्याधीः अरवंडैकरसंश्रुचानिश्चचारा बिनियत इ

ति। अस्यास ह्रादीनःजाताकेवलवचनं। धि अंतःकरणं। अरवं

डैकरसंश्रुचानिश्चचारसाकारवस्तौ स्थित्यरवंडैकरसव स्तु

निप्रचाररहितासति। अतोव्य स्मादस्कनोविन्नेति। अकोर्थ स्त्व

दृढ७

Margin (left): ध्य

Margin (left): चस्त्वा

Margin (right): दै

Margin (right): ब

र्यसंमतिं दर्शयति। गौडाचार्यो निर्विकल्पसमाधावन्ययोगि
नां। साकारब्रह्मनिष्ठानामसंततं नयमुक्तिरिति॥ केन वाक्येनोक्तं यद्
द्रष्टा कां स्मायां तदीयं वार्तिकमेव पठति। अस्पर्शयोगनामैषदुर्द
र्शी सर्वयोगिभिरिति॥ योऽयमस्पर्शयोगाख्यो निर्विकल्पसमाधिः
एष सर्वयोगिभिः साकारध्याननिष्ठैर्दुर्दर्शो दुःखेन द्रष्टुं योग्यः दुष्प्रा
प इत्यर्थः। एतत्रोपपत्तिमाह॥ योगिनो बिभ्यति ह्यस्मादभये भय
दर्शिन इति॥ हि यस्मात् कारणात् योगिनः पूर्वोक्ता द्वैतदर्शिनः अभ
ये भयशून्ये समाधौ निर्जने देशे बालवद् भयदर्शिनः भयं दृष्ट्वं क
ल्पयंतः अस्माद्योगात् निवृत्तिं प्राप्नुवंति। श्रीमदाचार्यैरप्येतदु
क्तमित्याह॥ ॥भगवत्पूज्यपादाश्च शुष्कतर्कपटून्मुने। आह
ख्यमिकानू भ्रांतान विसेस्मिन्सदोष नीती तैं द्वार्तिकं पठति। उपना
ह्लस्त्रनी मोरव्या न्तु मेयोद्धा स्तमविनः। आपदिरे निरा समन

हे

॥२८॥

मा नैकत्व हुपः इति। इदानीम सद्वाद विकल्पं दूषयति॥ शून्यमासीदि
ति बृ[illegible] सद्योगं वा सदात्मता॥ शून्यस्य न तु तद्युक्तं सुज[illegible]
न इति॥ शून्यमासीदित्येनेन वा कयं न शून्यस्य सत्ताजातियोगं वा
सद्रूपतां चाब्रूषइति विकल्पितार्थः॥ तदुभयं सत्तासंबंधसद्रूप
त्वलक्षणं शून्यस्य व्याहतत्वान्न युज्यत इत्यर्थः॥ व्याहतत्वमेव [illegible]
तपूर्वकं दृढयति॥ युक्तं तमसा सूर्यो नापि चासो तमो मयः॥ स
च्छून्ययोर्विरोधित्वाच्छून्यमासीत्कथं वदेति॥ ननु नवन्मतेपि वियदा
दीनां निर्विकल्प ब्रह्मणि सत्त्वं व्याहतमित्याशं[illegible]ह॥ वियदादीनां ... क्वा
मरूपो मायया सु विकल्पित इति॥ तर्हि शून्यस्यापि नामरूपे
सदृस्तु कल्पिते इति वदतो बौद्धस्यापि सिद्धांत इत्यभिप्रायेणा
ह॥ शून्यस्य नामरूपे च तथा चेज्जीव्यतां चिरं मिति॥ ननु तर्हि
शून्यस्यैव सदृस्तु नोपि नामरूपे कल्पिते एवमिति कर्तव्यं न वन्मी

264

तेवास्तवयोर्नामरूपयोरसत्त्वादिति शंकते सतोपि नामरूपे के
ल्पिते चेदिति विकल्प्यासहत्वादयं पक्ष एवानुपपन्न इत्यभिप्राये
णपरिहरति। तदावदकुत्रेति। अयमभिप्रायः। सतो नामरू
पे किं सति किं असति। अथवा जगति नाद्यः। अन्यस्य परत्वादे
र्नामरूपयोरन्यत्र शुक्तिकादावारोपितवद्दर्शनात्। ततो ना
मरूपयोः सत्स्येव कल्पनायोगात्। न द्वितीयः। असतो निरा
त्मकस्याधिष्ठानत्वायोगात्। न तृतीयः। सतज्जस्य [illegible] जगतः
संनामरूपकल्पनाधिष्ठा[illegible]नत्वानुपपत्तेरिति भावः। [illegible] दधिष्ठा
नमनयोः कल्पना किं न स्यादित्याशंक्याह। निरधिष्ठानौ न [illegible]
मः। क्वापि दिष्टपत इति। किं तु असदेवेदमग्र आसीदित्यत्र [illegible]
थाव्याख्यातत्वात्। तथासदेव सोम्येदमग्र आसीदित्यत्रापि दे
वोऽस्तीति शंकते। सदासीदिति श्रु[illegible] वेदे [illegible] [illegible] त
[illegible] वेदे पुनरुक्तिः स्यादिति। तथा हि। सदासीदिति शब्देनेदमो

रर्थे नैदोस्ति वा न वा। अस्ती चेद द्वैतहानिः नास्ति चेत् पुनरुक्तिः

स्यात्। अथ तत सदासीदिति सत्तु उपपन्नमिति। द्वितीयं पक्षमादा

य परिहरति। नैवमिति पुनरुक्तदोषस्य कः परिहार इत्याशंक्याह

। लोके तत् प्रक्षणादिति। लोके एवं विधप्रयोगः पुनरुक्ति [illegible] ना

कुत्र दृष्ट इत्याशंक्याह। कर्तव्यं कुरुते वा कार्यं ब्रूते धार्यं स्य धारणा

इति। न च वेवं लोके श्रुतोक्तिमायातमित्यत आह। इत्यादि वास

ना वि। छंद्यास्यासीत्सदितीरणमिति। नैन्व द्वितीयेव स्तक निरूक्तका

लानावाद ग्रन्थासीदित्युक्तिरनुपपन्नेत्याशंक्याह। कालानावेपु

रस्कृत्तिः कालवासनयायुतं। शिष्यं प्रत्येवेति। नन्वजगदुत्पत्तेः

पुरा जगदभावेन सद्वयचे ब्रह्मण इत्याशंक्य श्रुति प्रवृत्ते द्वैतवा

सनाविष्टश्रोतृ प्रति बोधनार्थं नातिशंकनीयमित्याह। तेनात्र

द्वितीयं न हि [illegible] शंकते इति। इदानीं सिद्धं रहस्यमाह यो यं वा

॥ ३४ ॥ त

रि व्यवहारो वा क्रियतां द्वैतेनाश्रया योऽयं नास्मि नापि तद्
नरामि ति । व्यवहारदशायां योषाद्यादिकं कर्तव्यं । परमार्थतस्तु द्वै
तमेव तत्त्वमित्यर्थः । परमार्थतो द्वैताभावे स्मृतिं प्रमाणयति ॥ त
दास्तिमितगंभीरं न तेजो न तमस्ततं । अनाख्यमनभिव्यक्तं सत्
किंचिदवशिष्यते ॥ स्तिमितं निश्चलं गंभीरं दुरवगाहं मनसा
विषयीकर्तुमशक्यं । न तेजः तेजस्तानधिकारूपं न तमः तमोविल
क्षणं अनावरणस्वभावं ततं व्याप्तं अनाख्यमाख्यातुमशक्यं । अ
नभिव्यक्तं चक्षुरादिभिरविषयीकृतं सत् । शून्यविलक्षणं
अतएव किंचित् । चित्स्वरूपं तस्यैव निर्देष्टुमशक्यमवशिष्यते । द्वैतानपे
क्षावधित्वेनातिष्ठतीत्यर्थः ॥ ननु जनिमच्चेनानिरूपस्य भूम्यादेः
रनिरूपत्वमस्तु । निरूपस्याकाशस्यासत्त्वं कथमंगीक्रियत इत्याशंक्य
ते । ननु भूम्यादिकं मास्तु परमाणवं नाशातः । कथं तेति यत्तोस
त्वं बुद्धिमारोहतीति चेत् ॥२७॥ दृष्टांतावष्टंभेन परिहरति ॥ व्य

तानिर्जगद्व्योम यथाम बुद्धिमाश्रितं । तथैव सन्निराकारां कुतो ।
नास्त्यप तेमतिमितिचेत् सत्तं निर्जगत् जगन्मात्रसंबंधरहितं नि
सर्गः । हि दृष्टेनुपपन्नमिति न्यायमाश्रित्य चोदयति । निर्जग
व्योमत्वं चेदिति दर्शनेनैवासिद्धमिति । परिहरति । प्रकाशात्म
सी चिनाकेदृशमिति व्यपासिद्धांतोपीत्याह । किंच ते पक्षेनव
सक्षयत्वं खलु । नत्वदर्शनाभावापगमनसद्दसून्यपि समानः
स्पेशं [illegible] मतत्संवर्णानुभावतिष्ठेवात तेनैव मित्याह ॥ सदलोकि
ष्वच स्मान्निर्निश्रितेरनुरूप्यत ॥ न स्ति स्थिता इति नद्धीनाव
[illegible]न्यमवद्भूतर स्वप्रकस्यापि प्रतीत्याभावादिसाशं कथं शून्य
प्रतीत्याभावान्न शून्यमपि न संभवतीत्याह ॥ ॥ न शून्यत्वं शून्य
बुद्धेश्च वर्जनादिति ॥ निन्तु तर्हि सद्बुध्याभावात् सत्वमपि न घटते
इति शंकते सद्बुद्धिरपि चेन्नास्ति । तत्स्य स्वप्रकाशत्वान्नत

तद्बुध्यन्तां वो सिद्धमिति परिहरति॥ मा स्वस्य स्वप्रकाशत्वं चेतद् इति=
स्वगोचरबुद्ध्यानवेक्षत्वं सद्वस्तुत्ववगं तच्छंकयतन्न स्यत आह॥
मितस्थाच साक्षिचैतन्यमात्रं स्वप्रकाशमिति॥ एवं निष्प्र
स्ये साक्षिणः सत्त्वे लिङ्गं स्थितौ ज्ञानं प्रदर्श्य एवं तद्दृष्टान्तबलेन स्वप्र
काशा पि सद्वस्तु न तथा वर्गं तच्छंकयतन्न साह॥ मनोज्ञानं नाशादिषु
यः साक्षी निराकुलः॥ मायाज्ञानं तु पूर्वं सत्त्वयेव निरा
लमिति॥ मायायाः किं लक्षणमित्यत आह॥ निस्तत्त्वा कार्यगम्या
स्य शक्तिर्मायेति॥ निस्तत्त्वा जगत्कारणभूता तद्वस्तुनः पृथक्तत्त्व
राहिता कार्यगम्या वियदादिकार्यगम्या लिंगगम्या स्य स
द्वस्तुनः शक्तिः॥ वियदादिकार्यजननसामर्थ्यं मायेत्युच्यते॥
वस्तुस्वरूपातिरिक्तशक्तिसंभवदृष्टान्तमाह॥ वह्नेः शक्तिव
दिति॥ यथा वह्नेः दहनादि निष्ठसामर्थ्यमस्ति तद्वदिसदृशं॥ शक्तिः

शक्तिः कार्यलिंगगम्या वैव्यतिरेकेणापादयति। न हि शक्तिः कचि
त्कदाचिदपि बुध्यते कार्यतत्पुरेति। यैः शक्तिः कार्यलिंगगम्या
चेदनुपपाद्यनिरस्तवेरूपतामुपपादयति॥ सा सदसती सतः श
।क्तिरिति। अयमभिप्रायः। सदसतोः शक्तिः किं सा सती न
ता सती। न तावत्सतीतायाश्चेसतो भिन्नेचेन तद्धक्तिश्चा
ये। मातृत्व क्षार्ये दृष्टं तमाह। न हि वन्ध्यास्वशक्तिर्दृष्टेति॥
[illegible]पि किं भरविषापातुल्यत्त तत्सद्विलक्षणेति विक
ल्पाभिप्रायेण पृच्छति। सद्विलक्षणतायां तु शक्तिः किं तच्च
तुच्छतामिति नैराच्यं पक्षमनुपपाद्य दूषयति। शून्यत्वमिति
चेन्न। शून्यं मायाकार्यमिति इत्तमिति। शून्यस्य नामरूपे
च तथा चेज्जी[illegible]ता चेरेमित्यत्रेत्यर्थः। तस्माद्द्वितीयं पक्षः
परिशिष्यत इत्याह॥ न शून्यं नापि सद्वाद[illegible]दकूर्च मिहेष्य

कृता त

न

ते

ध

तामिति॥ मायारूपं सच्चासच्चाभ्यां निर्वचनानर्हमित्यभिप्रा
यः। अस्मिन्नर्थे श्रुतीं प्रमाणयति॥ नासदासीन्नो सदासी
त्तदानीं किं चासीत्तमं इति। तम आसीत्तमसा गूढमग्रे इत्या
दि श्रुतिः प्रमाणमित्यर्थः। तर्हि तम आसीदिति कथं सद्वे
मुच्यत इत्यत्राह॥ सद्योगात्तमसः सत्वेन स्वतं इति कुत इ
त्यत आह। तन्निषेधनादिति फलितमाह॥ अत एव द्विती
यवस्तुशून्यचन्न हि गण्यत इति। यतः स्वतः सत्वं मायायाः ना
स्ति। अत एव वस्तुशून्यस्यैव मायाया अपि द्वितीयत्वेन गण्यते॥
नेवाद्वैतीयत इत्यर्थः। अनृतस्य द्वितीयत्वानंगीकारे दृष्टांतमा
हा॥ न लोके चैत्रतच्छक्त्योर्जीवितं लिख्यते। पृथगिति॥ ननु श
क्त्याधिक्ये जीवताधिक्यं दृश्यते। अतः शक्तेरपि पृथग्जीवि
तमस्तीति शंकते॥ ॥शक्त्याधिक्ये जीवितं चेद्वर्धत इति। न श

क्ति र्जिवनवर्धनिकारणोप्यपितु तत्कार्यमुद्दलष्पादितिपरिहरति॥
तत्र बुद्दिलनुनशक्तेः। किंतु तत्कार्यमुद्दलष्पादिकमिति[illegible]हांत्तिके
पोजयति। नथासर्वथाशक्तेमात्रस्य नष्ट[illegible]गणनाकेचिदिति। एकद
मात्र[illegible]यासद्वितीयत्वंसतत्वमपितु तत्कार्यतद्भुवयेवेशाशंक्यत
स्यतदानिमसत्वात् न तेनापि सद्वितीयत्वमित्याशंक्याह॥ शक्ति
कार्यंतु नैवास्ति द्वितीयं शंक्यते कथमितिान तु से[illegible]छक्तेःसाति
सर्वत्र वर्तते। ततकदेशेनाद्यः। मुक्तेः प्राप्यब्रह्मतावयसंगातेर्द्वि
तीयः निरंशत्वविरोधादित्याशंक्याद्येनंगीकृतत्वाद्वितीयपरिहा
रोस्यतद्दयस्मित्प्रायेणाह। सावलंबवृत्तिः साशक्तिः किंवेशीकवे
शानामीतिर्षैकदेशवृत्तौ दृष्टांतमाह॥ घटशक्तिर्यथाभूमौ स्निग्ध
मृद्यवेवर्ततइति॥ शक्तिरेकदेशवृत्तित्वे प्रमाणमाह। पादोस्यसर्वा
भूतानि त्रिपादस्तिस्वयंप्रभा। इत्येकदेशवृत्तित्वंमायायापद्धतिःश्रुतिः॥१०५॥

दा

एकदे

न

रितानकेवलंश्रुतिरेवस्मृतिरप्यस्तीत्याह॥ विष्ण्वाहमिदंकृत्स्नमेकांशे
नस्थितोजगदिति॥ ॥कृष्णोर्जुनायाह। जगतश्चैकदेशतामिति। इ
दानिं स्वरूपतीर्मायंस्वरूपसद्भावप्रमाणमाह॥ ॥सत्वमीविश्वतोवृता
सतिष्ठद्दशांगुलं॥ विकारावर्तियाश्चास्तिश्रुतिःसूत्रेसतोर्वचेइति।
विकारावर्तिचतथाहि। नतस्थितिमाहेति। सूत्रकारेवचनमिसर्थः।
त्रहिनिरंशत्वविरोधइत्यस्यकःपरिहारइत्याशंक्यवास्तवनिरंशत्वा
भ्युपगमान्नविरोधइत्यभिप्रायेणाहतत्रसंनिश्रायमाह॥ ॥नि
रंशोप्यंशनारोप्यकृत्स्नैकदेशो वतिपृच्छति। तद्भुवयोरंभुतश्रुति
श्चात्रं हितैः षिणीतिौ यदर्थब्रह्मणिनायासमार्थिनातदिदानिमा
ह॥ सत्वमाश्रितानाशक्तिःकल्पयेत्स्यतिविक्रियाइति। विक्रियाविवि
यचेमक्रियंतइति। विक्रियाःकार्यविशेषाइत्यर्थः। तत्रदृष्टांतमाह।
वर्णानिनिगतानित्तोश्रितानानाविर्थौयृथेति। वर्णाः स्पीतादयोया
नुविशेषाः। तत्र प्रथमंकार्यदर्शयति। आद्योविकारस्त्वाकाशे

सिद्धं

कइति तत्स्वरूपमाह॥ सावकाशस्वभावतीति॥ आकाशे वेस्प ब

ह्मकार्यत्वे मोहेतुह॥ आकाशोस्तीति संत्वेमाकाशोस्तानुगच्छतीति ॥५२॥

त तत्रैक किंमित्यत आह॥ एकस्वभावंसत्वमाकाशोदिस्वभावद इति॥ क

उक्तमर्थं विशदयति॥ नावकाशः सतिव्योम्नि सचेवापिद्वयं स्थि

तमिति। सतिसद्वस्तुनि अवकाशो नास्ति किंतु सद्भावएक एवाका

स्व शतुसयसंद्भावस्था एषोपि अवकाशस्वभावोपि द्वति। यं स्थितं वि द्व

यतद्स्यर्थः। सदाकाशयोरेकत्वे द्विस्वभावत्वेप्रकाशेनेरणाव्यक्तत्वादरं

यतिपद्यावतिध्वनिर्व्योम्नि गुणो नासौ सती स्पते व्योम्नि होसत्‌ध्व

नीति न संदेवं द्विगुणं विपदिति॥ प्रतिध्वनिर्व्योम्नि गुणाइस्यपा

दितमधस्तादसोप्रतिध्वनिः। सद्वस्तुनीने स्पतेनोपलभ्यते व्योम्नि

तु सध्वनि सद्भावानुभावपि उपलभ्यतेति कोनेरणो न संदेके द्विगु

णं विपदिति ये केस्वभावं विपद्विगुणं द्विस्वभावकमित्यर्थः। नन्वाकाश

तू

स्य सत्त्व ब्रह्मकार्यत्वे आकाशस्य सत्त्वेति। सत्त्व आकाशधर्मेणात्मनः। प्रति
नानीहाशंक्याह॥ यादृशं त्विति। कल्पयत्यात्मा सा सद्धेतोर निन्नतां। अ
पाद्य धर्म धर्मिणि चैव्य स्वयेन अवकल्पयदिति। या माया सद्वस्तुन्याकारं
कल्पयति पश्चाद्धर्मधर्मी नावं वेपरि स्येन कल्पयति। अतः आकाशा
स्य सत्त्वेति नामनुपपद्यते इत्यर्थः। मायया वेपरिसं कथं सत्त मिमाशं
क्याह॥ सर्वो व्योमत्वमापन्नं व्योम्नः सत्तांतु लौकिकाः। तार्किकाश्चाव
गच्छंतीति। वस्तुतत्वविचारे क्रियमाणे हदी चटरूपत्वमिव सतो व्योमत्वे
मापन्नं सद्वस्तुनं आकाररूपत्वं प्राहुर्लौकिकाः प्राणिनः। शास्त्रेषु मध्यता
र्किकाश्चतद्वेपरि स्यैन व्योम्नो गगनस्य धर्मिणः सत्तां सदपत्वं धर्मं गो
तिं वा गच्छंति जानंति। ननु अन्यस्यान्यथा प्रतीतिरनुपपन्नेत्याशंक्याह
मायाव्याप्त चितं हितं इति तं द्विपरीत दर्शने हेतुत्वं मायायाः युक्तमित्य
र्थः। मायाया विपरीत प्रवृत्तिनिमित्तत्वं लौकिक न्याय प्रदर्शनेन स्पष्टी
करोति॥ ॥ यद्यथा वर्तते तस्य तथा त्वं भाति मानतः। अन्यथा त्वं त्रमेण

दि३

॥१५६॥

ति न्यायोऽयं सार्वलौकिक इति ॥ यत्तु शुक्त्यादि यथा येन शुक्त्यादिरूपेण
वर्त्तते। तस्य तथात्वं शुक्त्यादिरूपत्वं प्रमाणतः स्फुरति। अन्यथात्वं र
जतादिरूपत्वं तु भ्रमेण त्वां सा प्रतिभातीति। अयं न्यायः सर्वलोकप्रसि
द्ध इत्यर्थः। एवं त्वां प्रति विपरीतप्रतिभासं दर्शयित्वा तन्निवृत्त्युपायमाह।
एवं श्रुतिविचारात् प्राग्यथावद्वस्तु न भासते। विचारेण विपर्येति ततस्त
च्चिंतां विपदिति ॥१५७॥ एवमुक्तेन प्रकारेण श्रुतिविचारात् प्रागित्यस्यार्थः
विचारणात् पूर्वं यद्वस्तु सद्रूपं ब्रह्म त्वां सा यथा येन गगनादिरूपेण
वर्त्तते। तत्तु श्रुत्यर्थपर्यालोचनेन न विपर्येति गगनादिना रूपेण किं त्वसद्
रूपं ब्रह्मैवेति। ततः श्रुतिविचारेणैव वस्तुयाथात्म्यदर्शनसंभवात्तद्विषय
चिंतां विचार्यतामित्यर्थः। विचारस्वरूपमेव दर्शयति। ... विपदसि
तिद्वेति। निन्द्वेति प्रतिज्ञातार्थे हेतुमाह। शब्दं ... विपत्तेश्च ब्द
योरपर्यायत्वादित्यर्थः। हेत्वंतरमाह। ... तमेव हेतुं विश
दयति ॥ ॥ वाय्वादिष्वनुवृत्तं सन्नत्वात्मति नेदधीरिति। स ... दि

॥१५८॥ वाय्वा

दन्तिपुस्तन्वायुस्सतेजइसेवं प्रकारेणा[illegible] वृत्तंता सते। व्योमंतुनेवं नासत
इतियतज्ञानं सात्वेदधीः भेदबुद्धिरित्यर्थः। एवं सदा काशयोर्भेदं प्रसा
ध्य व्योम्नः सत्तां[?]ति। व्योम्ना प्रतीतस्य धर्मधर्मिभावस्य विचारेणाव्यवृत्तं
दर्शयति। सदस्याधिकवृत्तित्वाद्धर्मिव्योम्नस्तु धर्मतेति॥ रूपसो रेदि
घनुवृत्तस्य द्रव्यस्य वाकाशवाय्वादिष्वनुवृत्तस्य सतो धर्मित्वं रसा
दिभ्यो व्यावृत्तस्य रूपस्येव वाय्वादिभ्यो व्यावृत्तस्येव तन्नासौ धर्मभि
त्यर्थः। ननु तर्हि घटाद्भिन्नस्य रूपस्य यथावाह्नव चंतथा सतो भिन्नस्य
नन्न सापीसाशं कर्यंत इत्यति रिकृस्य नन्न सोऽदुर्निमित्तं चान्येव मिथ्या
ह। धियासतः पृथकृकारबुद्धिर्व्योमनि किमात्मकमिति। दुर्निरूप्यः व नसि
द्वमिति शंकते। अवकाशात्मकं तद्वेदिति। तर्हि सतो विलक्षणत्वादसदे
वस्यादिति परिहरति। असत्तदिति। विसतामिति सतो विलक्षणस्या
सत्वं नास्तीति वदता दोषमाह। भिन्नं सतो सद्भ्रनेति न सिध्यतीति स
देति। असत्वे नासंनस्यादि साशंक्याह तुच्छविलक्षणत्वात् नासंन धि

॥६०॥

तथ्य तूदूसाह। नामीतिचेन्नानुनामनूषणमाईकस्यत त्रितीयविरो
धेदर्शयितुंमिथ्यावस्तुनोलक्षणंसदृष्टांतमाह॥ यदसद्दुसमानत्वं॥ मि
थ्यास्व प्नगजादिवदितीयद्वस्तुस्वरूपेणाविद्यमानं तथैनासत
तत्वान्नगजादिवन्मिथ्येयर्थः॥ ननुनियमेनसहोसलंसमान
योर्नदोनदृष्टवरद्वसाशंक्याह॥ जातिव्यक्त्योर्दिहिदेहोगुणद्रव्यय
याप्रथक्।वियत्सनोप्यर्थेवावस्तुपार्थक्यंकौत्रविस्मयमितिनिदो
ययपिविद्येतेनथापिसिद्धिश्चितोननवतीतिशंकते। बुद्धौति। निर्भेदभा
विते निरूद्दयातिचेन्नेदिति। नस्यपरिहारंनकुं निश्चयोनावेकारया
प्रवृत्तिलक्षणनेकाख्यात्।संशयोद्वावास्ति नावोस्यतेवदाति।आ
द्यपरिहारमाह॥ अप्रमत्तोनवध्यानादाद्यद्वति। आद्येप्रथमेविक
ल्पेध्यानात्तत्रप्रसयैकताननान्ध्याननिदिध्यासनलक्षणात्। अप्रमत्तो
भवसावधानोभवेतियावद्वितीयपरिहारमाह॥ अन्यस्मिन्विवेचनं॥
श्रुतप्रमाणयुक्तिभ्यामिति।ततःकिमित्यतआह तेतोऽस्तदनमोनवदि

पि
द

द्य

ति। ततोपि किं नियतत्वात्तदाह। ध्यानान्मानाद्युक्तितो वास्तुदेनेदे वि

यत्सतो: नक्कदाचिद्वियत्सत्वं सद्वस्तु छिद्रवन्नवेति। ध्यानं पूर्वो

क्तलक्षणं। मानं पूर्वोक्तो वियत्सतिशब्दैर्नात्वबुद्ध्यभेददर्शनयौते

युक्तिस्तु सद्वस्त्वधिकवृत्तिवादिश्यादान्तो। एतैर्ध्यानादिभिर्वियत

सतोर्भेदे चिंते निरूढे याते सति वियत्कदाचिन्न सत्यं किंतु सर्वदैव

मिथ्येवावभासते। सद्वस्त्वपि छिद्रवद्वियत्कारावन्नचैनेवन्नवतीति

शेषः। वियत्सत्त्वविवेचनफलमाह। ज्ञस्यनातिसदाव्योमनिस्तत्त्वोके

स्वपूर्वकं। सद्वस्त्वपि विनाशस्यनिः छिद्रवपुनः स्मरन्मितिर्वियन्मिथ्या

वे सतोवस्तुत्वं च सदा चिंतयत: किं नवतीत्याह॥ वासनायां प्रवृद्धायां

वियत्सत्यत्ववादिनं। सन्मात्रबोधयुक्तेऽस्मिन्दृष्ट्वा विस्मयते बुधः॥ इति

बुध्यतद्गतिबुधः वियत्सतो सत्त्ववेत्तागगनस्य सत्यत्वं ब्रुवाणं निरवका

शसद्वस्त्ववबोधरहितं च दृष्ट्वा विस्मयं प्राप्नोतीत्यर्थः। नत्वेन्याय

तू

द

नि

न्यत्राप्यतिदिशति॥ एवमाकाशमिथ्यात्वे सत्सहवेचयवासिते। न्यायेन
नेन वायुत्वादेः सद्रूपप्रविविच्यतामिति॥ नन्वाकाशकार्यस्य वायोरका
रणान्तरेण सद्रूपेनातादात्म्यप्रतीययोगात्॥ सत्ताविवेचनमप्य
योजनमित्याशंक्य साक्षात्संबंधाभावेपि परंपरासंबंधोस्तीत्याह।
सद्रूपस्यैकदेशस्था माया तत्रैकदेशगं। वियत्तत्राप्येकदेशगतो वा
युः प्रकल्प्यतामिति॥ एवं सद्वायोः संबंधं प्रदर्श्य तयोर्धर्मतो भेदज्ञानाय वा
योः प्रतीयमानान्धर्मानाह। शोषस्पर्शौ गतिर्वेगो वायुधर्मा इमे मताः इ
ति। एवं प्रातिस्विकान्धर्माननभिधाय कारणतः प्राप्तानाह। त्रयः स्वभावाः स
न्मायाव्योम्नां ये ते हि वायुगा इति॥ सन्मायाव्योम्नां यत्र स्वभावाः
स्तिष्ठ विशेषाः धर्मास्तेपि वायुगाः वायौ विद्यन्त इति के ते धर्मा इत्यत्रा
ह। सत्तास्फूर्तमिन्नवद्धित वायुरस्तीति सद्भावं सतो वायोः पृथक्कृते। नि
स्तत्त्वरूपता माया स्वभावो व्योमगो ध्वनिरिति॥ वायुरस्तीति व्यवहार
हेतुः सद्रूपत्वं सद्रूपस्य धर्मः एकः। वायौ सद्रूपस्य नो विवेचिते सति च

त्रिस्तत्वरूपत्वं स वायुधर्मो द्वितीयः। शब्दो व्योम्नं सन्नाकाशादागतो
धर्मः। स्तृतीय इत्यर्थः। ननु व्योमविवेचनप्रस्तावे वाय्वादीष्वनुवृत्तं सं
मनु व्योमेति। नेदं धीः यत्र वाय्वादावाकाशानुवृत्तिः निवारिता।।
इदानीं व्योमानुवृत्तिर्निषिध्यते। अतः पूर्वोत्तरविरोध इति शंकते स
तानुवृत्तिः सर्वत्र व्योम्नो नेति पूरेरितं। व्योमानुवृत्तिरधुना कथं नु व्याह
तं वच इति। व्योमानुवृत्तिरधुना यत इति शेषः। पूर्वमवकाशलक्षण
स्वरूपानुवृत्तिर्निवारिता। इदानीं व्योमगुणशब्दानुवृत्तिर्निषिध्यते।
न स्वरूपानुवृत्तिः। अतो न व्याहतिरिति परिहरति।। छिद्रानुवृत्तिर्नेतीति
पूर्वोक्तिरधुनाच्चियं। शब्दानुवृत्तिर्वाक्का वचसा व्याहतिः कृत इति।।
ननु वायोरसिद्धस्य विलक्षणत्वात् असत्वलक्षणां मायामयत्वं तद्वत्।।
तर्ह्यव्यक्तस्वरूपमायावैलक्षण्यादमायामयत्वमपि किं न स्यादिति चे
दत्यते। ननु सत्वस्य पार्थक्याद सत्वं वेत्तथा कथं। अव्यक्तो नाया वैसन्न
दमायामयता क्षिनो इति।। नाव्यक्तत्वं मायाया वप्रयोजकं किंतु निस्तत्वं

।।७४।।

तं तु मायायामिद्ध वाच्यादावप्यस्तीति न मायामप्यवहारिरिति। परि-
हरति॥ निस्तत्वरूपत्वेवाच मायायावस्यप्रयोजिका॥ साशक्तिकार्ययो-
स्तुल्याव्यक्ताव्यक्तत्वेनेदिनारिति ननु शक्तिकार्ययोरुभयोरपि निस्त-
त्वरूपतायामविशिष्टायांव्यक्ताव्यक्तलक्षणो भेदः। अतद्वयोरं कथं त-
द्विचारः प्रस्तुतानुपयुक्त इति। परिहरति॥ सदसद्विवेकस्य प्रस्तुत नव-
तु संस्वित्युक्तं। असतो वांतरस्ने भेदैर्भाव्यस्त्वां न छिंनयात्र किमिति ब्रह्मस-
तो मायातः कार्यरूपस्यावांतरभेदो व्यक्ताव्यक्तत्वरूप वेदस्य अर्थः। फलि-
तमाह॥ सद्वस्तु ब्रह्म शिष्टोंशो वायुर्मिथ्या यथा वियत्॥ वासद्वाथिरं
वाशोमिथ्यात्वं [illegible] रुतं त्यजेत् इति। वायोर्योसदंशस्तद्ब्रह्मस्वरूपं शिष्टांशो
निस्तत्वरूपाद्विधा। वयोः स्वरूपं सत्यवायोर्निस्तत्वरूपवादे वाकाशमिव
मिथ्या। [illegible] वायोर्मिथ्यात्वं चिरं वासद्वा महतं त्यजेत्। मरुतस्य च बुद्धि-
त्यजेत्स्य अर्थः। वायोर्नुस्तु विचारं तेजस्यतिदिशति। चिंतयत् [illegible] मप्येवं बुद्धि-
मरुतो न्यूनं वर्तिना [illegible] इति। ननु सद्वस्तुनै एकदेशस्थामायात्रेषादिना सदा-
न्ये

पंचभूतवि
वेक [illegible]

सप्तम

वह्नि
१४१

दीनां न्यूनाधिकभावं न कः स लोके न क्वापि दृश्यत इत्याशंक्याह ॥ ब्रह्मांडाव
रणोद्घेष्वन्यूनाधिकविचारणेति। वायोः कियतांशेनान्यूनो वह्नि रिसन
आह ॥ वायोर्दशांशेनान्यूनो वह्निरिति तस्य वास्तवत्व शंकां वारयति ॥
वायोः प्रकल्पित इति। ननु वायं न्यूनाधिकभावः। स्वकपोलकल्पित इत्या
शंक्याह। पुराणोक्तं तारतम्यं दशांशेनेतु तपं चक इति ॥ वह्नि स्वरूपमाह।
वह्निरूक्षप्रकाशात्मेति। अत्रापि वायौ विवकारणधर्मानुगता इत्या
ह। पूर्वानुगतिरपत्र चेति। केते धर्मा इत्याशंक्याह। अस्ति वह्निः सन्नि स्वे
व शब्दवां स्पर्शवानिति। एवमप्याकारणधर्मानुगमानुवाद पूर्वकं स्वकी
यं धर्मं दर्शयति। सन्मायाव्योमवाय्वंशेषु तस्मिंश्च निजो गुणः। रूपमि
ति। इत्थं सविशेषपांचभौतिकरूपं व्याख्यायेदानीं सद्वस्तुनो वह्निं विविनक्ति
। तत्र सतः सर्वमन्यत् बुद्ध्या विविच्यतामिति। तेषु मध्ये सतं सद्वस्तु
नो सर्वधर्मजाते मिथ्येति बुद्ध्या विविच्य तां पृथक्कृत्यामित्यर्थः। एवं वह्नेः
मिथ्यात्वनिश्चयानंतरमपां मिथ्यात्वं चिंतयेदित्याह। सतो विविच्य [illegible]

वह्नि स्व

283

इ ॥२५१

मिथ्या चेत्सति वासिते। अथापो दशांशतोऽन्ना कल्पिता ... नि दिं तत्प्रेति
ति॥ अथ स्वपि कारणाधर्मोस्व धर्मश्च वितस्य दर्शयति। संसा पोमा भू
न्य तत्वा सस शब्दस्पर्शसंयुताः रूपवतोऽन्यधर्मास्तु वृया॥ स्वीयो रस गुणाद्
ति। शब्देन सह वर्तत इति॥ सशब्दः सशब्दश्चासौ स्पर्शश्च सशब्दस्पर्शः तेन
नसंयुता इत्यर्थः॥ विवेक ध्यानाभ्यामपाम्मिथ्यात्वं निश्चित्यानंतरं भूमेर्मि
थ्यात्वं चिंतनीयमित्याह॥ स्वतो निवेचितास्वप्सु तन्मिथ्यात्वचवासिते॥
भूमिर्दशांशतोऽन्ना कल्पिता इति चिंतयेदिति। तस्या मिथ्यात्वं चैतन्या
याः तद्धर्मानपि विनिजते॥ अस्ती तत्त्वं भूम्यास्यात् शब्दस्पर्शौ सरूपको
रसश्च परतो ना नैजो गंध इति। तन्येषां तन्मात्रं पृथक्कर्तव्यमित्याह। सनादि
विस्यतामिति। संतां पृथक्करणफलमाह। पृथक्कृतायां सत्तायां भूमिर्मिथ्या
विशिष्यत इति॥ इदानीं भौतिकान्यब्रह्मांडादिभ्यः सतो विवेचनाय तदवस्थान
नप्रकारं दर्शयति। भूमेर्दशांशतोऽन्यूनं ब्रह्मांडं भूमिमध्यगं ब्रह्मांडमध्ये ति
तिभुवनानि चतुर्दश॥ भुवनेषु वसंत्येते प्राणिदेहा यथायथमिति॥ तेषु तेषु
॥६॥

२

श्रद्धायुक्तोवि
येयक

सद्विवेचनेफलमाह॥ब्रह्मांडलोकदेहेषु सद्वस्तुनि पृथक्कृते॥असंतो
ऽडादयो नूनं ॥ नु तद्भाने पिह्नाकासतिरिति तद्भानपीह कास्ती रिक्तं नमेवा
र्यं स्यात्स्वीकरोति॥नूनं नौतिकमायायाँ ॥मसद्वस्तंतवासितासद्वस्त
द्वैतमिस्य वाधी विपर्यतिवे नेविनूइति॥ नूनाना भाकाशादीनां नौतिका
दीनां ब्रह्मांडादीनां मायायाश्च तेकारणान्तामिथ्याचविवेकध्यानान्योगि
नेहदं वासितैतिसद्वस्तुनोद्वैतबुद्धिः कदाचिन्नविहन्यतइत्यर्थः।नन्वन्न्या
दीनामसत्त्वेविदुषाव्यवहारलोपः।प्रसज्येतइत्याशंक्यविवेकेनमिथ्यात्वनि
श्चयेपिन्न्याग्न्यादिस्वरूपंपुनर्याना वानव्यवहारलोपइत्याहाहासद
द्वैतात्पृथक्कृतेनद्वैतेन्न्याग्न्यादिरूपिणितत्तदर्थक्रियायत्रयथाहृष्टातथै
व सेति॥ ननु सतत्वद्वैतरूपत्वे सांख्यादिनिराकृतिध्रियमानस्यनेदस्यकु
तोननिरासः॥कियतइत्याशंक्यव्यावहारिकनेदस्यास्माभिरभ्युपगमनेन
वां न्न निरासाय प्रयत्नइत्याह।सांख्यकाणादबौद्धाद्यैर्जगद्भेदोय
थायथा।उत्प्रेक्ष्यतेनेकयुक्त्यानवचेषतथातयेति॥ ननुप्रमाणसिद्धस्य
॥६०॥

स्यत दो

सप्तम

१४२

लुप्त

तं चभेदस्यावज्ञानुपपन्नेत्याशंक्याह ॥ अवज्ञातं सद्द्वैतं निःशंकैरन्यवा
दीभिः । एवं काश्चन निरस्माकं तद्वैतमवज्ञानतामिति ॥ येथा बन्यवादिभि
सांख्यादिभिः । निःशंकैः श्रुतिसिद्धस्यापि सदद्वैतस्यावज्ञा क्रियते एवं
श्रुतिष्वत्यनुनवावदुं न्नेनास्मान्निस्तदीयद्वैतानादरेणोकिं विहीयते इत्य
र्थः । ननु निष्प्रयोजनेयं द्वैतावज्ञेत्याशंक्य जीवन्मुक्तिलक्षणप्रयोजनसं
डावान्नैवमित्याह । द्वैतावज्ञा सुस्थिता द्वैते धीस्थिरा नवता ॥ स्थिरे
न तस्याः पुमानेष जीवन्मुक्त इतीर्यते इति ॥ केवलं जीवन्मुक्तिः प्रयोज
नं । अपितु विदेहमुक्तिरपि प्रायेण एतस्मिन्वाक्यमुदाहरति । एषा ब्राह्मी स्थि
तिः पार्थ नैनां प्राप्य विमुह्यति । स्थित्वास्यामन्तकालेपि ब्रह्मनिर्वाणमृच्छ
तीति ॥ अंतकालशब्देन वर्तमानो देहपातो नाभिधीयत इत्याशंक्यन ह्यर
पितुं विवक्षितमर्थमाह । सदद्वैतमद्वैतं यदन्योन्यैकवीक्षणान्तस्यान्तका
लं तत्र द्वैतबुद्धिरेव न चेतरदिति ॥ स्वरूपे च द्वैते अनृतरूपे द्वैते च यदन्योन्या
ध्यासलक्षणमेकं ज्ञानमासीत्तस्यैकत्वमस्यान्तकालो नाम तयोः द्वैतद
तयोः सत्यानृतरूपेणाभेदबुद्धिरेव नापरो वर्तमानदेहपात इत्यर्थः ॥ इद

नीं लोकप्रसिद्धार्थस्य विकारेऽपि न दोष इत्यभिप्रायेणाह॥ यद्यन्तकाले प्रा
णस्य वियोगोऽस्य प्रसिद्धितः। तस्मिन्कालेऽपि न ज्ञानं तिगतास्युः पुनरा
गम इति॥ उक्तमेवार्थं प्रपंचयति॥ [illegible]रोगेणोपविष्टो वा हृष्टो वा विलु
ठन्नृत्यन् विमूर्छितो वा सृजेदेष प्राणान्भ्रान्तिर्न सर्वथेति॥ ननु प्राणवियो
गकाले मूर्छादिना ज्ञाननाशः स्यादेवेत्याशंक्य ज्ञाननाशो नावेदनेत्याह तमा
ह। दिने दिने स्वप्नसुप्त्योरधीते विस्मृतेऽप्ययं। परेद्युर्नानधीतः स्यात्तद्
द्विद्या न नश्यतीति॥ यथा प्रत्यहमधीतवेदस्य प्रसुप्त्याद्यवस्थायां
विस्मृतेऽपि परेद्युरनधीतत्वं नास्ति। तथा मृतिकालेऽपि तत्त्वानुस
न्धानाभावेऽपि ज्ञाननाशाभावेऽपि ज्ञाननाशो नावद्यमर्थः। ज्ञाननाशाभाव
मेवोपपादयति। प्रमाणोत्पादिता विद्या प्रमाणं प्रबलं विना। न नश्यति न वे
दान्तात्प्रबलं मानमीक्ष्यते इति॥ उपपादितमर्थमुपसंहरति॥ तस्मा
द्वेदान्तसंसिद्धं सदद्वैतं न बाध्यते। अन्तकालेऽप्यतो भूतविवेकान्निर्वृतिः स्थि
तेति॥ ९९॥ १००॥ ९॥ ॥ छ॥ श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारति
तीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचिता [illegible]॥

भूतविवेकस्य तात्पर्यदीपिका समाप्ता ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
श्रीलक्ष्मीनृसींहाय नमः ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ पं
चकोशविवेकस्य कुर्वे व्याख्यां समासतः ॥ तैत्तिरीयोपनिषत्तात्पर्यव्या
ख्यानरूपं पंचकोशविवेकाख्यं प्रकरणमारभमाणः ॥ आचार्यस्तत्र
श्रोतृप्रवृत्तिसिद्धये सप्रयोजनमभिधेयं सूचयन्मुखतः किंचित्प्र
मं प्रतिजानीते ॥ गुहाहितं ब्रह्म यत्तत्पंचकोशविवेकतः ॥ बोद्धुं शक्यं त
तः कोशपंचकं प्रविविच्यत इति ॥१॥ यो वेद निहितं गुहायां परमे व्योमे
न्निति श्रुत्या गुहाहितत्वेनाभिहितं यद्ब्रह्मास्ति तद्गुहाशब्दवाच्यान्नमयादि
कोशपंचकविवेकेन ज्ञातुं शक्यते ॥ यतः अतस्तेषां कोशानां पंचकं प्रकर्षे
ण प्रत्यगात्मनः सकाशात् विविच्य प्रदर्श्यत इत्यर्थः ॥ ननु केयं गुहा
यस्यां निहितं ब्रह्म कोशपंचकविवेकेनावबुध्यत इत्याकांक्षायां गु
हाशब्देन विवक्षितमर्थमाह ॥ ॥ देहादभ्यंतरः प्राणः प्राणादभ्यंतरं मनः
॥ ततः कर्त्ता ततो भोक्ता गुहा सेयं परंपरेति ॥ देहादन्नमयात् प्राणः प्राणमयः
अभ्यंतरः आंतरः ॥ प्राणात् प्राणमयात् मनः मनोमयः अभ्यंतरं आंतरं ॥

॥२॥

पंचकोश
विवेक

जन्मनः प्राङ्मरणादु

ततः मनोमयात्कर्ता विज्ञानमयः ऽंतरस्सन्गुप्यते। ततो विज्ञानमयात्
भोक्ता आनंदमयः। सोपि पूर्ववदांतरस्सर्थः। सेयमन्नमयाद्यानंदमयां
तानां परंपरा गुहाशब्देनोच्यत इत्यर्थः। इदानीमन्नमयस्य स्वरूपं तद
नात्मत्वं च दर्शयति॥ पितृभुक्तान्नजाद्वीर्याज्जातोऽन्नेनैव वर्धते॥ देहः सो
ऽन्नमयो नात्मेति। पितृभुक्तान्नजात् माता पितृभ्यां भुक्तात्। यव व्रीह्यादि
भक्षणाद् अन्नाज्जायमानेन य। वीर्यमस्ति तस्माद्वीर्याद्देहो जातः। तस्य जनन
नांतरं स्तिनाद्यन्नेनैव वर्धते देहो सोऽन्नमयोऽन्नस्य विकारः। स नात्मा भव
ति। अत इत्यत आह। प्राक्चोर्ध्वं तदभावत इति। जन्मनः प्राक् मरणादूर्ध्वं च
तदभावतः। तस्य देहस्याभावादित्यर्थः। विवादाध्यासितो देह आत्मा न भ
वति कार्यत्वाद् घटादिवदिति भावः। हेतुरस्य साध्यं नास्ति दीपस्य बाध
कानावाद प्रयोजकोऽयं हेतुरित्याशंक्य व्यक्तता न्यागमतः तु न विप्रणाशश्च
स्य बाधकसंस्य जन्मनो मिति अभावात् [illegible] तान्यागमस्य संजेपत।
तथा नापि जन्मान्यस्य सत्वं तत्र परिहरति॥ पूर्वजन्मन्यसत्वे तत्र जन्मसं
पादयेतोऽर्थः। नाबीजन्मस्य सन्कर्म न न्तेऽत देहसो। धितमिति॥ एतद्देहस्य
॥५॥

द्वावाम्नैयमिति

प्र ६

१५८

आला

प.

289

तस्यात्मनः पूर्वस्मिन्जन्मनि अभ्यस्तत्वादेतज्जन्मदेहे वा दृष्टासंतते
अस्य जन्मनोंऽगीक्रियमाणत्वात् । अकृताभ्यागमः प्रसज्येत तथा नावि
जन्मन्यभ्यस्य देहरूपस्यात्मनो अस्तत्वादिहानुष्ठितयोः पुण्यपापयोः फ
लजो ऽङ्कुरनावेन भोगमंतरेणापि कर्मक्षयः प्रसज्येत । अयं कृतवि प्र
णाशः एवं कृतनाशाकृताभ्यागमरूपं बाधकं संभवादात्मनः कार्यं वे
नांगिकर्तव्यमिति भावः । एवमन्नमयकोशस्यानात्मत्वं प्रदर्श्य प्राणम
यकोशस्वरूपं तदनात्मत्वं च दर्शयति । पूर्णो देहबलं यच्छेनु स्वापो यः प्र
वर्तकः । वायुः प्राणमयो नासावात्मेति । यो वायुर्देहपूर्णः । पादादिमस्तकं
पर्यंतं व्याप्तः सन् बलं यच्छन् व्यानरूपेण सामर्थ्यं प्रयच्छन् अक्षाणां च
क्षुरादीनां इंद्रियाणां प्रवर्तकः प्रेरको वर्तते । स वायुः प्राणमय ... ना
असावपात्मानताऽवेति । तत्र हेतुमाह । अहंतां ममतां देहे गृहादौ च
करोति यः । कामाद्यवस्थया भ्रांतो नो चैतन्य वर्जनादिति । विवादाध्या
नः प्राणो नात्मा न भवति जडत्वात् घटादिवदिति भावः । इदानीं मनोमय स्व
रूपं दर्शनपूर्वकं तस्याप्यनात्मत्वमाह । अहंतां ममतां देहे गृहादौ च करोति यः ।
प्र

नासो

कामाद्यवस्थयात्वेषोनासावात्मामनोमय इति॥ देहेष्वहंतामहंभावं
गृहादौ ममतां मदीयत्वाभिमानं च य: करोति। असौ मनोमय: आत्मा
न भवति अतद्रूपत आह। कामाद्यवस्थयात्वेन इति हेतुगर्भितं विशे
षणं। कामक्रोधादिवृत्तिमत्वेनानियतस्वभावत्वादित्यर्थ:। मनोमय आत्मा
न भवति विकारित्वाद्देहवदिति भाव:। अनंतरं कर्तृशब्दवाच्यस्य विज्ञानम
यस्य स्वरूपं प्रदर्शयन् तदनात्मत्वं दर्शयति॥ लीनासुप्तौवपुर्बोधे व्याप्नु
यादानखाग्रगा:। चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभागिति॥ चि
च्छायोपेतधी: चिदाभाससहिता बुद्धि: सुप्तौ सुषुप्तिकाले लीना विलीना
सति। बोधे जागरणकाले आनखाग्रं नखाग्रपर्यंतं वर्तमाना सती वपु:
शरीरं व्याप्नुयात् संव्याप्य वर्तते। सा विज्ञानमय। शब्दभाक्। विज्ञानमयश
ब्देनोच्यमाना नात्मा असावप्यात्मा न भवति विलयाद्यवस्थावत्वात् घटादिव
दित्यर्थ:। ननु मनोमयत्वाविशेषात् मनोमयविज्ञानमयरूपेण कोशद्वयकल्प
नानुपपन्नेत्याशंक्य कर्तृत्वकरणत्वाभ्यां भेदस्य विद्यमानत्वात् घटत एव मनोमयत्वादि

वि

व

नेदद्वयमाह ॥ कर्तृ च करणं चान्यां विक्रियेतांतरिंद्रियं । विज्ञानं मनः । सोऽयं तः ब
हिश्चैते परस्परमिति ॥ अंतरिंद्रियमंतःकरणं कर्तृ च करणं चान्यां कर्तृ
रूपे करणरूपेण च विक्रियते परिणामत इत्यर्थः । एते कर्तृकरणे विज्ञानम
नसि विज्ञानमनःशब्दवाच्ये भवतः एते परस्परमंतर्बहिर्भावेन वर्तेते । अतः
कोशद्वयमुपपद्यते इत्यर्थः ॥ इदानीं नोक्तत्वशब्दवाच्यस्यानंदमयस्यानात्म
त्वं दर्शयितुं तस्य स्वरूपमाह ॥ काचिदंतर्मुखावृत्तिरानंदप्रतिबिंबभाक् ॥ पुण्य
भोगे भोगशांतौ निद्रारूपेण लीयते इति ॥ पुण्यभोगे पुण्यभावकर्माणि नव काले
काचिदंतर्धीवृत्तीरंतर्मुखा सति आनंदप्रतिबिंबभाक् । आत्मरूपस्यानंदस्य
प्रतिबिंबं भजते । सैव कर्मभोगशांतौ पुण्यकर्मफलभोगोपरमे सति निद्रारूपेण ली
यते विलीना भवति सा वृत्तिरानंदमय इत्यभिप्रायः ॥ तस्यानात्मत्वमाह ॥ का
दाचित्कत्वतो नात्मा स्यादानंदमयोऽप्ययमिति । अयमानंदमयोऽपि कादाचित्क
त्वादनात्मैव स्यात् घटादिपदार्थवदिति शेषः । ननु विद्यमानानामानंदमयस्या
दीनां सर्वेषामात्मत्व निरासे नैरात्म्यं प्रसज्यते इत्याशंक्याह । बिंबभूतो य आनंद

पंचकोश विवेक

आत्मा संविदिति बुध्यादौ प्रतीबिंबतयावस्थितस्य प्रियादिशब्दवाच्यस्यानं
दस्य बिंबभूतः। कारणभूतो य आनंदः। असावेव आत्मा भवतीत्यत इत्य
त आह। सर्वदा स्थितेरितिनित्यत्वादित्यर्थः। विवादाध्यासित आनंद आत्मा
भवितुमर्हति। नित्यत्वात् य आत्मा न भवति नासौ नित्यः। यथा देहादिः। गग
नादेरप्युत्पत्तिमत्वेनानित्यत्वाभावेनैकांतिकतेति भावः। चोदयति। ननु देहमु
पक्रम्य निद्रानंदांतं वस्तुषु मा भूदात्मत्वमन्यस्तु न कश्चिदनुभूयत इति ॥१२॥
अन्नमयाद्यानंदमयांतानां कोशानां उक्तहेतुभिरात्मत्वं न घटते चेन्माघ
टिष्ट अन्यस्यात्मात्वनुपलभ्यमानत्वान्नैव संभवतीति परिहरति। कंठोक्तं नि
द्रादयः सर्वेऽनुभूयंते न चेतर इति। अत्र निद्राशब्देन निद्रानंदो लक्ष्यते। नि
द्रादयो देहांता उपलभ्यंते। अन्यो नानुभूयत इति यदुक्तं तत्समाकर्यं तर्हि त
देकैकस्यात्मनो निकार इत्यत आह। तथाप्येतेऽनुभूयंते येन तं को निवारयेदि
ति। अन्यस्यानुपलभ्यमानत्वेऽपि यद्बलाद्देहादीनामानंदमयादीनामुपलभ्यमा
नता भवति सोऽनुभवः। कथं नांगीक्रियत इत्यर्थः। ननूक्तोऽन्यो य आत्मा यदि

ति

१४६

बा:

विद्यते न तर्ह्युपलभ्यते नोपलभ्यते। अतो नास्तीत्याशंक्याह ज्ञातृज्ञानान्त
राभावात् स्वयमेवानुभूतौ व्याहन्यते नानुभाव्यतेति॥ आनंदमयादीनां सा
क्षिणोऽनुभवरूपत्वादेवानुभाव्यत्वं नास्ति। अनुभवरूपत्वेप्यनुभाव्यत्वे
अतो न स्यादिति शंक्याह॥ ज्ञातृज्ञानान्तराभावादज्ञेय इति ज्ञाता ज्ञानं च
ज्ञातृज्ञाने अन्यज्ञातृज्ञाने ज्ञातृज्ञानान्तरे तयोरभावः न स्यादज्ञेयः ज्ञानवि
षयो न भवति ज्ञात्राद्यभावाद्ज्ञानज्ञायत्वं स्वस्यैवासंवादात्। किमत्र विनिग
मनकारणमित्यत आह सच्च सत्त्वयेति निज्ञानं दादिसाक्षित्वेनासच्च स्वपूर्व
मेव निरालतत्वादिति भावः। अनुभवरूपस्यात्मनोऽनुभाव्यत्वाभाव दृष्टान्त
माह॥ माधुर्यादिस्वभावानामन्यत्र स्वगुणार्पितां। स्वस्मिंस्तदर्पणापेक्षा
नूनं न चास्त्यन्यदर्पकमिति॥ आदिशब्देनाम्लत्वादयो गृह्यंते। माधुर्यादिस्वभा
वा सह आधर्मविशेषा येषां ते माधुर्यादिस्वभावाः गुडादयः। तेषामन्यत्र स्व
संसृष्टपदार्थेषु चणकादिषु स्वगुणार्पितां स्वगुणानां माधुर्यादिनर्पयंतीति
ति स्वगुणार्पिणस्तेषां स्वस्मिन् स्वस्वरूपे गुडादिलक्षणे तदर्पणापेक्षा
षां माधुर्यादीनां अर्पणसंपादनेऽप्याकांक्षा माधुर्यादि

कं केनचित्संपादनीयमित्येवं रूपानो नैव घटते। किंचिदन्यत्तदर्पकं नास्ती
गुडादीनां माधुर्यादिप्रदं वस्त्वंतरं नास्तीत्यर्थः। सदृष्टांतं फलितमाह॥
अर्पकांतरराहित्येप्यस्त्येषां तत्स्वभावता। मा भूत्तथानुभाव्यत्वं बोधात्म
तु न हीयत इति॥ माधुर्यादिसमर्पकवस्त्वंतराभावेपि येषां गुडादीनां माधु
र्यादिस्वभावता यथा विद्यते एवमात्मनोनुभवविषयत्वं मा भूत् अनुभवरू
पता तु न वस्येवेत्यर्थः। उक्तार्थे प्रमाणमाह॥ स्वयंज्योतिर्भवत्येष पुरोस्मात्
भासतेखिलं। तमेव भांतमन्वेति तद्भासा भास्यते जगदिति॥ अत्रायं पुरु
षः स्वयंज्योतिर्भवति। अस्मात्सर्वस्मात्पुरतस्स्फुविभाति। तमेव भांतमनुभा
ति सर्वं तस्य भासा सर्वमिदं विभातीत्यादिश्रुतयः। आत्मनः स्वप्रकाशत्वं
बोधयंतीत्यर्थः। येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन
विजानीयादिति श्रुतिवाक्यमर्थतः पठति॥ येनेदं जानते सर्वं तत्केनान्येन
जानतामिति। येन साक्षिचैतन्यरूपेणात्मनाइदं सर्वं दृश्यजातं जानते
प्राणिनस्तं साक्षिणमात्मानमन्येन केन साक्ष्यंतरेण ज्ञातेन जानतां व्यवग
च्छेयुः पुमांस इति शेषः। अस्यैव वाक्यस्य तात्पर्यमाह विज्ञातारं केन विद्या

न वाग्गच्छति नो मनो न विद्मो न विजानीमो॰ति

दितिदृश्यजातस्य ज्ञातारं केन दृश्यन्तेनमविंद्यान् जानीयां न केना
पि विजानीयादित्यर्थः। ननु मनसा ज्ञातस्यादित्याशंक्याह। ज्ञानं वेद्यं तु
साधनंमिति। साधनं तु ज्ञानसाधनं मनः। वेद्यं ज्ञानस्य विषयेशकं सम
र्थैन तु ज्ञातर्यात्मनि नैव वाचा मनसा सादिश्यति। तस्यापि ज्ञेयत्वे कर्म
कर्तृत्वविरोधाद्युक्तिभावः। आत्मनः स्वप्रकाशत्वाद्वा स्ववेत्तिवेद्यान्तय
तस्यास्तिवेत्ताप्यन्यदेव तद्विदितात्तथो अविदितादधीति वाक्यद्वयमपि
प्रमाणामिति मन्वानस्तद्वाक्यद्वयमवमपि प्रमाणामिति। अर्थतः पठति
। स वेत्ति वेद्यं। तत्सर्वं नान्यस्तस्यास्ति वेदिता॥ विदिताविदितान्यो न तत्
पृथक्बोधस्वरूपकमिति॥ स आत्मा यद्यद्वेद्यं तत्तत्सर्वं वेत्ति। तस्यात्मनो
वेदितोऽज्ञातान्यो नास्ति तद्बोधस्वरूपकं ब्रह्म विदिताविदितान्यां ज्ञेयं वि
र्दितं। ज्ञानेन विषयीकृतं विदितमज्ञातं अज्ञानेनावृतं ताभ्यां पृथग्वि
लक्षणं बोधरूपत्वादेवेत्यर्थः। ननु विदिताविदितोरि को बाधो नो रूप तदु
याशंक्य विदितविशेषणस्य वेदनस्य च बोधरूपत्वात्तदनुत्तावानावधि
दितस्यात्तु न वा भावप्रसंगात् बोधानुभावो वश्यमंगीकर्तव्य इति। सो

ति ७

दि

नु

पंचकोश
विवेक

अष्टम

१८

पहासमाह। बोधेणानुभवो यस्य न कथंचन जायते। तं कथं बोधयेच्छा

स्त्रं लोष्ठं नरसमाकृतिमिति॥ १४॥ यस्य मंदस्य बोधेपि। घटादिस्फुरणरूपेपि

अनुभवः साक्षात्कारः कथंचन कथमपि न जायते नोत्पद्यते तं नरसमा

कृतिं नरसमाकारं लोष्ठं लोष्ठवज्जडं मनुष्यं शास्त्रं कथं बोधयेन्न कथम

पि बोधयेदित्यर्थः। बोधानबुध्यतद्व्यक्तेरव्याहतेति सदृष्टांतमाह॥ जि

ह्वा मेस्ति न वेत्युक्तिर्लज्जायै केवलं यथा। न बुध्यते मया बोधो बोधव्य इ

ति तादृशी॥ १५॥ मे जिह्वास्ति वा न वेत्युक्तिर्भाषणं यथा। लज्जायै केवलं

लज्जाजननायैव भवति। न बुद्धिमत्त्वज्ञापनाय। जिह्वया विना भाषणानुप

पत्तेः एवं मया बोधो न बुध्यते इतः परं बोद्धव्य इत्युक्तिरपि तादृशी लज्जा

हेतुरेव बोधेन विना तद्व्यवहारासिद्धेरित्यर्थः। एवं चैवं विधो बोधः तथापि प्र

ख्यातिं ब्रह्म वबोधे किं मायानमिथ्याशंक्याह॥ यस्मिन्यस्मिन्नस्ति लोके बोध

स्तत्तदुपेक्षणे। यद्बोधमात्रं तद्ब्रह्मेत्येवं धीर्निश्चयः इति॥ १६॥ लोके जगति य-

स्मिन्यस्मिन् घटादौ विलक्षणविषये बोधो ज्ञानमस्ति तत्तदुपेक्षणे तस्य तस्य

घटादेरुपेक्षणे त्यनादरणे कृते सति यद्बोधमात्रं घटादिषु सर्वत्रानुस्फूर्ते

टादि२

यत्स्फुरणमस्ति तदेवं ब्रह्मेत्येवंरूपाधिष्ठाने निश्चयः ब्रह्मावगतिरित्यर्थः
ननु घटादिविषयोपरक्तया तदनु ... नवरूपे ब्रह्मावगम्यते चेत्तर्हि को
शपंचकविवेकोयं निष्प्रयोजनस्यादित्याशंक्य ब्रह्मणः प्रत्यग्रूपत्वेन ता
नेन विना संसारानिवृत्तेस्तथा चावबोधोपयोगित्वं नैतस्यापि वेत्यर्थ
मित्याह ॥ पंचकोशपरित्यागसाक्षीबोधावशेषतः ॥ स्वस्वरूपं स एव स्या
दिति पंचानां कोशानामन्नमयादीनां परित्यागे बुध्यानात्मत्वनिश्चय स
तेन साक्षीरूपस्य बोधस्यावशेषणात् । साक्षीरूपो बोध एव स्वरूपं स्व स्य
निजं रूपं ब्रह्मैव स्यात् ॥ नन्वेवं मयादीनां मनुभवसिद्धानां त्यागे शून्यप
शेषस्यादित्याशंक्याह । शून्यत्वं तस्य दुर्घटमिति ॥ तस्य साक्षीबोधस्य
शून्यत्वं दुर्घटं स्वसंवेद्यात्मत्वादित्यर्थः । दुर्घटत्वमेवोपपादयति । ... तिना ... स्य
यं नामेति । स्वयं वाच्यं स्वस्य रूपं लौकिकानां ... मते तावद ... वैदिकानां
... प्रतिपादितस्या
आह । विवादाविषयं वनद् इति स्वात्मन्यपि विप्रतिपन्नो ... नास्ति यदि
चि स्वत्वं तावद्विवादो नास्ति स्वत्वं नास्तीति विषयति ...
न मन्यसे तर्हि बाधकं चाह । स्वस्मिन्नपि विवादश्चे प्रतिवादी परको नवेत् ॥

न कोपीत्यर्थः ॥ ननु स्वासत्त्ववाद्येव प्रतिवादीन विष्यतीत्याशंक्य तथा
विधः कोपि नास्तीत्याह ॥ स्वासत्त्वं तु न कस्मैचिद्रोचते विभ्रमं विना
ति ॥ स्वासत्त्वमिति भ्रमं विहायान्यस्यैव दशायां स्वस्यासत्त्वं केनापि नांगी
क्रियत इत्यर्थः ॥ अत एव निश्चितं श्रुत्यंतरमाह ॥ अत एव श्रुति
र्बाधं ब्रूते चासत्त्ववादिन इति। यतः कस्मैचिन्न रोचते। अत एव श्रुति
रप्यसत्त्ववादिनो बाधं ब्रूते। केयं श्रुतिरित्याकांक्षायां असन्नेव स भवती
त्यादिकां तां श्रुतिमर्थतः पठति। असद्ब्रह्मेति चेद्वेद स्वयमेव भवेदसत्
मिति। यदि ब्रह्मासदिति जानीयात् तर्हि स्वयमेव ब्रह्मोपासनवशात् जीव
सन्नेव भवेत् स्वस्यैव ब्रह्मरूपत्वादित्यर्थः। फलितमाह ॥ अतोस्य मा भूद्वेद्य
त्वं स्वसत्त्वं त्वन्यानपेक्षणात् मिति। इदानीमात्मनः स्वप्रकाशत्वं वक्तुमात्मनः तस्य वेद्य
त्वाभावे किंदृक्स्वरूपमिति प्रश्नमुत्थापयति। किंदृक्तर्हीति चेत्पृच्छेदि
ति। अयमभिप्रायः। आत्मन इदं दृक्त्वादिना केनचिद्रूपेणावेद्यत्वेपि शंका
र तेनैव रूपेण वेद्यत्वं स्यात्। तदनंगीकारे तु शून्यत्वमिति। तस्य मीदृक्त्वा

ह

॥२५॥

यंगीकारतथैववेद्यत्वं तत्तु नांगीक्रियत इत्यत आह इदं ज्ञानात्मनि तत्र हि इति। उपल
क्षणमेतज्ज्ञातृत्वादेः कर्तृत्वस्यापि। अनयोर्भावमेवाह इदानीं हमुनाह ... त्वे स्वरूपं
विनिश्चिन्वन्निति ।। न हि प्रतिज्ञामात्रेणार्थसिद्धिरित्याशंक्य इदं कुतादं कुश
ब्दयोरर्थमभिदधानस्तदवाच्यत्वमुपपादयति ।। अक्षाणां विषयस्त्विदं
कुपरोक्षस्तादृगुच्यते ।। विषयीनामविषयस्त्वात्मा स्वपरोक्ष इतीर्यते ।। प्रत्य ॥२६॥
क्षस्यैव घटादेरिदं कुशब्दवाच्यत्वं दृष्टं परोक्षस्यैव धर्माधर्मादेस्तादृक्‌शब्द
वाच्यत्वं दृष्टं। आत्मनस्त्विंद्रियजन्यज्ञानविषयत्वाभावान्नेदं कुत्वं स्ववेद्यत्वेनैवापरो
क्षविषयत्वाभावान्न तादृक्त्वमित्यर्थः। तर्हि शून्यमिति द्वितीयं पक्षं फलप्रदर्शने
व्याजेन परिहरति। अवेद्योप्यपरोक्षोतः स्वप्रकाशो भवत्ययमिति। इंद्रियज
न्यज्ञानविषयत्वाभावेप्यपरोक्षत्वात् स्वप्रकाश इत्यर्थः। अत्रायं प्रयोगः।
आत्मा स्वप्रकाशो ... विकर्मतामंतरेणापरोक्षत्वात् संवेदनवदिति। ननु वि
शेषणासिद्धो हेतुः। आत्मनः संवित्कर्मत्वमिष्टविरोध इति चेत्। नेत्र मननक्रिया
याम एककस्यैव स्वरूपेण कर्तृत्वं कर्मत्वमिति प्रसंगात्। न च साधनविकलो दृष्टां
तः। संवेदनस्य संवेदनांतरापेक्षायामनवस्थानादिति। आत्मा स्वप्रका
सिद्धांति। नचिंतु व्यर्थ इति साध्यं। ॥अयं हेतुः पर्यायवचनसाधनं

नु

परोक्षः
सिद्धांति
अयं हे
तुः।
नु

शाखेन सिद्धत्वेपि ब्रह्मलक्षणाभावोन्न ब्रह्मत्वसिद्धिरित्याशंक्य तल्लक्षणं तत्
त्र योजयति। सत्यं ज्ञानमनंतं ब्रह्मेत्यस्तीह ब्रह्मलक्षणमिति॥ सत्यं ज्ञानम
नंतं ब्रह्मेति श्रुत्या यद्ब्रह्मणो लक्षणमुक्तं तदिहात्मनि विद्यत इत्यर्थः॥ आ
त्मनः सत्यत्वोपपादनाय तावत्सत्यत्वं तस्य लक्षणमाह॥ सत्यत्वं बाधरा
हित्यमिति बाधशून्यत्वमिति सत्यत्वं सत्यमबाध्यमभिप्रेतमिति तद्विवेक इति।
पूर्वाचार्यैरुक्तत्वात्। अस्तु प्रस्तुते किमायातमित्यत आह। जगद्बाधैकसा
क्षिणः। बाधः किं साक्षिको ब्रूहीति। जगतः स्थूलसूक्ष्मशरीरादिलक्षण
स्य यो बाधः। सुप्तिमूर्छासमाधिषु विद्यमानत्वात् साक्षित्वेन वर्तमानस्या
त्मनो बाधः। किं साक्षिकः। किं साक्षिकस्य बाधस्यासो किं साक्षिकः। न को
पि साक्षी विद्यत इत्यर्थः॥ नु साक्षिकोप्यात्मबाधः किं न स्यादित्याशंक्याह।
न च साक्षिक इत्यतद्गतिर्साक्षीरहितो बाधो नात्रपगंतव्यः। अन्यथा ति
प्रसंगादिति भावः। उक्तमर्थं दृष्टांतेन स्पष्टयति। अपनीतेषु मूर्तेषु ह्यमूर्तं
शिष्यते वियत्। शक्येषु बाधितेष्वंते शिष्यते यत्तदेव तत्॥ गृहादिषु
॥२४॥

बाधः

न

को

स्वव्यतिरेके २

तेषु व्यवहारादिषु पतितेषु गृहादिष्वोविस्मारितेषु सत्सु यं तेष्ववसा
ने यथा व्यपनेतुं अशक्यं न तदेवावशिष्यते। एवं स्वर्गादिषु मूर्तामूर्त
निराकर्तुमशक्येषु देहेन्द्रियादिषु नेति नेति श्रुत्या निराकृतेषु सत्सु यं
तदवसाने सर्वनिराकरणसाक्षित्वेन यो बोधो वशिष्यते स एव वेदार्थ
रहित आत्मेत्यर्थः। ननु प्रतीयमानस्यापि सर्वस्य निषेधे किंचिन्ना
वशिष्यते। अतः कथं शिष्यते यत्तदेव तदित्यवशिष्टस्यात्मवस्तुत्वमत
इति शंकते। सर्वबाधेन किंचिच्छिष्टादिति न किंचिदवशिष्यत इति वद
तापि तथा प्रयोगसिद्धये सर्वतावविषयं ज्ञानमवश्यमभ्युपेत
व्यं। अतः तदेवास्मदभिमतमात्मस्वरूपमिति सन्निधायापरिहर
ति॥ यत्किंचित्तदेव तदिति न किंचिदिति शब्देन यत्तन्न्युच्यत
तदेव तद्ब्रह्मेत्यर्थः। न किंचिदिन्नावबाचकेन शब्देन कथं चेतन्यत
ध्यत इत्याशंक्य बाधसाक्षिणोवश्यमभ्युपेयत्वाद विधायकत्वादे

पञ्चकोश
विवेकः

ष्ठेव विप्रतिपत्तिः। नानिषेध्य इति परिहरति। नाषाद्वात्र निषेध्ये निर्बा
ध्यं तावदत्र हि इति। अत्र बाधासाक्षिणिपि प्रत्यगात्मनि भाषा एव न किं शि
तु साक्षीत्यादि शब्दाद्वनिषेध्यते निर्बाध्यं बाधरहितं साक्षिचैतन्यं केवि
तदेवेत्यर्थः। तत्क्रमर्थश्रुत्यारूढं करोति। अत एव श्रुतिर्बाध्यं बाधिवा
शेषयत्यदः। स एष नेति नेत्यात्मेत्यतद्व्यावृत्तिरूपतदिति शेषतः साक्षि
चैतन्यमबाध्यं अत एव स एष नेति नेत्यात्मेति श्रुतिरतद्व्यावृत्तिरूपता।
अनात्मनिराकरणद्वारेणाबाध्यं निराकरणायोग्यं सर्वमनात्मवस्तु
जातं बाधित्वा निरस्य। व्यवदानिराकर्तुमशक्यं प्रत्यक्स्वरूपं शेषय
तीति नेति नेतीति श्रुतिः। बाधयोग्यं बाधितुं बाधितुमशक्यं स्वरूपमवशेषयती
ति। ... इति विवक्षायां त
त्राक्तो। तत्र किंदृशं बाधितुमशक्यं कीदृशमशक्यमिति विवक्षायां न
दुमयं विनाप्यदर्शयति। इदंरूपं तु यद्वत्तत्सर्वं शक्यते चितुं। व्याश
क्याद्यमिदंरूपं इति इदमिति संवेद्यत्वेनानुभूयमानं रूपं स्वरूपं यस्य

स बाध्यमाना बाध्यं ॥२२॥ शिष्यते। ॥ धावत्

१५१

३०३

देहादेस्तदिदं रूपं तु शब्दावधारणे यद्यावदिति पदद्वयं सर्वद्रष्टो
पसंग्रहार्थं। एवं च सति यद्यद्दृश्यं तदखिलं सत्तु शाक्यत एव सर्थः।
संपद्यते। अनिदं रूपः प्रसज्येत तयोर्वगंतु मया पुंसः साक्षिण्य शोक
स्यं तु मित्यर्थः। भवत्वात्मनो बाध्यत्वे प्रसूते किमायातं नेश्वरत्वाह। स
दं ब्रह्मणि सत्यत्वमिति। ब्रह्मलक्षणे यत्सत्यत्वमभिहितं तदात्मनि सिद्
नवतु। सत्यत्वं ज्ञानत्वं कथमित्याकांक्षायां तत्पूर्वमेवोपपादितमित्याह।
ज्ञानत्वं तु पूर्वरीत्या। स्वयमेवानुभूतिर्वा दित्यादि वचने स्फुटमिति। स्व
यमेवानुभूतिर्वा विद्यते नानुत्वा व्यतोऽहमित्यादिभिर्वचनैर्ज्ञानरूपत्वं
पूर्वमेव सम्यगभिहितमित्यर्थः। ननु सत्यत्वज्ञानत्वयोरात्मनि सिद्धत्वेपि
आनंत्यं न घटते। ब्रह्मण्यपि तस्यासिद्धेरित्याशंक्य ब्रह्मणि तावत्तत्सा
धयति॥ स्वस्यावान्तदेशतो नित्यत्वान्नापि कालतः। न वस्तुतोपि सर्वा
त्म्यादानंत्यं ब्रह्मणि त्रिधेति। नित्यं विभुं सर्वगतं सुसूक्ष्ममाकाशवत्सर्वगत
श्चानिसज्ञानिसानिसानां चेतनश्चेतनानामित्यादिवेदंश्रुतयमात्मा सर्ववेद्ये

नव्यापिर

पंचकोश
विवेक

ब्रह्म

१५२

तद्ब्रह्म ब्रह्मैवेदं सर्वमित्यादिश्रुतिषु व्यापित्वनिरूपणेन सर्वात्मत्वप्रतिपाद
नात्। ब्रह्मणस्त्रिविधमप्यानंत्यं देशकालवस्तुकृतपरिच्छेदराहित्य
मन्यूनपेतव्यमित्यर्थः। न केवलं श्रुतितः किंतु युक्तितोपीत्याह। देशका
लान्यवस्तूनां कल्पितत्वाच्च मायया। न देशादिकृतोंतोस्ति ब्रह्मानंत्यं
स्फुटं ततः इति॥ परिच्छेदहेतूनां देशकालान्यवस्तूनां मायया कल्पित
त्वाच्च गंधर्वनगरादिवन्मिथ्यात्वेन देशादिकृतः पारमार्थिकपरि
च्छेदो ब्रह्मणि नानुवर्तते यतस्ततो ब्रह्मण आनंत्यं तावत्स्पष्टमेवा तदनंत
स्य मात्मा ब्रह्मैवा वैयर्थ्येन विचिकित्साभिप्रायं सहात्मैवं रूपसी ब्रह्मैवे
वा ब्रह्म नवति॥ अयमात्मा ब्रह्मेत्यादिश्रुतिभिरात्मनो ब्रह्मैक्यप्रति
पादनात्। तस्यानंत्यं सिद्धमिति तात्पर्यं। ननु जगतो ब्रह्मण्यारोपितत्वे
न ब्रह्मणः परिच्छेदकत्वाभावेपि चेतनयोर्जीवेश्वरयोस्तदसंभवात्। त
त्कृतपरिच्छेदेन नानंत्यं ब्रह्मणि न संभवतीति तयोर्जीवेश्वरयोरौपाधि
करूपत्वेन पारमार्थिकत्वाभावान्न तयोरपि वास्तवपरिच्छेदहेतुत्वमित्य

५२

मित्यभिप्रायेणाह ।। ससंस्थानमनंतं यत् ब्रह्म तद्दृश्यते । तस्य तत्त्वाद् ईश्वरत्वं च
जीवत्वं चानुपाधिद्वयकल्पितमिति ।। २ ।। यत्सत्याद्दिरूपं ब्रह्म तद्दृश्यते । तद्देव पा
रमार्थिकं तस्य ब्रह्मणो यल्लोकप्रसिद्धमीश्वरत्वं जीवत्वं च तद्द्वयमपि नो
पाधिद्वयेन कल्पितं । अतः कल्पितत्वादेव जडवज्जीवेश्वरयोरपि तत्त्वपरि
च्छेदकत्वानावद्रतिभावः । किं तदुपाधिद्वयमित्याकांक्षायां क्रमेण तदुभ
यं दर्शयितुं प्रथमं तावदीश्वरोपाधिभूतां शक्तिं निरूपयति । शक्तिरस्त्यैश्व
री काचित् सर्ववस्तुनियामिकेति । ईश्वरी ऐश्वर्यं ईश्वरौपाधिकेत्यर्थः ईश्वरसं
बंधिनी काचित् सदसत्त्वादिनिरूपेण निर्वक्तुमशक्या सर्ववस्तुनियामिका
सर्वेषामंतर्यामी ब्राह्मणोक्तानां पृथिव्यादीनां वस्तूनां नियमनकर्तृशक्ति
रस्ति । सा कुत्र तिष्ठति । कुतो वा नोपलभ्यत इत्याशंक्याह ।। आनंदमयमा
रभ्य गूढा सर्वेषु वस्तुष्विति । आनंदमयादिब्रह्मांडांतेषु सर्वेषु वस्तुषु गू
ढा वर्तते । अतो नोपलभ्यत इत्यर्थः ।। नियमेनानुपलभ्यमानायास्तस्या अ
सत्त्वमेव किं न स्यादित्याशंक्य जगन्नियमनान्यथानुपपत्त्या सा परिकल्प
या । इत्याह । वस्तुधर्मा नियम्येरन् शक्त्या नैव यथा तथा ।। अन्योन्यधर्मसांक

पंचकोश विवेक

॥ऽथा

र्यादिषूक्तेवेदं जगत् खलु इति। वस्तूनां पृथिव्यादीनां काठिन्यद्रवत्वादयो यथा

स्वस्थानव्यवस्थाप्यंते तदा तत्तद्धर्माणां सांकर्यात् विमिश्रणेन एकैकत्रा

नवस्थानाज्जगद्विप्लुवेत। अतीयत व्यवहारविषयतां प्राप्नुयादित्य

र्थः। खल्विति प्रसिद्धिं द्योतयति। ननु जडायाः शक्तेर्नियामकत्वं न संभवने

द्र साशंक्याह। चिच्छायावेशतः शक्तिश्चेतनेव विभाति। [illegible] सति साश

किंचिच्छायावेशात् चिदाभासप्रवेशाच्चेतनेव चेतनधर्मापन्नेव वि

भातीति प्रतीयते। अतोऽस्या नियामकत्वं घटत इति भावः। अस्तु प्रसक्ते

किमायातमित्यत आह। तच्छक्त्युपाधिसंयोगात् ब्रह्मैवेश्वरतां व्रजेदि

ति। सा चासौ शक्तिश्चेति कर्मधारयः। सैवोपाधिः तेन संयोगः संबंधः। त

स्मात् ब्रह्मैव सत्यादिलक्षणं ईश्वरतां सर्वज्ञत्वादिधर्मयोगितां व्रजेत्॥

जीवत्वोपाधिभूतानां कोशानां प्रागेवाभिहितत्वात् तन्निमित्तं जीवत्वमि

दानीमाह। कोशोपाधिविवक्षायां याति ब्रह्मैव जीवतामिति॥ कोशाद्य

सोपाधिकः। तद्विवक्षायां [illegible]पर्यालोचनायां क्रियमाणायां ब्रह्मैव सत्या

दिलक्षणमेव॥ जीवत्वाजीवव्यवहारविषयतां गच्छति॥ नन्वेकस्यैव विरु

१५२ जग स

५८

द्धधर्मद्वययोगित्वं युगपन्न क्वापि दृष्टं पं[illegible]मित्याशंक्याह । पिता पितामहश्चेत्येवं
पुत्रपौत्रापेक्षया प्रतीतिरित्यर्थः एक एव देवदत्तो यथा स्वपुत्रं प्रति पिता भवति पौ
त्रं प्रति तु पितामहः । एवं ब्रह्मादिको ह्युपाधिविवक्षायां जीवो भवति । शक्त्यु
पाधिविवक्षायां महेश्वरश्च भवति । सर्व्वं वस्त्वेवं तस्मान्नैव जीवमीश्वरं च वा
ब्रह्मणो नास्ति द्वयमेतत् सदृष्टांतमाह । पुत्रादरविवक्षायां न पिता न पितामहः
तद्वदनेशो नापि जीवज्ञाक्तिकोपाधिविवक्षणादिति ॥ ४४ ॥ इदानीं मुक्तस्य ज्ञानस्य फ
लमाह । य एवं ब्रह्म वेद स ब्रह्मैव भवति स्वयमिति । यः साधनचतुष्टयसंपे
न्नः एवमुक्तेन प्रकारेण पंचकोशविवेकपुरःसरं ब्रह्म प्रसंगात् भिन्नं सत्यादिलक्षणं
वेद साक्षात्करोति स एव स्वयं ब्रह्मैव भवति । स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव
भवति । ब्रह्मविदाप्नोति परमित्यादिश्रुतिभ्यः । न नापि किंचिदित्यत आह ॥
ब्रह्मणो नास्ति जन्मातः पुनरेष न जायते ॥ ४५ ॥ न जायते म्रियते वा विपश्चि
दित्यादिश्रुतेः । ब्रह्मणः स्वाभावाज्जन्म नास्ति । अत एव विद्वानपि स्वात्मनस्त
दपराबगमान्नैव जायते न च पुनरावर्तत इति श्रुतेः ॥ इति ॥ ४६ ॥ ॥ ८२ ॥

द दे न

॥छ॥ ॥छ॥ ॥छ॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचार्यश्री
भारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषावि
रचिता पंचकोशविवेकव्याख्या समाप्ता॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
श्रीलक्ष्मीनृसिंहाय नमः। अविघ्नमस्तु शुभमस्तु॥छ॥ ॥छ॥ ॥नत्वा श्री
भारतीतीर्थविद्यारण्यमुनीश्वरौ॥ मयाद्वैतविवेकस्य क्रियते पदयोजना॥१॥
चिकीर्षितस्य ग्रंथस्य निष्प्रत्यूहपरिपूर्त्यर्थमभिमतदैवतचानुस्मरणल
क्षणं मंगलमाचरन्नस्य ग्रंथस्य वेदांतप्रकरणत्वाच्छास्त्रीयमेवानुबंधच
तुष्टयं सिद्धवत्कृत्य यथारंभं प्रतिजानीते। ईश्वरेणापि जीवेन सृष्टं द्वैतं विवि
च्यत इति। ईश्वरेण कारणोपाधिनांतर्यामिणा जीवेनापि कार्योपाधिके
न हि प्रसिद्धेन च सृष्टमुत्पादितं द्वैतं जगद्विविच्यते विभज्य प्रदर्श्यते इत्यर्थः॥ वि
वेच्यस्य द्वैतविवेकस्य काकदंतपरीक्षावन्निष्प्रयोजनत्वं वारयति॥ वि
वेके सति जीवेन हेयो बंधः स्फुटीभवेदिति। विवेके जीवेश्वरसृष्टयोर्द्वैतयो

र्विवेचनेकृते सति जीवेन पुंवोक्ते नेहेयः परिग्राह्य बंधुरदः ।
बंधहेतुर्द्वैतं स्फुटि नवेन स्पष्टतां गच्छेत् । एतावदाख्यानेन हे
यइति निश्चीयत इत्यर्थः । नन्वदृष्टद्वारा जीवानामेव जगद्धेतु
त्वं वादीनो वर्णयंति । तत्कथं मीश्वरसृष्टत्वं चेतुच्यते जगत इत्या
शंक्याह । श्रुतिविरोधान्नेदं वाच्यमुद्धानुमहो । नीयानिप्रेमश्वे
ताश्वतरवाक्यंतावदर्थतः पठति । मायां तु प्रकृतिं विद्यान्माइ
नं तु महेश्वरं । समायि सृजते ह्याह श्वेताश्वतरशाखिनद्रुति । मा
यापाधिकमीश्वरं प्रस्तुत्यास्मान्माई सृजते विश्वमेतदिति । एतस्मै
वेश्वरस्य जगत्स्रष्टृत्वं श्वेताश्वतरशाखिनो वर्णयंतीत्यर्थः । उत्तरे
त तैरेयोपनिषद्वाक्यमर्थतोनुक्रामति । आत्मा वा इदमग्रे न्हेत् स ईक्ष
त सृजा इति । संकल्पेना सृजां लोकानसृजत तानि निबद्धं चाहेति
आ । आत्मा वा इदमेक मग्र आसीत् । नान्यत् किंचन मिषत् । स ईक्ष

त लोकान्नु सृजा इति स ईमाँल्लोकानसृजतेत्यनेन वाक्येन द्वि
तीयस्य परमात्मन एव जगत्स्रष्टृत्वं [illegible] याः। रूकुद्धारवाध्याद्धि
न व्याहृत्यर्थः। ईश्वरस्य जगत्कर्तृत्वे [illegible] श्रुतिरपि प्रमाण
मित्याह प्रसंगाद्वाक्यमर्थतः पठति। [illegible] वाच्यमिति लोके षि
ध्यान्न देहः क्रमादपि संभूता ब्रह्मणः तस्माद्वा एतस्मादात्मनो द्वि
लोः। बहु स्यां प्रजायेयेति कामतः तपस्तप्त्वा सृजत्स
र्वं जगदित्याह तैत्तिरि इति॥ सत्यं ज्ञानमनंतं ब्रह्मेत्युपक्रम्य तस्मा
द्वा एतस्मादात्मन आकाशः संभूत इत्यादीनां [illegible] संतन
वाक्येन। गुहाहितत्वेन प्रत्यगात्मभूतब्रह्मणा आकाशादिदेहप
र्यंतं जगदुत्पन्नमित्यभिधाय [illegible] परिशाददपि सोऽकामयत बहु स्यां
प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत। यदि
दं किंचेति वाक्येन। तस्यैव ब्रह्मणो जगत्सर्जनेच्छापूर्वकपर्यालो

१५५

नेनेनजगत्स्रष्टुं चेति त्रिरीराहे स ऐक्षत। छांदोग्येपि ब्राह्मणं एवमेव जगत्कर्तृ
त्वं श्रुतमित्याह। इदमग्रे सदेवासीत्। बहु स्यां प्रजायेयेति तत्तेजोऽसृजत
तजोनि ससर्जेति सामगाः श्रुति। सदेव सोम्येदमग्र आसीदेकमेवाद्वि
तीयमिति॥ सदयमद्वितीयं ब्रह्मैवैक्षत बहु स्यां प्रजायेयेति तत्ते
जोऽसृजत स आदिनो अबंडजादि शरीरनिर्मातृत्वं च सामगा वर्णयंति। स ऐक्षत
मुंडकोपनिषद्यपि। तदेतत्सत्यं। यथा सुदीप्तात्पावकाद्विस्फु
लिंगाः सहस्रशः। प्रभवंते सरूपाः। तथाक्षराद्विविधाः सोम्य भावाः प्र
जायंते तत्र चैवापि यंति॥ तीयस्य सरशब्दवाच्यात्। ब्रह्मणो जगदुत्पत्तिश्रुतम
इत्याह। विस्फुलिंगा यथा वह्नेर्जायंते तस्यैव तथा। विविधाश्च जडा भावाः
साथर्वणिकी श्रुतिरिति॥ एवं हि हदारण्यकेपि व्याकृतशब्दवाच्यात् ब्रह्मणो
नामरूपात्मकं जगदुत्पन्नमिति श्रुतमित्याह। जगद्व्याकृतं पूर्वमासीद्व्याक्रिय
तेधुना। दृश्याभ्यां नामरूपाभ्यां विराजादिषु ते स्फुटौ विराण्मनुर्नरा गावः खराः
श्वाजादयस्तथा। पिपीलिकावधि द्वंद्वमिति वाजसनेयश्रुतौ। ततो ह्येव
इदं सपापूर्वकं तेजो वन्नस्रष्टुत्वमभिधाय तेषां खल्वेषां भूतानां त्रीण्येव
बीजानि भवन्त्यंडजं जीवजमुद्भिज्जमित्यंडजादि शरीरसृष्टिर्दर्शिता ...

तस्यैव
धंति॥

व्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतामनोनामायमिदंरूपमितिवा
क्येन सृष्टेः। पूर्वास्पष्टनामरूपवेना व्याकृतशब्दवाच्यान्मायोपाधिकान्॥
ब्रह्मणो नामरूपसृष्टिकरणलक्षणा सृष्टिरुक्तान योर्नामरूपयोर्विराड
दिषु मिथुनकार्येषु स्पष्टताचतदिदमप्येतर्हिनामरूपाभ्यामेव व्याक्रियता
सो नामायमिदंरूपमितिवाक्येनाभिहिता तेच विराडादयः। आत्मैवेदमग्र
आसीत्। पुरुषविधइत्यादिना एवमेव यदिदं किंच मिथुनमापिपीलिका
भ्यस्तत्सर्वमसृजतेत्यंतेन दर्शिताइत्यर्थः। तदाहतामिश्रुति। सृष्टिश्चेत
त्सृष्ट्यभिधानानंतरं ब्रह्मणो जीवरूपेणात्र प्रवेशोभिहितइत्याह
रूपांतरं जीवं देहं प्राविशद्दिश्वरः। इतितामश्रुतयः प्राहुरिति। जीवं
जीवत्वं विशिष्टरूपांतरमविक्रियब्रह्मणो विलक्षणं विकारीरूपमित्यर्थः
देहदेहजातेजीवत्वंकुतइत्यत आह॥ जीवत्वं प्राणधारणादितिप्राणादीनां
स्वामित्वेन प्रेरकत्वं प्राणधारणं तस्माज्जीवं रूपं स्वशब्दाविशदिस्त्वम्॥ कि
तदिसपेक्षायामाह। चैतन्यं यदधिष्ठानं लिंगदेहश्चयः पुनः॥ चिच्छाया लिंग

॥१७०॥

देहस्थातत्संयोजीवत्वव्यनक्तीति। अधिष्ठानं लिंगदेहकल्पनाधारस्तेनैव
चैतन्यं। यच्च तत्र कल्पितो लिंगदेहः। यानुनर्भिन्नाया लिंगदेहस्थोय
स्थितास्मिन् लिंगदेहे विद्यमानश्चिदाभासः। तत्संघः तेषां त्रयाणां स
मूहः। जीवशब्देनोच्यत इत्यर्थः। ईश्वरस्यैव जीवरूपेण प्रविष्टत्वे
तेत्याङ्ग दुःखित्वादिविरुद्धधर्मवत्वं कुत इत्याशंक्याह॥ माहेश्वरी तु मा
यातस्यां निर्माणशक्तिवत्॥ विद्यते मोहशक्तिश्चेति। माहेश्वरी मा
यीनं तु महेश्वरमिति। श्रुत्युक्तां महेश्वरीसंबंधिनी या माया तस्यां
निर्माणशक्तिवत् जगत्सर्जनसामर्थ्यवत् मोहशक्तिश्च मोहनसाम
र्थ्यमप्यस्ति। तदेतज्जडं मोहात्मकमिति श्रुतेः। ततः किमित्यत आह। तं जी
वं मोहयत्यसाविति॥१७१॥ असौ मोहनशक्तिः। तं पूर्वोक्तं जीवं मोहयति। चि
दानंदादिस्वरूपज्ञानरहितं करोति। ततोपि किमित्यत आह॥ मोहादनी
शतां प्राप्य मग्नो वपुषि शोचति॥ इति॥ मोहात्पूर्वोक्तादनीशतामीशानिरूप्रा

त्तिपरिहारयोरसमर्थत्वं प्राप्य वपुषि मग्नः। शरीरे तादात्म्याभिमानं गतः। अ-
शोचति दुःखी चाहमित्यभिमानं करोति। समाने वृक्षे पूरुषो निमग्नोऽनीशया
शोचति मुह्यमान इति श्रुतेरित्यर्थः। वक्ष्यमाणसांकर्यपरिहाराय वृत्तं निग-
मयति। इत्थमिति। इदं द्वैतं सर्वेषु तं समासतः इति। समासतः संक्षेपेणेत्य-
र्थः। ननु जीवस्येदं दृश्यं हि चेत् किं मानमित्याशंक्याह। सप्तान्नब्राह्मणे द्वै-
तं जीवसृष्टं प्रपञ्चितमिति। कथं तत्र प्रपंचितमित्याशंक्य सप्तान्नब्राह्मण-
वाक्यद्वैतसृष्टिप्रतिपादिकांशस्य सप्तान्नानि मेधया तपसाऽजनयत्
पितेति। वा कथमर्थतस्संगृह्णाति। व्यंभानिसप्तज्ञानेन कर्मणा विजनयन्
पितेति। पीतानि स्यादृष्टेन जगदुत्पादनेन सर्वलोकपालको जीव इत्यर्थः।
अन्नसप्तक सर्जनं किमर्थमित्याशंक्याह। तद्विनियोगोऽपि एकमस्य साधा-
रणं द्वे देवानन्नभजयत्। त्रीण्यात्मने कुरुत पशुभ्य एकं प्रायच्छदिति वाक्ये-
नोक्तमित्याह। मर्त्यान्नमेकं द्वे देवान्ने पश्वन्नं चतुर्थकं। अन्नत्रितयमात्मार्थं

॥१४॥

॥१५॥

मन्त्राणां विनियोजनमिति। विनियोजनमिति शेषः। तानि च सप्तानि
कमस्य साधारणमितीदमेवास्य न साधारणमन्त्रं यदिदमर्थतद्दृष्ट्या
दिनायमात्मा वाङ्मयो मनोमयः प्राणमयः इहं तेन प्रोक्षा वाक्यसंदर्भेणो
क्तेन खंडिकाद्वयरूपेण दर्शिता नीत्याह॥ त्रि इत्यादि केदर्शपूर्णमासौ सि
रं तं थाम नः। वाक्प्राणश्चेति समन्वे मन्त्रनोर्मव गम्य नामिति॥१६॥ ननु तत्केस
मान्त्रां जगदंतःपाति चेन ईश्वरनिर्मितत्वान् जीवनिर्मितत्वात् विबधा
नं मयुक्तमित्याशंक्य तत्स्वरूपस्येश्वरनिर्मितत्वेऽपि नोग्यहाकारस्य जी
वेन निर्मितत्वान्मेवमित्याह॥ ईशेन यद्यप्येतानि निर्मितानि स्वरूपतः। न
या विज्ञानकर्मभ्यां जीवो काषिंतदन्नतामिति॥१७॥ ज्ञानकर्मभ्यां ज्ञानं विहि
तं प्रतिषिद्धं च देवतापरयोषितादिविषयं ध्यानं। कर्म च विहितं यज्ञादिरू
पं प्रतिषिद्धं हिंसादिरूपं ताभ्यामित्यर्थः। किमुक्तं भवतीति तत्राह। ईश
कार्यं जीवभोग्यं जगदाभ्यां समन्वितमिति॥ अन्नगतः समाप्तौ चेन नोक्तौ वि
त्यादिकौ रूपमीश कार्यं चेन जीवभोग्यं चेन च द्वाभ्यां संबंध मित्यर्थः।

एकस्योभयसंबंधे दृष्टांतमाह । पितृजन्या भर्तृभोग्या यथा योषित्तथा नामि
ति ॥१६॥ ईशजीवयोर्जगत्सर्जने किं साधनमित्यत आह ॥ मायावृत्त्यात्मको ही
शसंकल्पः साधनं जनौ । मनोवृत्त्यात्मको जीवसंकल्पो भोगसाधनमि
ति ॥१७॥ ननु ईश्वरसृष्टवस्तुस्वरूपातिरिक्तो भोग्याकार एव नास्ति । ये
जीवेन सृज्यत इत्याशंक्याह ॥ ईशनिर्मितमण्यादौ वस्तुन्येकविधे स्थि
ते । भोक्तृधीवृत्तिनानात्वात्तद्भोगो बहुधेष्यत इति । एकस्मिन्नेकवि
धे बहुविधो भोग उपलभ्यमानस्तत्प्रयोजकं भोग्यप्रकारभेदं गमयतीत्य
र्थः । ननु सति भोगभेदे भोग्यभेदः कल्प्येत स एव नास्तीत्याशंक्य दृष्ट
भानेनान्वेवमित्याह । हृष्यत्येको मणिं लब्ध्वा क्रुध्यत्यन्यो ह्यलाभतः । पश्य
त्येव विरक्तोत्र न हृष्यति न कुप्यति ॥१९॥ कामयमानयोर्मणिं लब्ध्वा फलाभ
हृष्यतीति । अन्यस्तथाविधस्तदलाभात्क्रुध्यतीत्यर्थः । मणौ विषयत्वं
मपि पश्यत्येव । लाभालाभनिमित्तकौ हर्षक्रोधौ न प्राप्नोतीत्यर्थः ।
केन भोग्यभेदोपलब्धौ जीवसृष्टः । प्रियाकारभेदादुस्तत आह । प्रियोऽप्रिय

रूपे स्पष्टे यथाकारामणिना स्वीयः स्पृष्टजीवैतीया स्पृष्टरूपं साधारणं
चिच्चितिः मणिनीषापियचापियचापेदयचैलक्षणा आकारभेदाः
जीवे स्पृष्टत्वविषयेऽपि साधारणमस्तु स्फुरते यन्मणिरूपं तदैश्वर्यमिस्यर्थः
उक्तं जीवस्पृष्टाकारभेदमुदाहरणांतरेण स्पष्टयति। नायास्तु षाने
नां द्वाचयानामातस्यनेकधा। प्रतियोगिधियायोवितन्निरूपितेन स्वरू
पत इति। नैनां द्वानर्तनगिनि। यातादवस्पालि। प्रतियोगिधिया। नर्तकी श्व
श्रूरादिलक्षणा प्रतियोगिगोचरयाबुध्या तेनेदपि स्मयोस्यर्थः। ननु
योषिद्विषयापि नार्योस्तु विलासादि ज्ञानान्यपि चान्येव लक्ष्यंते। ननु
न द्विषयन्नर्तकाया योषित स्वरूपभेदो दृश्यते। अतः प्रतियोगिधियाय
षिद्विषयत इत्युक्तं व्यक्तमिति रीकते। ननु ज्ञानानि निजं तामाकारस्तन
निश्चये। योषिद्व पुरुषप्रतिययोनदृष्टो जीववृत्ति मितइति। ज्ञानलेललक्षणवैवैदो स्या.
यवेलक्षण्यादिनामेतनावात् इयाका रान्नेदो मिकार्य पवेशा प्रायेन

परिहरति। मैवं मांसमयी योषित् काचिदन्या मनोमयी। मांसमय्याऽ
भेदेऽपि भिद्यते सो मनोमयीति। ननु घटादिस्थले बाह्यविषया भावा
त्। तत्र सं वस्तु मनोमयमस्तु। प्रमितिस्थले तु तदनुपपन्नं बाह्यवस्तु
नः सत्त्वादिति शङ्कते॥ भ्रान्तिस्वप्नमनोराज्यस्मृतिष्वस्तु मनोमयं। जाग्र
न्मानेन मेयस्य न मनोमयतेति चेदिति॥२५॥ मानेन प्रत्यक्षादिप्रमाणेन मेय
स्य प्रमेयस्य घटस्य। प्रमितिस्थले बाह्यविषयमङ्गीकरोति। बाढमिति
। कथं तर्हि तद्विषयस्य मनोमयत्वमित्यत आह। माने तु मेयेन योगा
त्स्याद्विषयाकृतिरिति॥ माने विषयाकृतिरस्ति मेयेन योगात्संबन्धा
त्स्यात्। ननु स्वकपोलकल्पितमित्याशङ्क्याह। भाष्यवार्तिककाराभ्या
मयमर्थ उदीरित इति॥२६॥ तत्र तावद्भाष्यकारवचनमुदाहरति। मूषासिक्तं
यथा ताम्रं तन्निभं जायते तथा। रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रु
वमिति। यथा द्रुतताम्रं मूषासिक्तं सत्तन्निभं जायते तत्सीमानाकारव
॥२७॥

नो त

१८ स्य रा

वेद

ङ्गवति। तथा रूपादीन्विषयान्व्याप्नुवद्विषयीकृतं चित्तं ध्रुवं व्यवस्थापयन्ति मेद
स्य ते न्यपलभ्यत इत्यर्थः॥ ताम्रादेरग्निसंपर्काद्धतस्य मूषानिषिक्तस्य कठि
नस्य षानिषातेन शेषाप न्नौ नुषाकापन्नौव पिबुद्धेरमूर्त्ताया स्ताम्रादिव
सर्पणया विषयान्व्याप्त्यापि कुतस्तदाकारापत्तिरिति सान्तां काय दृष्टान्तान्तरमाह॥
व्यंजको वा यथालोका व्यंग्यस्याकारतामियात्। सर्वार्थव्यंजकत्वाद्धिर्धी
कानाप्रदृश्यते॥ टी॥ यथा वा व्यंजकः प्रकाशकः आलोकः आलोकः आलोकादिः व्यं
ग्यस्य प्रकाश्यस्य घटादेराकारतामाकारवत्तामियात्। प्राप्नुयात्। एवं
धीरपि सर्वार्थव्यंजकत्वात्। सकलपदार्थप्रकाशकत्वात्। अर्थाकार इव
आकारो यस्याः सा तथा प्रदृश्यते। प्रकर्षेणोपलभ्यत इत्यर्थः। इदानीं वार्ति
ककारवचनमाह॥ मातुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत्। मेयाभिसं
गतं तन्मेयाभत्वं प्रपद्यत इति॥ मा॥ टी॥ मातुः साधिष्ठानबुद्धिस्थचिदाभासरूपा
त् प्रमातुः मानाभिनिष्पत्तिः मानस्य साक्षात्सान्तःकरणप्रवृत्तिरूपस्याभि
निष्पत्तिरुत्पत्तिर्भवतीति शेषः। निष्पन्नमुत्पन्नं तन्मानं मेयं घटादिरूप

मेति प्राप्नोति किं वा तन्मानं मेमेयादिसंगतं प्रमेयेन संबंध सन्मेयान्तरं
मेयस्यानेनेवाना = मस्य तत् मेयान्तं तस्यजावस्तवे मेयासमानाकं
रतां प्रपद्यते प्राप्नोतीत्यर्थः। न नन्वेवं प्रकृतकीमायातमिस्तन्याह। सर्वेत
विषयौ स्तो घटो मृण्मयाधिमत्वाविति। ननु मृण्मय - पद्यटस्यवे मनोमय
घटस्य तनेव मनसा गृहीतु मशक्य त्वात् ग्राहकानेत्वानावाद्यासिद्धिरवेत्या
शंक्य ग्राहकाभावो सिद्ध इत्याह॥ मृण्मयो मानमेयः स्यात् साक्षी नास्य स्तु धी
मय इति॥ यथा मृण्मयो मानमेयः। तथा धीमयः। साक्षी नास्य इत्यर्थः।
नवच्चेवं द्विविधं द्वैतं। अत्र कस्य हेयत्वं कस्य वा नेतीति नज्ञाय तद्दशा
मवच्चेवं द्विविधं द्वैतं। अत्र कस्यहेयत्वं कस्य वानेतीति तज्ज्ञाय तइस्य
क्य जीवस्य हस्यैव हेयत्वमित्युक्त्वा तस्य बंधहेतुत्वं दर्शयति॥ अन्वय
व्यतिरेकाभ्यां धीमयो जीवबंधकृत् इति॥ अन्वयव्यतिरेकावेव दर्शय
ति॥ सत्यस्मिन् सुखदुःखे स्तस्तस्मिन्नसति न द्वयमिति॥ अस्मिन् जीवस्य
हे मानुसप्रपंचे सति विद्यमाने सुखदुःखे स्तः भवतः। असतीतस्मिन्
द्वयं सुखं च दुःखं च नास्तीत्यर्थः। नन्वन्वयव्यतिरेकौ बाह्यार्थे विषयो

किं न स्यात्तामित्यत आह॥ असत्यपि च बाह्यार्थे स्वप्नादौ बध्यते नरः॥ स
माधिसुप्तिमूर्छासु सत्यप्यस्मिन्न बध्यते इति। नरः मनुष्यः। एतदुपल
क्षणं मनुष्यान्येषामपि स्वप्नादौ स्वप्नस्मृत्यादिकाले बाह्यार्थे अलीके
योषिदादौ प्रतिकूले व्याघ्रादौ च। पारमार्थिके विषये असत्यपि च विद्य
मानेपि बध्यते सुखदुःखाभ्यां युज्यते। समाध्यादिषु तु अस्मिन् बाह्यार्थे
न सत्यपि न बध्यते। न सुखदुःखादिना युज्यते। अतस्तद्विषयान्वयव्यतिरेकौ
न स्तः। दृष्टार्थः। मनोमयप्रपंचस्य बंधकत्वे नान्वयव्यतिरेकावुदाहर
णेन स्पष्टयति॥ दूरदेशं गते पुत्रे जीवत्येवात्र तत्पिता। विप्रलंभकवा । त्पि
क्येन मृतं मत्वा प्ररोदिति॥ मृतेपि तस्मिन्वार्तायामश्रुतायां न रोदितीति
॥ देशांतरं प्राप्ते पुत्रे तत्र जीवत्येव सति। अत्रास्य गृहे स्थितस्तस्य पिता वि
प्रलंभकस्य मिथ्यावचनैः परवंचकस्य वचनैस्तव पुत्रो मृत इत्येवंरूपैर्वाक्यैः स्व
पुत्रं मृतं कल्पयित्वा प्रकर्षेण रोदनं करोति। तस्मिन्नेव पुत्रे तत्रैव मृतेपि
तन्मृतिवार्तायामश्रुतायां सत्यां न रोदनं करोति। फलितमाह। अतः सर्वस्य

जीवस्य बंधहेतुर्मानसं जगदिति। मनोमयस्यैव जगतो बंधहेतुत्वं। ईशकार्य
बाह्यार्थापलापादपसिद्धांतापातः स्यादिति शंकते विज्ञानवादो नाह्यार्थ-
वैयर्थ्यात्स्यादिहेति चेदिति। परिहरति। नैव हृद्याकारमाधातुं बाह्यस्या
पेक्ष्यत्वतद्गिति। यद्यपि मानसप्रपंचस्यैव बंधहेतुत्वं। तथापि तद्धेतुत्वे
न बाह्यार्थस्यापि स्वीकारान्न विज्ञानवादप्रसंग इति भावः। ननु नहृ
द्याकारसमर्पणाय बाह्यपदार्थो [illegible]सणीयः। पूर्वपूर्वमानसप्रपंचसंस्का
रस्यैवोत्तरोत्तरमानसप्रपंचहेतुत्वोपपत्तेरित्याशंक्य सोदवीदन तदंगी
करोति। वैयर्थ्यमस्त्वेवेति। तर्हि विज्ञानवादप्रसंगः को नेदमस्तत्याह। बा
ह्यान्तवारर्ह्येतुमा नमहे इति विज्ञानवादिनो बाह्यार्थमेवापलपंति। व
यं नं तथा स्वयमेव नेदमस्तर्थ्यः। प्रयोजनशून्यस्याप्यपलपामो यस्तु न एव सं
ज्ञांक्य प्रयोजनमपश्यंते नमानीति हि। [illegible]तिरिति। मानाधीना वस्तुसिद्धिर्न
प्रयोजनशून्यत्वमात्रेणा सत्त्वस्य लौकिकैर्वादिभिर्वाप्यनभ्युपगमादिति भा
वः। मानसद्वैतस्यैव बंधहेतुत्वेन तस्य मनोनिरोधात्मकयोगेन निवृत्तिः सं

पे
पे
स्य
ना

नवात्। ब्रह्मज्ञानस्य बंधनिवर्तकत्वाभ्युपगमो विरुध्येतेति चेत्। बंध-
श्चेन्मात्रसद्द्वैतं न द्विरोधेन शाम्यति। विन्यसेद्योगमेवातो ब्रह्मज्ञानेन किं
देतिदि। योगेन किं द्वैतोपशमः स्यात्। कालिकं उच्यते। असंति कोवेति विक
ल्पया द्यमगी स्यासद्द्वितीयं दूषयति। तात्कालिकद्वैतशांतौ नावश्यमा
मिश्रनीश्चयः। ब्रह्मज्ञानेन विना न स्यादिति वेदांतवाक्यैः। ब्रह्मज्ञानादे
वं मुच्यते। सर्वं पाशौ सर्वं चाशिवं शांतिमस्य लभाति। यदा चर्मवदाकाशं वे
ष्टयिष्यंति मानवाः। तदा देवमविज्ञाय दुःखस्यांतो भविष्यतीत्यादि
श्रुतीषु अन्वयव्यतिरेकाभ्यां ब्रह्मज्ञानादेव बंधनिवृत्तिरवसिध्य-
यत इति भावः। ननु बाह्यद्वैतनिवारणामंतरेणाद्वितीयब्रह्मज्ञानमेव न
दीयादियात्रां कथं तन्निवारणानावेपितव्यमिथ्याचेत्ज्ञानादे पारमार्थि
कमद्वैतं ज्ञानं प्रयोजनं बोद्धुं शाक्यं तद्माह। बनिवृत्तापि शास्त्रहद्वैतेनतस्य
मृषात्मनां। बुध्वा ब्रह्माद्वयं बोद्धुं शक्यं वस्त्वेकवादिनेत्॥ इति। न द्वैतमृषात्म
त्वज्ञानमद्वैतज्ञानप्रयोजकं। नापि तन्निवारणमेवेत्यनिर्निवेशभा

नं प्रत्याह। प्रलये तन्निवृत्तौ तु गुरुशास्त्राद्यभावतः। विरोधिद्वैतहाने
पि न शक्यं बोद्धुमद्वयमिति॥ प्रलये प्रलयावस्थायां तन्निवृत्तौ तु त
स्य निवृत्तौ सत्यां विरोधिद्वैतहानेपि अद्वैतज्ञानविरोधित्वेन भवदभि
मतस्य द्वैतस्य निवारणे सत्यपि गुरुशास्त्राद्यभावतः। गुरुशास्त्रादि
रूपस्य ज्ञानसाधनस्याभावाद्धेतोरद्वयं वस्तु बोद्धुं शक्यं न भवति
। अतस्तन्निवारणमप्रयोजकमिति भावः। तथापि सति द्वैते कथमद्वै
तज्ञानमित्याशङ्क्याह॥ अबाधकं साधकं च द्वैतमीश्वरनिर्मितं। अप
नेतुमशक्यं चेत्साम्यं तद्द्वैतं कुत इति॥ ईश्वरनिर्मितं द्वैतमबाध
कं तन्मृषात्वज्ञानेनैवाद्वैतज्ञानोत्पत्तेः सत्त्वात्साधकं च। गुरुशास्त्रा
दिरूपं तत्स्य ज्ञानसाधनत्वादाकाशादिरूपं द्वैतमस्मान्निरपनेतु
मशक्यं चेति हेतोस्तद्द्वैतमास्तां कुतः कारणाद्विशिष्यत इत्यर्थः। इदा
नीं जीवसृष्टं द्वैतं विभजते। जीव[illegible]द्वैतं तच्छास्त्रीयमशास्त्रीयमा
निषिद्धं द्विविधमपि सदा हेयमेवेत्याह॥ उपात्तं तच्छास्त्रीय
मा

मातत्वस्यावबोधनादिति। आत्मतत्वस्यावबोधनपर्यंतमित्यर्थः। किं न च्छा
स्त्रियं द्वैतमित्यर्थकांक्षायामाह। आत्मब्रह्मविचाराख्यं शास्त्रीयं ज्ञान
संजगादिति। प्रत्यग्रूपस्य ब्रह्मणो विचाराख्यं यच्छ्रवणादि तच्छास्त्रीय
ज्ञानं संजगादित्यर्थः॥ आत्मतत्वस्यावबोधनादित्युक्तमनुपपन्नं आ
स्तु नित्यसिद्धतेः। कालेन यद्वेदान्तचिंतयैवैतेनादित्याशंक्याह॥ तु देतते
तच्चाहयमितिश्रुत्यनुशासनमिति तत्वे ब्रह्मतत्वे ब्रह्मात्मैक्यलक्षणे सा
क्षात्कृते सतीत्यर्थः। न ह्यनुत्पत्तिरिवाक्यस्य का गतिरिति चेत्तत्राह यान्मा
चसारं किंचित्कामादीनामनागपीति॥ पूर्वार्धे कामाद्यवसरप्रदानस्य
निषिद्धत्वात् तत्परत्वे चेति वदामः। न च बोधोत्तरकाले तद्वैयर्थ्यप्रतिपा
दनपराश्रुतिमुदाहरति॥ शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पु
नः। परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत्॥ ग्रंथमभ्यस्य मेधा
वी ज्ञानविज्ञानतत्परः। पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषतः॥ ने

मेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः॥ नानुध्यायाद्बहूञ्छब्दान्वाचो
विग्लापनंहितत्॥ तमेवैकंविजानीथअन्यावाचोविमुंचथ। यच्छेद्वाङ्म
नसीप्राज्ञइत्यादिश्रुतयस्फुटाइति॥ तमेवैकंविजानीतइत्यनेन। तमेवै
कंविजानथ। आत्मानमन्यवाचोपिमुंचथः अमृतस्यैषसेतुरितिश्रु
तिरर्थतःपठिता। अशास्त्रीयद्वैतस्यापिअवांतरभेदमाह। अशास्त्री
यमपियद्वैतंतत्तीव्रंमंदमितिद्विविधेति। द्विविधमपिक्रमेणोदाहरति।
कामक्रोधादिकंतीव्रंमनोराज्यंतथेतरदिति। इतरंमंदमित्यर्थः। किम
नयोःशांतितीव्रंमंदमितित्र्ययद्वैतस्यैवतत्त्वावबोधोत्तरकालपर
हेयत्वंनेत्याह॥ तत्त्वबोधात्प्रागेवनिवार्यमिति। ज्ञानेनिवारणं
किमर्थमित्यतआह। बोधसिद्ध्यर्थमिति। तत्रलिंगमाह॥ शमःसमाहि
तत्वंचसाधनेषुश्रुतेषुयतइति। यतस्तत्त्वावबोधात्प्राक्तनयोर्हेयत्वेन
रावनिसानिसर्वस्वविवेकादिब्रह्मज्ञानसाधनेषुमध्येशांतसमाहि

कु

तदुक्तिपदाभ्यां शान्तिसमाधी स्तूयेते इत्यर्थः। तत्त्वबोधात् प्राग्देव नि
र्वीर्यमिव निश्चितानात्तदुत्तरकालमस्य स्विकार्यतास्यादित्याशंक्य त
बोधादूर्ध्वं च तद्वद्वये जीवन्मुक्तिप्रसिद्धयइति। उक्तमर्थं व्यतिरेकमु ॥५४॥
खेन प्रदर्शयति॥ कामादिकं स्वबंधेन मुक्तस्य न हि मुक्तेति। कामादि
रूपो यः क्लेशः स एव बंधः तेन मुक्तस्य बंधस्य मुक्तता। जीवन्मुक्तेर्व
न हि नास्त्येव इत्यर्थः। ननु जन्मादिसंसारादुद्विग्नस्यापि तत्त्वविदुषः पार्थ्यं
पर्यायो विदेहमुक्तैव। वक्तव्यं किमनया आपातिकया जीवन्मुक्त्या। क्वेति शा
कते। जीवन्मुक्तिरियं न तु जन्माभावश्चं इहैवेति। ऐहिकभोगनिवृत्तिमा
यातु विदेहमुक्तिरपि साध्यस्यादिति प्रतिबन्धं परिहरति॥ अन्यत्रापि नहि
तत्स्वैतत्स्वर्गमात्रात्परलोकतो नावाप्नोति प्रतिबंधि मोचनं शंकते। अयाति शा
यदाषेया स्वर्गा हि यायदेति। दोषयुक्तत्वेन स्वर्गत्वे स्वाज्यत्वे सकलपुरु
षोविद्यातत्वेना। तीव्रदोषरूपस्य कामादेः स्तुतरां साध्यत्वमित्याह॥
तदा। स्वयं दोषतमात्मायं कामादेः किं न हि यत्नइति॥ ननु वैराग्यादि
॥५५॥

संपादने नायं तानर्थहेतोः। कामादेस्तत्केवादेहिकनोममात्रोपयोगीका
मायत्न्यपगमे को दोष इत्याशंक्याह॥ नत्वं बुध्वापि कामादि त्रिसंघं न जह्या
सिवेत्। यथेष्टचरणं ते स्यात्कर्मशास्त्रातिलंघिन इति॥ तच्च विचारितमी
नेन विधिनिषिद्धशास्त्रमतिक्रम्य कामाद्यधीनतया वर्तमानस्य यथेष्टच
णं स्यादित्यर्थः। अस्तु को दोष इत्याशंक्य तदनिष्टं च प्रतिपादनपरं श्रेयस्थ
माचार्यवचनमुदाहरति॥ बुद्धाद्वैतसतत्वस्य यथेष्टचरणं यदि। शुनां तत्त्व
दृशां चैव को भेदो शुचिभक्षणे इति॥ बुद्धमद्वैतमद्वैतरूपं ब्रह्म येन स बु
द्धाद्वैतः [illegible] तत्त्वं तत्त्ववित्। तस्य यथेष्टचरणं यदि स्यात्तर्हि अशुचिभक्षणा
दिकमपि स्यात्। तथा सति शुनां तत्त्वविदां चनकोपि विशेषः इत्यर्थः। एत
वता किमनिष्टमापादितमित्याशंक्य सोपहासमुत्तरमाह॥ बोधात्पुरा
मनोदोषमात्रात्क्लिष्टोऽस्यथाधुना। अशेषलोकनिंदा चेत्याहो ते बोधवै
नव इति। न च ज्ञानोदयात् प्राक्कामक्रोधादिचित्तदोषैरेव क्लेशो [illegible]
इदानींतु सर्वलोकनिंदयास्कते कुशाईमु [illegible] नाकः। तर्हि किं कर्तव्य
मित्यत आह। विड्वराहादितुल्यत्वं माकांक्षीस्तत्त्वविद्भवान्। सर्वधीदोषसंत्या

१६४

स्यात्

गाल्लोके पूज्यस्वदेवबैत्। किंतु कामादिलक्षणसकलमनोदोषहीने
न सर्वं अनेदं बव तुज्यस्वत्तुञ्पत्नवेयुर्थः। तद्योगोपायमाह। काम्या
दिदोषदृष्ट्याद्या कामादित्यागहेतवदूति॥ काम्याः कामना विषयाः
स्रगादयः आदयो येषां वे तदृष्ट्यादीनां ते काम्यादयः। तेषां ये दोषाः
अनित्यत्वसातिशयत्वादयः। तेषां दृष्टिरवलोकनं आद्यं येषां कोपस्व
रूपविचारादीनां ते तथोक्ताः। तेषां कामादित्यागहेतुत्वे प्रमाणमाह। प्र
सिद्धानो स्मृत्यास्त्रेष्विति। नवतु ततः किमित्यत आह। तानन्विष्य तु खीन
वेति। ननु कामादीनां अनर्थहेतुत्वात् सामान्यत्वे मस्त्के मनोराज्यत्वात् स्व
वेन थाचा तत्सागोनापेक्षितइति शंकते॥ राज्यनाम्निषकामादिमेनारा
ज्ये तु कांक्षतीरिति। प्रासादनर्थहेतुत्वाभावेपि परंपरयाते तु तुत्वात् सा
ज्यत्वमेवेत्यत्नि प्रसर्पा हिहरति। अशेषदोषबीजत्वात् सतिर्भगवतेरितपि
परंपरयानर्थहेतुत्वं प्रदर्शनपरं भगवद्वाक्यमुदाहरति॥ ध्यायतो विष
यान् पुंसः संगस्तेषूपजायते। संगात् संजायते कामः कामात् क्रोधोभि

जायते। तस्य मनोराज्यस्य कः परिहारो बोद्धव्य इत्यत आह। आशाकर्मे
तु मनोराज्यं निर्विकल्पसमाधितः इति। सापि कुतः सिध्यतीत्यत
आह॥ सुसंपादः क्रमात्सोपि सविकल्पसमाधिनेति॥ नन्वछां गयो
गम्यत्वेकस्य तथा स्फुरतद्रहितस्य का गतिरित्यत आह। बुद्धितत्त्वेन धीदो
षशून्येनैकांतवासिना दीर्घप्रणवमुच्चार्य मनोराज्यं विजीयते॥ इति।
बुद्धमवगतं तत्त्वं ब्रह्मात्मैकत्वलक्षणं येन स बुद्धतत्त्वः कामक्रोधादि
बुद्धिदोषरहितेन एकांतवासिना विजनदेशनिवसनशीलेन पुरु
षेण दीर्घं षट्द्वादशादिमात्रोपेतं प्रणवमोंकारमुच्चार्य मनोराज्यं
विजयेन निवार्यत इत्यर्थः। मनोराज्यविजये किं भवतीत्यत आह॥
जीते तस्मिन्वृत्तिशून्यं मनस्तिष्ठति। मूकवदिति। यथा मूकः सकलवा
ग्व्यापाररहितस्तिष्ठति। एवं मनोपि सर्वव्यापाररहितमवतिष्ठत
इत्यर्थः। अवृत्तिकमनोवस्थानस्य पुरुषार्थत्वं वेयमाणामाह॥ एतत्पदे

द त्रो

वसिष्ठेनरामायबहुधेरितमिति।एतत्पदमियंस्कंधेइत्यर्थः।वासिष्ठश्लोक
वाक्यद्वयमुदाहरति॥दृश्यंनास्तीतिबोधेनमनसोदृश्यमार्जनं।संपन्नं
चेत्तदुत्पन्नापरानिर्वाणनिर्वृतिः।विचारितमलंशास्त्रं।चिरंमुद्ग्राहि
तंमिथइति।नेहनानास्तिकिंचनेत्यादिश्रुत्याद्वितीयब्रह्म[illegible]तिरिक्तंअ
गदंना= यज्ञानेनमनसःसकाशात्दृश्यनिवारणंसंपन्नंयदितर्हि
निरतिशयनामसुखंनिष्पन्नमितिजानीयादित्यर्थः।अद्वैतशास्त्र
मस्यर्थेविचारितंमिथःपरस्परंगुरुशिष्यादिसंवादद्वाराचिरकालं
प्रत्यापादितंएवंकृत्वाकिंनिश्चितमित्याह।तथाह॥संयक्तोवासना
न्मोनाहमितेनास्यात्तमंपदमिति॥सम्यक्परित्यक्तकामादिवासनान्मन
सस्तुछिन्नावादेनतव्याधिकःपुरुषार्थोनास्तीतिनिश्चितमित्यर्थः।एवं
निर्वृत्तिकस्यचित्तस्यप्रारब्धकर्मणाविक्षेपसतितत्प्रतीकारोपायःकः
इत्यपेक्षायामाह॥विक्षिप्यतेकदाचिद्धीःकर्मणाभोगदायिना।पुनस्समा
हितासास्यात्तदेवाभ्यासपाटवात्इति॥भोगप्रदेनप्रारब्धकर्मणा

द्र

बुद्धिः कदाचिद्विक्षिप्यते चेत्तर्हि सा बुद्धिरभ्यासदार्ढ्याद् देव पुनरपि समाहि
ता स्यादित्यर्थः। सदाचित्तविक्षेपरहितस्य ब्रह्मविद्वत्तमस्यौपचारिकमि
त्याह। विक्षेपो यस्य नास्त्यस्य ब्रह्मवित्त्वं न मन्यते। ब्रह्मैवायमिति प्राहुर्मु
नयः पारदर्शिन इति। पारदर्शिनः वेदान्तपारंगता इत्यर्थः। अत्रापि व
सिष्ठवाक्यमुदाहरति। दर्शनादर्शने हित्वा स्वयं केवलरूपतः। यस्तिष्ठ
ति स तु ब्रह्मन् ब्रह्म न ब्रह्मवित्स्वयमिति। ये ब्रह्मज्ञानाभीनज्ञानाभीति
व्यवहारद्वयं परित्यज्य स्वयमद्वैतये नन्यरूपेणावतिष्ठतीति। स्वयं ब्रह्मैव
न ब्रह्मविदित्यर्थः। सफलं द्वैतविवेचनमुपसंहरति॥ जीवन्मुक्तेः प
रा काष्ठा जीवद्वैतविवर्जनात्। लभ्यते सावतोत्रेदं ईशद्वैताद्विवेचितमि
ति। असावुक्तप्रकारा जीवन्मुक्तेः परा काष्ठा निरतिशया = पर्यवसान
भूमिः जीवद्वैतस्य मनोमयप्रपंचस्य विवर्जनात्परित्यागाल्लभ्यते। पा
प्यते। अतः कारणादिदं जीवद्वैतमीशद्वैतात् ईश्वरसृष्टेः द्वैताद्विवेचित
विविच्य प्रदर्शितमित्यर्थः॥६९॥ ॥६९॥ ॥६९॥ ॥६९॥ ॥६९॥

333

॥छ॥ ॥छ॥ ॥छ॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीना
रतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचि
तोद्धृतविवेकस्य पदयोजना समाप्ता ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
॥छ॥ ॥श्रीलक्ष्मीनृसिंहाय नमः॥छ॥ ॥नत्वा श्रीभारतीतीर्थविद्या
रण्यमुनीश्वरौ ॥ महावाक्यविवेकस्य कुर्वे व्याख्यां समासतः॥१॥ मु
मुक्षोर्मोक्षसाधनब्रह्मात्मैक्यावगतिसिद्धये प्रसिद्धानां चतुर्णां महा
वाक्यानामर्थं क्रमेण निरूपयन् परमकृपालुराचार्य आदावैतरे
यारण्यकगतं प्रज्ञानं ब्रह्मेति महावाक्यप्रज्ञानशब्दस्यार्थमाह ॥
येन वेक्षते शृणोतीदं जिघ्रति व्याकरोति च । स्वाद्वस्वादु विजानाति तत्प्रज्ञा
नमुदीरितं ॥ येन चक्षुर्द्वारा निर्गतांतःकरणवृत्त्युपहितेन चैतन्येन इदं सर्वं
नयनार्हं रूपादिकमीक्षते पश्यति पुरुषः । तथा श्रोत्रद्वारा निर्गतांतःकरणवृ
त्त्युपाधिकेन येन शब्दजातं शृणोति । तथैव घ्राणद्वारा निर्गतांतःकरणवृत्ति

334

महावाक्य
विवेक

दशम
१८०

पार्थिवेन येन गंधमाजिघ्रति। वागींद्रियावच्छिन्नेन व्याकरोतीति शब्दजा-
तं व्याहरति। येन रसनेंद्रियद्वारा निर्गतांतःकरणवृत्त्या पार्थिवेन स्वादु-
स्वादुरसौ विजानाति। अनुक्तसमुच्चयार्थश्च शब्दः। तथा चोक्तानुक्तैः
सकलेंद्रियैरंतःकरणवृत्तिभेदैश्चोपलक्षितं यच्चैतन्यमस्ति तदेवा-
त्र प्रज्ञानमित्युच्यत इत्यर्थः। अनेन येन वा पश्यतीत्यादेः सर्वाण्येवैता-
नि प्रज्ञानस्य नामधेयानि भवंतीत्याहैतस्यावांतरवाक्यसंदर्भस्या-
र्थः संक्षिप्य दर्शितः। एवं प्रज्ञानशब्दस्यार्थमभिधाय ब्रह्मशब्दार्थमाह
चतुर्मुखेंद्रदेवेषु मनुष्याश्वगवादिषु चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म म-
य्यपीति। उत्तमेषु देवादिषु मध्यमेषु मनुष्येषु अधमेषु अश्वादिषु देहधा-
रिषु। आकाशादिभूतेषु जगज्जन्मादिहेतुभूतं यदेकं चैतन्यमस्ति
तद्ब्रह्मेत्यर्थः। अनेन च एष ब्रह्मैष इंद्र इत्यादेः प्रज्ञाप्रतिष्ठेत्यंतस्यावां-
तरवाक्यस्यार्थः संक्षिप्य दर्शितः। इदं पदार्थमभिधाय वाक्यार्थमाह

335

अतः प्रज्ञानं ब्रह्म मय्यपीति। यतः सर्वत्रावस्थितं प्रज्ञानं ब्रह्म अतो मय्यप्य
वस्थितं। प्रज्ञानं ब्रह्मैव प्रज्ञानं ब्रह्मा विष्णवादि इत्यर्थः। एवं ऋक्शाखागतम
हावाक्यार्थं निरूप्य यजुःशाखासु मध्ये बृहदारण्यकोपनिषदि श्रुतस्याहं ब्र
ह्मास्मीति महावाक्यस्यार्थं विवरणायाहंशब्दस्यार्थमाह ॥ परिपूर्णप
रात्मास्मिन्देहे विद्याधिकारिणि। बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमिति
र्यत इति॥ परिपूर्णः स्वभावतो देशकालवस्तुभिरपरिच्छिन्नः परमात्मा अ
स्मिन्मायाकल्पिते जगति विद्याधिकारिणि शमादिसाधनसंपन्नत्वेन विद्या
संपादनयोग्ये अस्मिन् श्रवणाद्यनुष्ठानवति देहे मनुष्यादिशरीरे बुद्धेर्बुद्ध्यु
पलक्षितस्य सूक्ष्मशरीरस्य साक्षितया अविकारित्वेनावभासकतया स्थि
त्वा अवस्थाय स्फुरन् प्रकाशमानोऽहमिति ईर्यते। लक्षणया अहंपदेनोच्यत
इत्यर्थः। ब्रह्मशब्दार्थमाह॥ स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णित इति॥ स्व
तः पूर्णः स्वभावतो देशकालाद्यनवच्छिन्नः पूर्वोक्तः परमात्मा। अत्र अस्मिन्महा
वाक्ये ब्रह्मशब्देन ब्रह्मेत्यनेन पदेन वर्णितः। लक्षणयोक्त इत्यर्थः। एतद्वाक्यगतेन

स्मीतिपदेन पदद्वयसामानाधिकरण्यलब्धजीवब्रह्मणोरैक्यं परामृश्यत
इत्याह॥ अस्मीत्यैक्यपरामृट् इति । फलितमाह । तेन ब्रह्मैवाहमस्मीति
इदानीं छांदोग्यश्रुतिगतस्य तत्त्वमसीति वाक्यस्यार्थप्रकाशनाय तत्पदल
क्ष्यार्थमाह॥ एकमेवाद्वितीयं सन्नामरूपविवर्जितं । सृष्टेः पुराधुनाप्यस्य
तादृक्त्वं तदितीर्यते इति । सदेव सौम्येदमग्र आसीत् एकमेवाद्वितीय इति वा
क्येन सृष्टेः पुरा स्वगतादिभेदशून्यं नामरूपरहितं यत्सद्वस्तु प्रतिपादितं
अस्य सद्वस्तुनो अधुनापि सृष्ट्युत्तरकालमपि तादृक्त्वं विचारदृष्ट्या यथावत्त
दिति पदेनेर्यते । लक्ष्यत इत्यर्थः । त्वंपदलक्ष्यार्थमाह । श्रोतुर्देहेंद्रियातीतं व
स्त्वत्र त्वंपदेरितं॥ श्रोतुः श्रवणाद्यनुष्ठानेन वाक्यार्थप्रमातुर्देहेंद्रियाती
तं । देहेंद्रियोपलक्षितस्थूलादिशरीरत्रयसाक्षितया तद्विलक्षणं वस्तु स
द्रूपं तत्त्वं पदेरितं । वाक्यगतेन त्वमिति पदेन लक्षितमित्यर्थः । एत[illegible]स्येना
सीतिपदेन तत्त्वंपदसामानाधिकरण्यलब्धं पदार्थद्वयैक्यं सिद्धं प्रसा
ध्याय इत्याह॥ एकता ग्राह्यतेऽसीति सिद्धमर्थमाह तदैक्यमनुभूयतामिति।
तयोस्तत्त्वंपदार्थयोरैक्यं प्रमाणसिद्धं [illegible] मेवमनुभूयतां मुमुक्षुभिरिति स

वेद

र्थः। क्रमप्राप्तस्याथर्वणगतस्यायमात्मा ब्रह्मेति वाक्यस्यार्थं कथयितुं पुनस्ता
वयमात्मेत्यादि इति पदद्वयेन विवक्षितमर्थं क्रमेणादर्शयति॥ स्वप्रकाशोऽपरोक्ष
त्वमयमित्युक्तितो मतमिति॥ अयमित्युक्तितः अयमिति शब्देन स्वप्रकाशा
परोक्षत्वं स्वयंप्रकाशत्वे सापरोक्षत्वमतमभिमतं अहङ्कारादिवान्नपरोक्षत्वं
(अयमित्युक्तितो) घटादिवद्दृश्यत्वेन व्यावर्तयितुं विशेषणद्वयमिति बोध्यम्।
देहादिव्यापकशब्देन किं विवक्षितमित्याकांक्षायामाह॥ अहंकारादिदेहां
तान्प्रत्यगात्मेति गीयते इति अहंकार आदिर्यस्याहंकारप्राणमनइं
द्रियदेहसंघातस्य सोऽहंकारादिः तथा देहपर्यन्तो यस्योक्तसंघातस्य सदेहान्तः
अहंकारादिश्चासौ देहान्तश्चेति तथा। तस्मात्प्रसमधिष्ठानतया सर्वान्तर आत्मे
ति गीयते अस्मिन्वाक्ये अयमित्यस्यार्थः। ब्राह्मणादीष्वपि ब्रह्मशब्दस्य प्रयोगदर्शना
त्तद्व्यावर्तनायात्र विवक्षितमर्थमाह॥ दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते
ब्रह्मशब्देनेति दृश्यत्वेन मिथ्याभूतस्य सर्वस्याकाशादेः जगतस्तत्त्वमधिष्ठान
तया तद्बाधावधित्वेन पारमार्थिकं सच्चिदानंदलक्षणं यद्रूपमस्ति तद्ब्रह्मश
ब्देनेर्यते कथ्यत इत्यर्थः। वाक्यार्थमाह॥ तद्ब्रह्म स्वप्रकाशात्मरूपकमि त्य

॥८॥

ब्रह्मानंदे यो
गानंदः

प्रथमो

दुर्क्तलक्षणं ब्रह्म स्वप्रकाशं आत्मारूपं स्वरूपं यस्य तत्तथा स्वप्रकाशात्मरूपकं
स एवेत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ इति श्रीमत्परमहंसप
रिव्राजकाचार्यश्रीनारतीतीर्थगुरुनिवर्यश्रीविद्यारण्यमुनिवर्यकिंकरेण श्रीम
मल्लाख्यविदुषा विरचिता महावाक्यविवेकव्याख्या समाप्ता ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ श्रीलक्ष्मीनृसींहाय नमः ॥ ॥ ॥ ॥ ॥ ॥

१६५

नत्वा श्रीनारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ ब्रह्मानंदाभिधं ग्रंथं व्याकुर्वे बोध
सिद्धये ॥ ॥ चिकीर्षितस्य ग्रंथस्य निष्प्रत्यूहपरिपूरणाय परिबंधिकल्मष
निवृत्तये अभिमतदेवतातत्त्वानुसंधानलक्षणं मंगलमाचरन् श्रोतृप्रवृत्ति
सिद्धये सप्रयोजनमभिधेयमाविष्कुर्वन् ग्रंथारंभं प्रतिजानीते ॥ ब्रह्मानं
दं प्रवक्ष्यामि ज्ञाते तस्मिन्नशेषतः ऐहिकामुष्मिकानर्थव्रातं हित्वा सुखा
यते इति ॥ निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ये मंदास्तेनुकंप्यंते
सविशेषनिरूपणैः इति ॥ सविशेषब्रह्मरूपाणां देवतानां तत्त्वस्य निर्विशे
षब्रह्मरूपताभिधानात् ब्रह्मणश्च आनंदो ब्रह्मेत्यादिश्रुतिभिरानंदरूप

तानिःशानात् ब्रह्मानंदं दर्शितानंदरूपस्य ब्रह्मणो वाचकशब्दप्रयोगे
णायद्धि मनसा ध्यायति तद्वाचा वदतीति श्रुत्युक्तन्यायेन ब्रह्मानुसंधा
नलक्षणं मंगलाचरणं सिद्धं। ब्रह्मणश्च सर्वैः सर्ववेदांतप्रतिपाद्यत्वात्
तत्प्रकरणात्स्वरूपस्यास्य ग्रंथस्य प्रतिपाद्यविषय इति। ब्रह्मशब्दप्रयोगे
ण विषयश्च सूचितः। ऐहिकामुष्मिकानर्थव्रातं हित्वा सुखाय तदिति।
तन्मार्गेणानिष्टनिवृत्तीष्टप्राप्तिरूपं प्रयोजनद्वयं मुख्यतः एवोक्तं। ब्रह्मा
नंदं ब्रह्म चासावानंदश्चेति ब्रह्मानंदः वाच्यवाचकयोरत्र दाप्ययाराम् तत्प्र
तिपादकोऽयं योऽपि ब्रह्मानंदः तत्स्वरूपमितस्मिन्प्रतिपाद्यप्रतिपादक
रूपे ब्रह्मानंदे ज्ञाते अवगते सति ऐहिकामुष्मिकानर्थव्रातं ऐहिकाना
मिह लोके जनानां देहपुत्रादीष्वहंममाभिमानप्रयुक्तानामाध्यात्मिकादि
तापानां आमुष्मिकानाममुष्मिन्परलोके जवानां तेषामनर्थानां व्रातस्स
मूहस्तमशेषतः। निरवशेषं यथा भवति तथा हित्वा परित्यज्य सुखाय नेह
स्वरूपं ब्रह्मैवेति॥ ब्रह्मज्ञानस्यानिष्टनिवृत्तीष्टप्राप्तिहेतुत्वे बहु निश्चै

षं

नव

ति

ति स्मृतिवाक्यानि प्रमाणानि संतीति प्रदर्शयतु कामस्तावद्ब्रह्मविदा
प्नोति परं श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदि
ति सोहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति च वा
क्यद्वयमर्थतः पठति ॥ ब्रह्मवित्परमाप्नोति शोकं तरति चात्मविदिति ॥
ब्रह्म वेत्तीति ब्रह्मवित् परमुत्कृष्टं आनंदरूपं ब्रह्म प्राप्नोति आत्मवित्
त्मशब्दवाच्यं देशकालवस्तुपरिच्छेदशून्यमात्मानं वेत्तीत्यात्मवि
त् शोकं स्वसंसृष्टं पुरुषं शोचयतीति शोकः तमामूलं संसारं
तं तरति अतिक्रामति ॥ ॥ ननूदाहृततैत्तिरीयकश्रुतिवाक्ये ब्रह्म
ज्ञानस्य परप्राप्तिहेतुत्वेवावगतेनानंदप्राप्तिहेतुत्वे साक्षाद्यानंद
प्राप्तिहेतुप्रतिपादनपरं । रसो वै सः । रसं ह्येवायं लब्ध्वानंदी भवतीति । न
दीयमेव वाक्यमर्थतः पठति ॥ ॥ रसो ब्रह्मरसं लब्ध्वानंदी भवति नान्य
था ॥ ॥ सत्यं ज्ञानमनंतं ब्रह्म । तस्माद्वा एतस्मादात्मन आकाशः संभूत
इति ॥ प्रकरणादौ ब्रह्मात्मशब्दाभ्यामभिहितोयमात्मा सः सूसः सार ।

आनंदरूपद्रष्टर्ष्य रसं॰ आनंदरूपं ब्रह्म लब्ध्वा ब्रह्माहमस्मीति ज्ञा
नेन प्राप्यानंदी भवतीति। अपरिछिन्ननिरतिशयसुखवान्भव
ति॥ उक्तमर्थं व्यतिरेकप्रदर्शनेन द्रढयति॥ – ॥ नान्यथेति॥
अन्यथा ब्रह्मणि आत्मैकत्वज्ञानं विहाय साधनांतरानुष्ठानेन नानं
दी भवतीत्यर्थः। एवमन्वयमुखेन ब्रह्मप्राप्त्यनिष्टनिवृत्तिप्रतिपा
दनपराणि वाक्यानि प्रदर्श्यान्वयव्यतिरेकाभ्यामनर्थनिवृत्तिप्र
दर्शनपरं। यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभ्य
भयं प्रतिष्ठां विंदते अथ सोऽभयं गतो भवति॥ – ॥ यदा ह्येवैष एत
स्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति। वाक्यद्वयमर्थतो
नुक्रामति॥ – ॥ प्रतीष्ठां विंदते स्वस्मिन्यदा स्यादथ सोऽभयः। कु
रुते स्मिन्नंतरं चेत्तु दथ तस्य भयं भवेदिति॥ – ॥ अस्य वाक्यस्यार्थः
। यदा यस्मिन्काले हीति विद्वत्प्रसिद्धिप्रदर्शनपरो निपातः। एवं
सयमेवानर्थनिवृत्त्युपायो नान्य इति नियमनार्थः॥ – ॥ एष इत्यनूद्य

ब्रह्मानंदे योगानंदः

प्रथमोध्यायः ।

एतस्मिंश्चिद्वस्तुन्यवगम्ये अदृश्ये इंद्रियागोचरे अनात्म्ये अनात्मि
ये स्वरूपतया स्वस्वीयत्वरहिते अनिरुक्ते निरुक्तिर्निर्वचनं शब्दे
नाभिधानं यत्र नास्ति तदनिरुक्तं तस्मिन्ननिलयने निलीयते यस्मि
न्निति निलयनं आधारः ॥ न विद्यते [illegible] यस्य तस्मिन्स्वमहि
म्नि स्थिते इत्यर्थः । अभयं द्वितीयाद्वै भयं भवतीति श्रुतेः । भयशब्दे
नात्र भयहेतुर्भेदो लक्ष्यते । न विद्यते भयं भेदो यथा भवति तथा
प्रतिष्ठां प्रकर्षेण संशयविपर्ययराहित्येन स्थितिर्ब्रह्माहमस्मीति स्व
स्वस्थानं प्रतिष्ठां तां विन्दते ॥ — ॥ गुरूपासनादिना श्रवणादिकं कु
र्वाणः लभते अथ तदानीमेव सः य एवं विद्वान् भयं भयरहितं मोक्ष
रूपं अद्वितीयं ब्रह्म गतः प्राप्तो भवति । ब्रह्म वेद ब्रह्मैव भवती
ति श्रुतेः । यदा यस्मिन्नेव काले एष पूर्वोक्तः एतस्मिन्नुदरंपौदि मी
मुपाके प्रसंगाभिन्ने ब्रह्मणि उत् इति निपातोऽपिशब्दार्थः अरमल्प
मपि अंतरं भेदमुपास्योपासकादिलक्षणं कुरुते पश्यति । धातूनां

१२१

मनेकार्थत्वादथ तदानीमेतस्यानन्ददर्शिनो भयं संसारप्रयुक्तं दुःखं भव
ति न दर्शिनां भयं दुःखं भवतीत्येतेन तत्। द्वादीकर्तृ ब्रह्मात्मैकत्वज्ञानरहि
तानां वाय्वादीनां भयप्रदर्शनपरं भीषास्माद्वातः पवत इत्यादि मंत्रमर्थ
तं पठति। वायुः सूर्यो वह्निरिंद्रो मृत्युर्जन्मान्तरे त्वरं। ब्रह्मधर्मं विजानं
तोप्यस्माद्बिभ्यत्वरंतीह हीति॥१॥ वाय्वादयो जगन्नियामकत्वेन प्रसि
द्धाः पंचाप्यधिदेवताः प्रतीते जन्मनि धर्मनिष्ठापूर्त्यादिलक्षणं विजानं
तोपि ज्ञानपूर्वकमनुष्ठितवंतोपीति प्रत्यक्षं तरं प्रसक्तं ब्रह्मणोनंदरूपत्वाव
स्मात्त्वं ब्रह्मणो भिया प्यस्मिन्वाय्वादिजन्मनि चरंती स्वस्वव्यापारेषु
सदा वर्त्तन्ते। हि शब्देन भयादस्याग्निस्तपति भयात्तपति सूर्यः भया
दिंद्रश्च वायुश्च मृत्युर्धावति पंचम इति कठश्रुतौ यमेनोक्तां प्रसिद्धिं द्यो
यति॥२॥ ननु तरति शोकमात्मविदित्यादिषूदाहृतेषु वाक्येषु ब्रह्मानंदज्ञा
नस्यानर्थनिवृत्तिहेतुत्वं स्पष्टं नावभासत इत्याशंक्य तथा प्रतिपादनप
रं वाक्यं पठति॥३॥ आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति॥३॥ रघुजी
ठोः

र इति चकारेणेदं व्यपदेशो औपचारिकः। ब्रह्मणः स्वरूपभूतमानंदं विद्वान
परोक्षतया ज्ञानेन पूरुषः कुतश्चन कस्मादपि ऐहिकभयहेतोः व्याघ्रा
देः पारलौकिकभयहेतोः पापादेर्वा न बिभेति भयं न प्राप्नोति॥ –॥ ननु
न च विदः। पापादेर्भयं नास्तीत्येतत् कुतोवगम्यत इत्याशंक्य तत्प्रतिपा
दकमेतं ह वाव न तपति। किमहं साधु नाकरवं। किमहं पापमकरवमि-
ति वाक्यमर्थतः पठति॥ –॥ एतमेव न तपन्त्येषा चिंता कर्माग्निसंभृतेति। क-
र्माग्निसंभृता पुण्यपापरूपं कर्मैवाग्निः। अकरणकरणाभ्यां वाग्निवत्सं-
तापहेतुत्वात्तेन संभृता संपादिता एषा पुण्यं नाकरवं कस्मात्पापं नु कृतक-
र्म कुत इत्येवंरूपा चिंता। एतमेवं तं च विदमेव न चैतानसंतापयति। ना-
न विद्वांसं सततया चिंतया सदा संतप्यत इत्यर्थः। पुण्यपापयोरतापक-
त्वे हेतुप्रदर्शनपरं ... स एवं विद्वानेते आत्मानं स्पृणुते। उभे ह्येवैष
एते आत्मानं स्पृणुत इति वाक्यद्वयमर्थतः पठति॥ –॥ एवं विद्वान् ...
द्वे हि वा आत्मानं स्मरेत्सदा। इत्येते च कर्मणी स्वात्मरूपेणैव पश्यतीति॥

भ्रि वान् न्

सः यः कश्चित्पुमानेवमुक्तेन मार्गेण यश्चायं पुरुषे यश्चासावादित्ये स एकः।। स
इत्यनेन प्रकारेण विद्वान् जानन् वर्त्तते। स एवैते पुण्यपापे हित्वेत्यध्याहा
रः। आत्मानं ब्रह्माभिन्नं पूर्वं स्पृणुते प्रीणयति स्मरेदित्यर्थः। पुण्यपापप
योर्भिन्नत्वानुसंधानेनाहं कर्त्तेत्यतस्तद्विषयाचिन्तैव नास्ति अतस्तौ न निमि
त्तके स्तापदे इत्यर्थः। आशयः। किं च एष विद्वानेते पूर्वत्तिके पुण्यपापरूपे क
कर्मणी देहेन्द्रियादिप्रवृत्त्याजनिते स्वात्मरूपेणैवेदं सर्वं यदयमात्मेत्या
दिवाक्योक्तप्रकारेण पश्यति जानातीत्यर्थः। अतः स्वात्माभिन्नत्वादप्यतापके
त्वमिति भावः।।—।। ननु नानन्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादिकौ आ
त्वसद्भाववादनादौ संसारे बहुजन्मोपार्जितेषु पुण्यापुण्यलक्षणेषु कर्मस्वस
ख्यातेषु अप्रसिद्धेनात्मतयानुसंधानायोग्येषु सत्सु कथं तद्विषयाचिन्ताना
न वेदित्याशंक्य स विदानानां तेषां तेषां तत्वज्ञानेन विनाशितत्वान्न चिन्ताज
नकत्वमित्यभिप्रायेण हृदयग्रंथ्यादिनिवृत्तिपरं मुण्डकादिश्रुतिषु स्थितं
वाक्यं पठति।।—।। भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः। क्षीयंते चास्य
कर्माणि तस्मिन्दृष्टे परावरे इति परमपि हिरण्यगर्भादिकं पदं यस्यावरं निकृ

परावरे

ब्रह्मानंदयो
गानंदः

अयमः

१७२

ह्यं यस्मात् तस्मिन्परमात्मनि दृष्टे साक्षात्कृतेऽस्य साक्षात्कृतवतः हृदय
स्य बुद्धेः श्चिदात्मनश्च ग्रंथिवत् दृढसंश्लेषरूपत्वात् ग्रंथिः अन्योन्याध्यासः
भिद्यते विदीर्यते विनश्यतीत्यर्थः। सर्वसंशयाः। आत्मा देहादिभ्यो व्यतिरि
क्तोऽपि कर्तृत्वादिधर्मयोगेन वा। अकर्तृत्वेऽपि तस्य ब्रह्मणो भेदोऽस्ति न वा॥
अनेदंपितत्त्वज्ञाने कर्मादिसहितं मुक्तिसाधनं केवलं वेत्यादयः। छिद्यन्ते।
द्विधा क्रियन्ते नश्यन्ते। साक्षात्कृतस्य वस्तुनः संशयविपर्ययत्वादर्शनादिति
भावः। कर्माणि संचितानि पुण्यापुण्यलक्षणानि। क्षीयन्तेऽस्य निदानाज्ञा
नविनाशेन न विनश्यंतीति॥ -- ॥ नित्यं कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं
समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥ विद्यां चाविद्यां च यस्तद्वेदो
नयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते इत्यादिश्रुतेः। कर्मणै
व हि संसिद्धिमास्थिता जनकादयः। यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतं
एवं तपश्च विद्या च संयुक्तं भेषजं महत् इत्यादिस्मृतेश्च। केवलस्य ज्ञानस्य
मुक्तिस्य वा कर्मणो मुक्तिहेतुत्वं स्यात् इत्याशंक्यादौ दृतस्य वाक्यस्य स्या
तीव शब्दस्य तापनीयत्वनिपत्वात् संसिद्धिशब्देन च ज्ञानसाधनवित्तशुद्ध

व्यमिधानात् विद्याशब्देन योपासनया विवक्षितत्वात् न कर्मणो मुक्तिसाधन-
त्वमित्यभिप्रायेण साधनान्तरं निषिद्ध परं तमेव विदित्वा अतिमृत्युमेति ना-
न्यः पन्था विद्यतेऽयनायेति श्वेताश्वतरवाक्यमर्थतः पठति ॥ – ॥ तमेवे-
ह्यानन्येति मृत्युपंथानन्वेतरद् इति ॥ – तं पूर्वोक्तं परमात्मानं विद्वानेवमृत्युं सं-
सारं मृत्युमत्येति अतिक्रामति । इतरः सकुद्रूपरूपः । केवलकर्मरूपो वा पंथ-
मार्गो मोक्षोपायः । न चैनेव विद्यते । अन्नदाहेतोश्रुतीषु अन्वयव्यतिरेका-
भ्यामैहिकानिष्टनिवृत्तिरेव प्राधान्येनावभासते । नामुष्मिकी संसारक-
मुष्मिकस्यानिष्टस्य नाविजन्मपूर्वकत्वात् तस्य स निदानस्यानावृत्ति-
पादकं ज्ञानादेवं सर्वथा पापहानिः । क्षीणैः क्लेशैः जन्ममृत्युप्रहाणिरि-
तिश्वेताश्वतरवाक्यमर्थतः पठति ॥ – ॥ ज्ञात्वैवं पापहानिः क्षीणैः क्लेशैः दे
र्न जन्म नागितिम् – देवं स्वप्रकाशं प्रसगनिन्नं ब्रह्म ज्ञात्वा अपरोक्षतया
व्यनुभूय स्थितस्य कामक्रोधादीनां सर्वेषां पापानां हानिर्भवति । तैः पापै-
रा ब्दा निषेधैः । रागादिभिः क्लेशैः क्षीणैर्नष्टैर्नीविजन्म हेतुकर्माभावेनायेम

द्यतं न प्राप्नोतीत्यर्थः ॥ ननु शोकतरणादिफलं श्रूयत एव नानुभूयते ॥
ज्ञानिनामपि निष्टानिष्टप्राप्तिपरिहारार्थं प्रवृत्तिदर्शनादित्याशंक्य बुध्या
परोक्षज्ञानिनां तदभावप्रतिपादनपरत्वेनाध्यात्मयोगाधिगमेन देवं मत्वा धीरो
हर्षशोकौ जहातीति कठश्रुतिवाक्यमर्थतोऽनुक्रामति ॥ एवं मत्वा हर्ष
शोकौ जहात्यत्र वंध्ये धैर्यवानिति ॥ धैर्यवान् ब्रह्मचर्यादिसाधनसंप
न्नः देवं चिदानंदादिलक्षणं मत्वाऽवगम्य अस्मिन्नेव जन्मनि हर्षशोकौ
जहातीति ॥ एतमेव वाजसनेयिनां कर्माग्निसंहृते हृताकृतार्थविशेषप्रदर्श
नपरं नैनं कृताकृते तपत इत्यादि वत्या ब्राह्मणवाक्यमर्थतः पठति ॥
नैनं कृताकृते पुण्यपापे तापयतः क्वचिदिति ॥ पूर्वमकृतपुण्यं कृतं च
पापं तत्त्वविदस्तापहेतुर्न भवतीत्यस्य कृतं इह तु कृतमकृतं वा पुण्यं वा पापं वा
तथाविधं तापकं न भवतीत्युच्यत इति विशेषस्तथा हि । तापो नाम चित्तेन
विकारविशेषः ॥ पुण्यं कृतं संदर्भवल्लक्षणं विकारमुत्पादयति ॥ अकृतं
विषादं पापं पुनस्तद्विपरीतेनाकृतं हर्षमुत्पादयति । कृतं विषादं न चावि

दे

ले

स्म २

दृष्टं हि स्तून् नैव पितृनय विषय विकार हेतून् कदा विद्वत्तः। अविक्रियब्र
ह्मरूपत्वे ज्ञानादि सन्नि प्रायः। नन्विय वेदवाक्या नि प्रमाणानि न्या
ह॥ ॥ इत्यादिश्रुतयो हृदयः पुण्यैः श्रुतिभिः सहेति॥ ॥ आदित्येनाष्टावे
नहृहवेदवेदवेदिदथ सत्यमस्ति न चेदिहावेन्महती विनष्टिः यतत
द्विदुरमृतास्ते न वै मिय यतेर दुःखमेवापियंति तथा चायो देवानां प्रत
बुध्यत स एव तदभवं निर्वीय्यते भूयसुखात् प्रमुच्यत इत्याद्याभ्य
तयो गृह्यंते। सर्वं तत्रस्थमात्मानं सर्वभूतानि चात्मनि। संपश्यन् ब्र
ह्मयाजी वै स्वाराज्यमधिगच्छति। सेवतः स्यात्म विज्ञानादि सुहृद्
मामनत्यादिपुराणस्मृतिवचनैस्सह प्रमाणानीदृश्यर्थः॥ ॥ उदाहृ
तानां श्रुतिस्मृतिवाक्यानां सर्वेषां तात्पर्यमाह॥ ॥ ब्रह्मज्ञानोऽर्थहानिमा
नंदं चाप्यवाप्यं अन्नीति॥ ॥ ननु ब्रह्मानंद इत्यानंदस्य ब्रह्मपदेन वि
शेषणा दानंदांतरं षस्तीत्यवगंम्यते। कतिविधा किंतत्स्थानं दर्श
स्याकांक्षायां तद्भेदप्रदर्शनपूर्वकं ब्रह्मानंदविवेचनं प्रतिजानीते॥ ॥

दा
न

ब्रह्मानंदे योगानंदः।

आनंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा। विषयानंद इत्यादौ ब्र
ह्मानंदो विविच्यत इति॥ ॥ब्रह्मानंदो विद्यानंदो विषयानंद इत्येनेन
प्रकारेणानंदस्य त्रैविध्यमवगंतव्यं। तत्रेतरयोरानंदयोर्ब्रह्मानं
दमूलत्वादादावध्यायत्रयेण ब्रह्मानंदो विविच्य प्रदर्श्यत इत्यर्थः।
तत्रादौ तावत्तैत्तिरीयश्रुतिपर्यालोचनया मानंदरूपं ब्रह्मावग-
म्यत इत्यभिप्रायेण भृगुवल्ल्यार्थं संक्षेपेण प्रदर्शयति॥ भृगुः
पुत्रः पितुः श्रुत्वा वरुणात् ब्रह्मलक्षणं। अन्नं प्राणं मनो बुद्धिं त्यक्त्वान
न्दं विजज्ञिवानिति। भृगुनामकः पुत्रः पितुर्वरुणाख्यात् ब्रह्मलक्ष
णं। यतो वा इमानि भूतानि जायंते। येन जातानि जीवंति। यत्प्रयं
त्यभिसंविशंतीति। तद्विजिज्ञासस्व। तद्ब्रह्मेत्येवंरूपं श्रुत्वा अन्नमया
दिकोशेषु तल्लक्षणासंभवेन तेषामब्रह्मत्वं निश्चित्य आनंदमानंद
मयकोशे पंचमावयवेन ब्रह्म पुच्छं प्रतिष्ठेति। श्रुतं बिंबभूतमानंद
ब्रह्मलक्षणयोजनया ब्रह्मत्वेन ज्ञातवानित्यर्थः। कथमानंदस्य लक्ष

१७५

णां योजितवानित्याशंक्य तद्योजनाप्रकारप्रदर्शनपरं। आनंदाद्ध्येव ख
ल्विमानि भूतानि जायंते। आनंदेन जातानि। जीवंति। आनंदं प्रयंत्यभि
संविशंतीति। वाक्यमर्थतः पठति ॥—॥ आनंदाद्ध्येव भूतानि जायंते। ते
न जीवनं। तेषां लयश्च। तत्रानंदो ब्रह्मानंदो न संशय इति। ग्राम्यधर्मनि
मित्तकादानंदेव भूतानि जायंते। उत्पद्यंते। तेन विषयभोगादिनिमित्त
केनानंदेन जीवनं प्राप्नुवंति। तेषां प्राणिनां लयश्च। तत्र तस्मिन् सु
षुप्तिकाले निजस्वरूपभूत आनंदे एव भवति ॥—॥ सुषुप्तावानंदातिरेके
ण कस्याप्यनुभवानाभावात्। अतः आनंदो ब्रह्मैव। सर्वजनसिद्धत्वा
न्नात्र संशयः कर्त्तव्य इति भावः ॥—॥ एवं तैत्तिरीयश्रुतिपर्यालोचनया
ब्रह्मण आनंदैकरूपतां प्रदर्श्य। छांदोग्यश्रुतौ तां विदर्शयितुं सनत्कुमा
रनारदसंवादरूपे सप्तमाध्यायेऽखिलतस्य भूमरूपब्रह्मप्रतिपाद
कस्य यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेत्या
दिकी वाक्यस्यार्थं संक्षेपेणाह। भूतात्यत्वं पुराणात्मा त्रिपुटिद्वैतवर्जि

द्वा

अद्वै
२

नादिति। भूतानामाकाशादीनां तत्कार्याणां जरायुजादीनां चोत्पत्तेः
पूर्वं त्रिपुटिद्वैतवर्जनात् त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां पुदार्थानामाका
राणां समाहारस्त्रिपुटिः सैव द्वैतं तस्य वर्जनमभावः। तस्मादुमार्षेय
तः। कालतो वस्तुतो वापरिच्छेदशून्यः। परमात्मा भावानयेन प्रसंगेन य
न मिति नीयोते न्यायात्। भूमैवासीदित्यध्याहारः। तदेतद्द्वैतवर्जन
मुपपादयति॥ ज्ञातृज्ञानज्ञेयरूपा त्रिपुटिः प्रलये हि नास्तीति तस्मात्प्रमा
णाज्ञात्रादिरूपा त्रिपुटिः प्रलयाकाले नास्तीत्येतत् सर्ववेदान्तसंमत
मिति। हि शब्दः प्रसिद्धौ ज्ञानस्यापि प्रायः॥२॥ इदानीं ज्ञात्रादिस्वरूपं
दर्शयति। विज्ञानमय उत्पन्नो ज्ञाता ज्ञानं मनोमयः। ज्ञेयाः शब्दादयो
योनेतत्। त्रयमुत्पत्तितः पुरेति॥२॥ परमात्मन उत्पन्नो बुद्ध्युपाधि
कोजीवो विज्ञानमयो ज्ञाता ज्ञानं मनोमयः मनसि प्रतिबिंबितं मनो
मयशब्दवाच्यं चैतन्यं ज्ञानं। शब्दस्पर्शादयो ज्ञेयाः प्रसिद्धाः। इदं त्रयं
कार्यत्वादुत्पत्तितः पुरा कारणव्यतिरेकेण नास्तीत्यर्थः॥२॥ प्रतित

माह। अर्थज्ञानावबोधनिर्देशेन पूर्णमिवानुरूपतद् इति। ऋग्वेदादि ज्ञानावबोधेन तर
हितस्य पूर्णस्य वा तेषां नो नेयते। कुतस्त्वनुरूपत इत्यत आह। सामाधिस्मृति
मूर्छा स्विति। विद्वद्दृष्टान्तप्रदर्शनाय समाधिग्रहणं। सार्वानुभवद्यो
तनाय सुप्तिमूर्छयोरुदाहरणं। सुमाद्युच्छितस्य देवतादर्शन स्मरणात् यथा
नुपपत्तौ निर्देशस्य तदनुभवसिद्धिरिति भावः। भवतु स्वप्नादावेवं तन्नसि
द्धिः प्रसक्तः किमायातमित्यत आह॥ पूर्णस्तु सुखे सुषुप्ते परानथेति। यथा स्व
प्नादौ परिच्छेदकाभावात् पूर्णस्तथा सुषुप्तेः पूर्णानन्दनावादित्यर्थः। अत्र कि
ब्रह्मणः पूर्णत्वमानंदरूपत्वं किमायातमित्याशंक्यान्वयव्यतिरेकाभ्यां भूमेः
सुखस्वरूपत्वप्रदर्शनपरं यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति वाक्यमर्थ
तोनुक्रामति॥ यो भूमा स सुखेनाल्पे सुखत्रेयाविभेदिनीति। यः पूर्वोक्तो
भूमा स सुखरूप एव अद्वितीय दुःखहेतोरभावात् अल्पपरिच्छिन्नेत स्यै
वदिवरणं त्रेधा विभेदिनीति हेतुगर्भविशेषणं सुखं तत्र न विद्यत इत्यर्थः
॥ एवं कस्य केनाभिहितमित्यत आह। सनत्कुमारः प्राह वं नारदायेति
॥ नारदस्यापि शिष्यत्वे कारणमाह। अतिशोकि नेदृ इति॥ अतिशयितो

तस्य

ब्रह्मानंदे
ध्येगानंदः

प्रथमः

कः शोको यस्य प्रतिशोकिं तस्मै तस्यातिशोकत्वे कारणमाह ॥ ऋचा सपुराणान्
पंच वेदान् शास्त्राणि विविधानि च । ज्ञात्वाप्यनात्मविच्चेन नारदो तिशुशोच
ह । विदित्वाप्यात्मज्ञानरहितत्वेनातिशयेन शोकं प्राप्तः । ननु वेदशास्त्रवि
षयज्ञानस्य शोकनिवर्तकत्वेन प्रसिद्धस्य कथमतिशोकहेतुत्वमित्यत आ
ह ॥ वेदाभ्यासात्पुराणात्तापत्रयमात्रेण शोकिता पश्चाद्व्यासविस्मारत्वं गग
र्वैश्च शोकितेति । तापत्रयमात्रेणाध्यात्मिकादिलक्षणेनैव शोकिता शोको
स्यास्तीति शोकितस्य नावस्तु न्ना व्यासीदिसंध्याहारः । पश्चाद्विति तु श
ब्दो विशेषद्योतनार्थः । अभ्यासः पाठावर्तनं विस्मारः पठितस्य वि
स्मरणं गर्वः स्वतोधिकेन तिरस्कारः । गर्वान्युक्तादर्शनेन स्वाधिक्यबुद्धिः
एतैश्च कारणैः शोकित्वं ॥ ननु एवं सर्वज्ञस्यापि नारदस्यातिशोकित्वं
ज्ञातमिति कुतो वगम्यतदत्याशंक्य सो हं भगवः शोचामीति तदीयवच
वाक्यादवगतमित्याह । अपि प्रेसन्तं मा भगवान् शोकस्य पारं तारयत्विति तं नि
वृत्तपापायेति न प्रहसति सनत्कुमारो नामशब्दवाच्यं स्वरूपं ब्रह्मैव

११

355

ज्ञा ज्ञायमानं शोकनिवृत्त्युपायं दुःखं चैव विजिज्ञासीत् तच्च मित्यारभ्यो-
ऽनेऽथ संवर्त्ते गौतमेयानिसाह ॥ ॥ सोऽहं विद्वान् प्रश्नोत्तरमिति शोकपारं न-
यांत्र मां इत्यन्ते सुखमेवास्यपारमिति स्यन्त्यर्थादेपि ॥ ॥ ननु स्रगादिजन्ये-
षु सुखेषु बहुषु सत्सु नाल्पे सुखमस्तीति बुद्धिरनुपपन्नेति चेन्न तेषां दु-
ःखानुषंगेण विषसंपृक्तान्नवद् दुःखरूपत्वेस्य मुनिना निहितत्वादित्या-
ह ॥ ॥ सुखं वैषयिकं शोकसहस्रेणावृतत्वतः दुःखमेवेति मन्वाहे नाल्पे-
ऽस्ति सुखमित्यसाविति ॥ ॥ द्वैते सुखाभावमनंगीकृत्याद्वैते पि तमामगां कृते ॥
ननु द्वैते सुखं मान्यत्वाद् द्वैतेप्यस्ति नो सुखमिति ॥ ॥ तत्रानुपलब्धिं प्रमाण-
यति ॥ अस्ति चेदनुभूयेतेति ॥ ॥ अद्वैते सुखं यदि विद्यते तर्हि विषयसुख-
दु दिवदुपलभ्येत नोपलभ्यते अतो नास्तीत्यर्थः ॥ ॥ ननूपलभ्यत एवेत्याशं-
क्यमानं प्रत्याह ॥ तथा चात्रिपुटि नैव दृश्यते हि ॥ ॥ अत्र तु न वस्त्वनुभवविरेणानु- २
नायत्सापेक्षत्वाद् द्वैतहानिरिति भावः ॥ ॥ अद्वैतस्य सुखाधिकरणत्वं नि-
षेधयं गीकरोति सिद्धान्ती ॥ मास्त्वद्वैते सुखमिति ॥ ॥ तत्र हेतुमाह ॥ ॥ किं नु स-

ब्रह्मानंदेध्या
नानंदः

प्रथमः

१८

खमद्वैतमेवहीति। हि यस्माददैतमेव सुखमतः सुखाधिकरणं न नवती
त्यर्थः। अद्वैतं सुखमित्यत्र किं प्रमाणमित्याशंक्यानुवादपूर्वकं तस्य स्वप्र
काशत्वात् प्रमाणप्रश्नएवानुपपन्न इत्याह॥ ॥ किंमानमिति चेन्नास्ति मा
नाकांक्षा स्वयंप्रभत्वादिति॥ ॥ ननु स्वप्रकाशत्वेपि किं प्रमाणमित्याशंक्याह
दीयमेव वचनं प्रमाणमित्याह। स्वप्रभत्वे त्वद्वाक्यं मानमिति। तदुपपाद
यति॥ ॥ यस्मात्त्वयानिदं। अद्वैतमभ्युपेतं तस्मिन् सुखं नास्तीति नाभ्युपेति
॥ यतः कारणात् भवताप्रमाणान्निरपेक्षेणाद्वैतमभ्युपेतमतः सुखमेवा
श्रीयते। अतः स्वीकृतमित्यर्थः॥ ॥ न मयाद्वैतमभ्युपगम्यते किंतु वदु मे
मद्वैतमनुवदुच्यते। अतउक्ता सिद्धिरिति शंकते॥ ॥ नाभ्युपेम्यहमद्वै
तं त्वद्वचोनूद्य दूषणं वच्मीति चेदिति॥ ॥ विकल्पासहत्वादद्वैतानभ्यु
पगमोनुपपन्न इति मन्वानः पृच्छति॥ ॥ तदा ब्रूहि किमासीद्द्वैतं तं पुरे
ति। ॥ किं शब्दसूचितं विकल्पं दर्शयति॥ ॥ किमद्वैतमुत द्वैतमन्या वा वा॥ इ
ति। ॥ त्रितियं पक्षं निराकरोति न्यान्तिमः। अप्रसिद्ध इति। द्वैताद्वैतविलक्ष

स्य स्वरूपस्य लोकस्य दर्शनादिति भावः। द्वितीयं पक्षं निराकरोति न द्वि-
तीय इत्यत्र हेतुमाह। न चेत्युच्यते इति। द्वैतस्य तदानीमनुत्पन्नत्वादि-
ति भावः। अतः प्रथमः पक्षः परिशिष्यत इत्याह। शिष्यते प्रथम इति॥
ननु तेनाप्रकारेणाद्वैतं युक्त्यैव सिध्यति नानुभवेनेति वादयति॥
अद्वैतसिद्धिर्युक्त्यैव नानुभवादिति। अद्वैतसिद्धिर्युक्त्यैवेत्युक्ते विक-
ल्पासहत्वादनुपपन्नमिति मन्वानो युक्तिं विकल्पयति॥ ॥ वद॥ निर्दि-
ष्टं तासह दृष्टांता वेति॥ विकल्पस्य ... न ता निराकरोति। को दृष्टांत-
रमत्र नोद इति॥ प्रथमं पक्षं सोपहासं निराकरोति॥ नानुत्पन्ने निर्-
दृष्टं तदिति युक्तिः स्कन्नो नते॥ अद्वैतसिद्धिर्युक्त्यैवेति पित्ता अनुमेति
स्ता चन्ना अपेयते युक्तिः स्कंद दृष्टांत प्रदर्शनमंतरेण न किंचित्साधय-
ति। अतो न दृष्टांत इत्यस्य किरयुक्तितेति भावः। द्वितीयविकल्पेन नयवादी
स प्रतिपन्नो दृष्टांतो वक्तव्य इत्याह॥ ॥ सदृष्टांतं तव पक्षे तु दृष्टांतं वद मे मत-
मिति॥ ॥ न हि तं दृष्टांतं नेवाद्वैतं साधयामीति शंकते॥ पूर्ववादी॥ अद्वै

तव शोनिते

त

तत्प्रलययोर्द्वैतानुपलंभेन सुषुप्तिवत् ॥ ॥इतिचेदिति। प्रलययोर्द्वैतरहितो
भवितुमर्हति। द्वैतानुपलब्धिमत्त्वात्। यो यो द्वैतानुपलब्धिमान् स स द्वै
तरहितः। यथा स्वाप इति ॥ ॥नन्वेवं साधयस्तव स्वसुषुप्तिर्दृष्टांतः प
रसुषुप्तिर्वा। अन्त्ये तस्यापरं सस प्रसिद्धत्वेन तत्साधयेतु दृष्टांतांतरं वक्त
व्यमित्याह ॥ ॥सुषुप्तिरियत्र दृष्टांतांतरमीरयेति। ननु तस्याः परसुषु
प्तेर्दृष्टांतत्वमिति द्वितीयविकल्पमाशंकते दृष्टांतः परसुषुप्तिश्चेदिति। पर
सुषुप्तेस्तवाप्रसिद्धत्वेन त्वयादृष्टांतीकरणमनुपपन्नमिति सोपहास
माह सिद्धांति। आहोतिकोशल्यं महत् ॥ ॥यः स्वसुषुप्तिं नुवेद स परसु
प्तौ नु का कथेति ॥ ॥यो न वा स्वसुषुप्तिरनुभवगम्या वा नं मिकारणं स्वसु
प्तिं मपि न वत्ति। तस्य परसुषुप्तौ का कथा। परसुषुप्तिज्ञानं न भवतीति कि
मु वक्तव्यमिति भावः। ननन्वनुमानात्परसुषुप्तिसिद्धिरिति शंकते निश्चेष्ट
त्वात् परसुप्तोयथाहमिति चेदिति ॥ विमतः परसुप्तो भवितुमर्हति। प्रा
णादिमत्त्वे सति निश्चेष्टत्वात् मद्वदित्यनुमानानीयमर्थः। एवं तर्हि तव सुप्तस्य

१७

359

प्रकाशत्वं परिशिष्यते इत्याह सिद्धांतितथा। तदाहर्तुं सूत्रे सम्यक् स्वेनैवं प्र
बलाद्भवेदिति ॥ ॥ नैवं हि तद्दोमोक्षं इति स्वसूक्तिमुदाहर्तुं दृष्टांति कर्तुं से
तवच सुप्तिः स्वप्नवत्त्वं स्वयंप्रकाशत्वं बलात् सुप्त्युदाहरण सामर्थ्या
देव न भवेत्। कथं बलाद्भवेदित्याशंक्याह ॥ नेंद्रियाणि न दृष्टांतस्तथापी
गीकरोषि नो। इदमेव स्वप्रमात्वं यद्ज्ञानं साधनैर्विनेति। सुप्तिग्राहका
णीन्द्रियाणि न संति तेषां स्वकारणे विलीनत्वात् दृष्टांतश्च संप्रतिपन्नो
नास्ति। परस्य तेर प्रसिद्धस्योक्तत्वात्। तथापि तां स्वप्तिमंगीकरोषि। एव
साधन वं च सति साधनैर्विना ज्ञानमंतरेणापि नानं प्रकाशानमिति यत्। इद
मेव स्वप्रमत्वं सुषुप्तिरि ~~स्वयम~~ त्यर्थः। अयं प्रयोगः विमता सुप्तिः
स्वप्रकाशा व्यस्त स्वपि ज्ञान साधनेषु प्रकाशमानत्वात्। सांख्याभिम त्रि
तात्मवत्। प्राभाकराभिमत संवेदनवद्वेति। इदं प्रत्यक्षस्पष्टांतरं
नोदाहृतायाः सुप्तेरद्वैतत्वं स्वप्रमत्वं च प्रसाध्य तत्र सुखप्रसाधनाय
पूर्वपक्षेण व्याकांक्षामुत्थापयति ॥ ॥ स्तामद्वैतं स्वप्रमत्वं वदत्सु सो

ब्रह्मानंदेयो
गानंदः।

५९ प्रथमः

सुखं कथमिति ॥ ना सुखप्रतियोगिनो दुःखस्य तदानीमसत्त्वात् सुख
मेव परिशिष्यत इत्याह ॥ नष्टे दुःखे तदा नास्तीति ततोऽवशिष्यते सुख
मिति ॥ न सुखदुःखे प्रकाशतमसोरिव परस्परविरोधिन्यौ च दुःखाभावे
सुखमेवाभ्युपेयमिति भावः ॥ ननु तो दुःखाभावे किं मानमित्याकांक्षायां
श्रुत्यनुभवादि साह ॥ ॥ अंधः सन्ननंधः स्याद्विद्धोऽविद्धो रोग्यपि ॥
व्यरोगीति श्रुतौ प्राह तच्च सर्वे जना विदुरिति ॥ तस्माद्वा एतं सेतुं तीर्त्वांध
स्सन्नंधो भवति । विद्धः सन्नविद्धो भवति । उपतापि सन्ननुपतापि भव
ति । तद्यद्यपीदं मघवः शारीरं बंधं भवत्यनंधः स्सन् भवतीत्यादिश्रुति
देहाभिमानप्रयुक्तानंधत्वादीनस्य सो निवारयति ॥ व्याध्यादिना पीड्य
मानस्यापि सुप्तो दुःखानुभवो नास्तीति एतत्सर्वजनप्रसिद्धं चेत्यर्थः ॥
ननु यत्र दुःखाभावस्तत्र सुखमिति सस्याव्याप्तिर्लोष्टादौ व्यभिचार इति
शंकते ॥ ॥ न दुःखाभावमात्रेण सुखं लोष्टशिलादिषु द्वयाभावस्य द
ष्टत्वादिति चेदिति ॥ दुःखाभावमात्रेण सुखं कल्प्यते न शक्यते । लो
ष्टशिलादिषु द्वयाभावस्य सुखदुःखयोरभावस्य दर्शनादित्यर्थः ॥ न

१९०
दु
ग्य
ध
०

दृष्टांतदार्ष्टांतिकयोर्वैषम्यान्नैवमितिपरिहरति विषमं त्वयति॥ना वये
दृष्टांतवचनं विषमं दार्ष्टांतिकाननुसारि इत्यर्थः॥ना दृष्टांतस्यानतुकूल
त्वमेवोपपादयति॥ना सुखे दैन्यविकासान्योपरदुःखसुखोहनमिति
।अन्यनिष्ठयोर्दुःखसुखयोर्यथाक्रमं सुखदैन्यविकासाभ्यां लिंगाभ्यां क
र्त्तव्यं॥ना अयं दुःखी विषण्णवदनत्वात् संप्रतिपन्नवदित्यर्थः। नव चैवं लो
के प्रसत्तेः किमायातमित्यत आह। दैन्याद्यनावत्तो लोष्टे दुःखाद्यूहोन संभ
वादिति॥ना लोष्टादौ सुखदैन्यादिलिंगानावात् दुःखसुखयोरूहनमेव
न संभवति। अतस्तत्र दुःखाभावोपि न निश्चेतुं शक्यत इत्यर्थः। इदानीं पर
कीयसुखदुःखाभ्यां स्वकीयस्य सुखदुःखयोर्वैषम्यं दर्शयति॥ना स्वकीयसु
खदुःखे तु कोहनीयं तत्तस्तयोः। भावो वेद्योनुभूयत एव तदभावोपि नान्यत
इति॥ना स्वनिष्ठयोस्तु सुखदुःखयोरनुभवसिद्धत्वात्। नानुमेयत्वं यतस्तन
स्तयोः सुखदुःखयोर्नाविस्पष्टत्वं यथानुभूयैव वेद्यः प्रत्यक्षेणापन्नवग
म्यतात यो॰ तदभावोपि तयोः सुखदुःखयोरभावोपि अन्यतः। अन्यस्मादनुमा

ख वो

ऽहनं

सुख

नादेर्नावगम्यते। किंतु प्रसक्तेपोवेद्यसर्थः॥ फलितमाह॥–॥तथा सति स्वसु
स्योव दुःखाभावोनुभूतितः। तथासति स्वकीयस्य सुखादेरनुभवयोग्य
चेत्सति। स्वस्मात्स्वकीयस्य भावपि विद्यमानो दुःखाभावोनुभवेनैवसि
द्धः। ततोपि किं तत्राह। न विरोधिदुःखमाहिसात् सुखं निर्विघ्नमिष्यतामि
ति॥–॥सुखोसुखविरोधिनो दुःखस्याभावात् निर्विघ्नं विघ्नरहितं बाध
रहितं सुखमिष्यतामित्युपपन्नो॥–॥नन्वाप्यादिसुखसाधनसंपादनान्य
यानुपपत्त्यापि स्वस्य सुखमस्तीत्यवगम्यत इत्याह॥–॥महत्तरप्रयासेन
मृदुशय्यादिसाधनं। कुतस्संपाद्यते स्वस्य सुखं चेत्तत्र नानवदिति॥–॥त
दस्यां सुखो सुखं न भवेन्नत। महत्तरप्रयासेन बहुवित्तशारीरपीडा
दीनां मृदुलशय्यादिकशिपुमञ्चकादिसाधनं सुखसाधनं कुतः संपा
द्यते सुखो। कुतः कस्मात्कारणात् संपाद्यते न अतोपीत्यर्थः॥–॥अर्थापत्ति
त्तिरन्यथोपपत्तिं शंकते॥–॥दुःखनाशार्थमेवैतदिति चेत्॥ एतत्तु शय्यादि
साधनसंपादनं दुःखनिवृत्तिफलकं नियतमितिपरिहरति॥ शय्याभिरामा नि
श्चिनव्वति॥–॥रोगादिदुःखे सति नैव रोगिणः स्वेतत् सुखायेवेति निश्चिन्वति

निवृत्तये तद्दुःखत्वात् तदभावे तु निवर्त्यदुःखाभावात् । तत्संपादनं सुखायै
वस्यवगम्यत इत्यर्थः ॥ ननु सुषुप्तसुखस्य शय्यादिसाधनजन्यत्वे
आत्मस्वरूपत्वं व्याहन्येत । तत्र निद्राकृतेति । तर्हि साधनसौजन्यत्वात् सु
खं वैषयिकमेवेदिति ॥ ना किं निद्रागमात् पूर्वकालीनस्य विष[illegible] जन्य
त्वमुच्यते । उत निद्राकालीनस्येति विकल्पाद्यमंगीकरोति ॥ नचचैवा
त्र निद्रायाः पूर्वं शय्यासनादिजमिति ॥ द्वितीयं निराकरोति ॥ निद्राया
तु सुखं यत्तज्जन्यत्वे केन हेतुनेति ॥ तत्र ॥ सुषुप्तौ शय्याद्यनुसंधानाभा
वात् तज्जन्यत्वं तस्य न संभवतीति भावः ॥ निद्रायाः किंजन्यं सुखं यद्य ननु
स्ति तर्हि तद्विषयसुखवत् कुतो नानुभूयत इत्याशंक्याह नविनुस्त
दा तस्मिन्निम्नमवाप्तविषयसुखवत्तदनुभवद्यति प्रायेणाह ॥
सुखानि सुखयिरादौ पश्चान्मन्ते तु परे सुखइति ॥ ना आदौ निद्रा
याः पूर्वस्मिन् काले जीवः सुखानि सुखयीः शय्यादिजन्यसुखानि

निःसुखबुद्धिर्यस्य सततयोनःस्तथा विधं न भवति। पश्चान्निद्राकाले प
रं तन्महत्सुखे स्वरूपसुखे मज्जेत् विलीनो भवेत्॥ ॥ संक्षेपेणो
क्तमर्थं श्लोकत्रयेणाप्रपंचयति॥ जाग्रद्व्यावृत्तिभिरित्यादिना॥ ॥
य जाग्रद्व्यावृत्तिभिः श्रांतो विश्राम्यन्विरोधिनि। अपनीतस्वच्छ
वित्तो लुनवेद्विषये सुखमिति॥ ॥ जीवो जाग्रद्वृत्तिभिः जागरणा क्या
